CC-0. Digitized by eGangotri and MIDF- Delhi

आलोकः

वाल्मीकि-विद्यापीठम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सरस्वती श्रुतिमहती महीयताम्

आलोकः

त्रिभुवनविश्वविद्यालयीयसंस्कृताध्ययनसंस्थानान्तर्गतस्य

वाल्मीकिविद्यापीठस्य

□ सामयिकप्रकाशनविशेषाङ्कः □

प्रकाशकम्–
वाल्मीकिविद्यापीठम्
काष्ठमण्डपस्थम्

सम्पादकमण्डलम्–
उपप्रा. श्रीनीलमणिढुङ्गाना
उपप्रा. श्रीवेणीमाधवढकालः
उपप्रा. श्रीमाधवराजगौतमः

त्रि. वि. रजतजयन्तीसमारोहः
(२०४१)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आवरणसङ्केत :–

सूचनाविभागसौजन्येन प्राप्तपूर्वरूपं जोरगणेशमुद्रणालयनिर्मितं वाल्मीकिविद्यापीठस्य प्राङ्गणे स्थापिताया रामगाथाप्रणेतुर्महर्षे र्वाल्मीकेः प्रतिमायाः कलात्मकं चित्रम् ।

प्रकाशितपुस्तिकासंख्या – सप्तशतपरिमिता (७००) ।

प्रकाशकम् –

त्रिभुवनविश्वविद्यालयस्य संस्कृताध्ययनसंस्थानान्तर्गतं
वाल्मीकिविद्यापीठम्,
काष्ठमण्डपस्थम् ।

मुद्रकः– राजकीयो मुद्रणालयः सिंहप्रासादवर्ती ।
(श्री ५ को सरकारको छापाखाना)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रिभुवन विश्वविद्यालय

रजत जयन्ती

२०१६-२०४१

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कुलपतिश्चिरञ्जीव्यात्, राष्ट्रस्य परमा गतिः ।
दिगन्तस्फीतसत्कीर्तिः, देवो वीरेन्द्रभूपतिः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शुभाशंसा–

यद्देवासुरमानुषेषु गरिमा शोभा समृद्धिर्गिरां
त्रय्यारूढमनन्तसूत्रनिहितं यस्याद्भुतं वैभवम् ।
यस्य स्वादुतरं रसं गमयितुं ब्रह्माभिधं जागरो
जीयात् संस्कृतिसंस्कृतं चिरमिदं सारस्वतं मन्दिरम् ।।

– जुननाथपण्डितः प्रधानराजगुरुः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रिभुवन विश्वविद्यालय
त्रिपुरेश्वर
काठमाडौं, नेपाल।
In reply please refer to
[illegible]

उपकुलपतिको कार्यालय
OFFICE OF THE VICE-CHANCELLOR

Tribhuvan University
Tripureswor
Kathmandu, Nepal.
Date/मिति २०४१।३।२८

शुभकामना

संस्कृत अध्ययन संस्थान वाल्मीकि विद्यापीठ (क्याम्पस) द्वारा त्रिभुवन विश्वविद्यालयको रजत जयन्तीको पुनीत अवसर देखि संस्कृत शिक्षाको स्तर वृद्धि र अनुसन्धान प्रवृत्तिको विकास गर्ने उद्देश्यले संस्कृत भाषामा बुलेटिनको प्रकाशन हुनु अत्यन्त हर्षको कुरा हो ।

नेपालमा संस्कृत शिक्षाको परंपरा र महत्वलाई समाजले सधैं स्वीकार गर्दै आएको छ । तर वर्तमान समय अनुसार यसको उपयोगितालाई प्रमाणित गर्दै जानु पर्ने आजको आवश्यकता छ र यसै क्रममा संस्कृत शिक्षाको विकास र स्तर वृद्धिमा सम्बन्धित पक्षहरूको ध्यान केन्द्रित हुँदै जान सक्नेछ भन्ने मलाई लागेको छ। अन्य अध्ययन संस्थान सरह संस्कृत अध्ययन संस्थान र यस अन्तर्गतका क्याम्पसहरूलाई यथाशक्य सहयोग गरी संस्कृत शिक्षाको विकास प्रति त्रिभुवन विश्वविद्यालय प्रयत्नशील रहँदै आएको तथ्य सबैमा अवगत नै छ ।

संस्कृत भाषा ज्ञान र साहित्यको भण्डार नै हो । अतः यसको उच्चता र उपयोगितालाई जुन दृष्टिकोणबाट आजको प्रबुद्ध समाजले हेरेको छ त्यसै अनुरूप यसको स्तर बढाउने तर्फ संस्कृतका विद्वानहरूको विशेष प्रयास हुनु वाञ्छनीय देखिन्छ । यस प्रयास निम्ति संस्कृत भाषामा प्रकाशित यो बुलेटिन एक रचनात्मक माध्यमको रूपमा सफल हुँदै जान सकोस् भन्ने मेरो हार्दिक शुभ-कामना छ ।

रामचन्द्र बहादुर सिंह,
उप-कुलपति

सीधा सम्पर्क फो. नं. १५३१०, १५४४२ Direct Phone No. 15310, 15442
मार्फत एक्सचेन्ज १५८८४, १५०४४, १३२४१ Through Exchange 15884, 15044, 13241

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उपकुलपतिमहाभागस्य शुभकामनायाः संस्कृते रूपान्तरम्–

संस्कृताध्ययनसंस्थानान्तर्गतेन वाल्मीकिविद्यापीठेन त्रिभुवनविश्वविद्यालयस्य रजतजयन्त्याः पावनप्रसङ्गादारभ्य संस्कृतशिक्षाया गुणस्तरं संवर्धयितुमनुसन्धानात्मिकां प्रवृतिश्च समुन्नेतुं संस्कृतभाषायां सामयिकप्रकाशनं प्रकाश्यत इति मोदावहो वर्तते विषयः ।

नेपाले संस्कृतशिक्षायाः परम्परा महत्ता च सर्वदा जनजीवनेनाङ्गीकृता । परं वर्तमानसमयानुकूलतया संस्कृतशिक्षाया उपयोगितां प्रमाणीकृत्य तत्पुरस्करणमस्ति, अद्यतनीनाऽऽवश्यकता ।

अनेनैव संस्कृतशिक्षाया विकासे गुणस्तरसमुन्नयने च संबद्धपक्षस्य ध्यानं केन्द्रितं भविष्यतीति विश्वासः स्फुरति मदीये मानसपटले सांप्रतम् । त्रिभुवनविश्वविद्यालयेनेतराध्ययनसंस्थानौपम्येन संस्कृताध्ययनसंस्थानस्य तदन्तर्गतानां विद्यापीठानां च यथासामर्थ्यं सहयोगेन संस्कृतशिक्षाया विकासे प्रदर्शितायाः प्रयत्नशीलतायाः तथ्यं नाविदितमस्ति ।

संकृतभाषा ज्ञानस्य साहित्यस्य च वर्तते कोष एव । अतोऽस्य सर्वोपरितामुपयोगिताञ्च यया दृशा विलोकयति, आधुनिकः प्रबुद्धवर्गस्तदनुकूलमस्य गुणस्तरसंवर्धने संस्कृतज्ञानां विदुषां प्रयासो भवति वाञ्छनीयः ।

एतत्प्रयासक्रमे संस्कृतभाषायां प्रकाशितमिदं सामयिकप्रकाशनं रचनात्मकमाध्यमतया विन्दतु सफलतामिति वर्तते मदीया शुभकामना ।

उपकुलपतिः
रामचन्द्रबहादुरसिंहः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गुणवृद्धि :–

शिक्षाया गुणवृद्धि बहुपक्षीयप्रयासो वितनोति नैकैकः । प्रयासस्य प्रभावोत्पादकता नवीनप्रणाल्या नैरन्तर्यचिन्तनेनोपलभ्यते । अधुना गुणवृद्धेस्तु का कथा परंपरागतशिक्षापि न सम्यक् प्रचलति । गुणस्य ह्रासोन्मुखी शिक्षैवाग्रेसरा दृश्यते । तत्र शिक्षाक्षेत्रे समागतं शैथिल्यं,सामाजिकः प्रभावस्तथा राजनैतिकप्रभावश्चेति पक्षत्रयमेव शिक्षाया ह्रासस्य कारणम् । एतेनैवाशैक्षिकगतिविधिरुच्छृङ्खलता चोत्पद्येते । यदि वयं पक्षत्रयमपि सपद्येवोद्धर्तुकामास्तदा तादृश्या गत्या पादचार आवश्यकः । नो चेदेकैकस्य पक्षस्य समुद्धाराय प्रयतितव्यम् । तत्र प्रथमं शिक्षाक्षेत्रे समागतशैथिल्यविनाशाय शिक्षकाणामितिकर्तव्यता प्रभावोत्पादिनी विधातव्या । तस्मिन् शिक्षकाणामेकता सन्तोषश्चेति प्रधानकारणम् । तर्हि किं त्रिभुवनविश्वविद्यालयेन शिक्षकाणां सन्तोषाय संमानाय च पादचारो नोत्थापितः ? न हि तेषां योग्यतायाः संमानार्थं ते च प्राध्यापकसहप्राध्यापकोपप्राध्यापकपदेषु संमानपुरःसरं स्थापिताः । अनेकानि सौविध्यानि प्रदत्तानि । वृत्तिविकासानुसन्धानादिकार्यक्रमः शैक्षिकयोग्यतासंपादनाय विहित एव । यथा संस्कृतार्थे दीयमानं निःशुल्कभोजनावासादीनां सौविध्यमुपभुज्यापि संस्कृतं हित्वान्यत्र धावमानाश्छात्रा अधिकं सौविध्यमभ्यर्थयन्ति । तथैव विविधसौविध्यमुपभुज्यापि, असन्तोष एव विकासस्य लक्षणमिव मन्यमाना वयं पौनःपुण्येन सौविध्यान्तरस्याभ्यर्थनां कुर्मः। असन्तुष्टा द्विजा इव वयं नष्टाः । स्वकर्तव्याद् भग्ना वयं वाञ्छामो यत् समाजे ऽस्माकमुच्चस्थानं भवतु सर्वे संमानयन्तु सर्वकारेऽपि वयमुत्तरोत्तरं प्रतिष्ठां प्राप्नुयाम । आलस्याज्जायमाना मनोरथा निष्क्रियत्वेन विलीयन्ते । कर्तव्यनिष्ठो विद्वानेव समाजे सर्वकारे च स्वप्रतिष्ठां स्थापयितुं समर्थः स्यात् । अतो वयं ज्ञानविज्ञानयोः सर्वे विषया अस्माकं शास्त्रे विद्यन्त इति गर्वं हित्वा व्यावहारिका भवाम । समयं परिचेतुं प्रयत्नं करवाम । अस्मासु समायातामात्महीनतां मानसिकीं दुर्बलताञ्च परित्यज्यात्मानमनुशासने सदाचरणे सत्ये च प्रतिष्ठाप्य पारस्परिकं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्रोहञ्च विहाय वयं जागराम । उक्तञ्च–

उद्धरेदात्मनाऽऽत्मानं नात्मानमवसादयेत् ।

यदि सन्तोषं गृहीत्वा एकीभूय शिक्षणविधेः परिमार्जने संलग्ना भवेम तदा शिक्षाया गुणवृद्धिर्निश्चितं भविष्यत्येव, महनीयायाः संस्कृतभाषायाः सर्वसाधारणेषु प्रचाराय प्रसाराय च प्रयतितव्यम् ।

– तोयनाथपाण्डेयः

संस्कृताध्यनसंस्थानाध्यक्षः (डीनः)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विषयसूची–

क्रमसङ्ख्याः–	विषयाः–	पृष्ठानि–
१.	प्रकाशकस्य किञ्चिदावेदनम्	क
२.	सम्पादकमण्डलस्य किमपि निवेदनम्	ग
३.	आदिकवेर्वाल्मीके र्मङ्गलमयं संस्मरणम्	छ
४.	राजकीयसंस्कृतमहाविद्यालयं समुद्घाटयतः स्व. श्री ५ त्रिभुवनस्य संभाषणम्	१
५.	स्व. श्री ५ त्रिभुवनस्य संभाषणस्य मूलरूपम्	३
६.	त्रिभुवनविश्वविद्यालयस्य शुभारम्भसंस्मारकमितिवृत्तम्	५
७.	दाङ्गमण्डले विद्वत्सम्मेलनं समुद्घाटयतः स्व. श्री ५ महेन्द्रस्य सम्भाषणम्	७
८.	स्व. श्री ५ महेन्द्रस्य सम्भाषणस्य मूलरूपम्	११
९.	राजकीयसंस्कृतमहाविद्यालयस्य समुद्घाटनावसरे प्रथम-प्रधानाऽऽचार्यस्य स्व. श्रीसोमनाथसिग्द्यालस्य सम्भाषणम्	१५
१०.	प्रथमप्रधानाऽऽचार्यस्य सम्भाषणस्य मूलरूपम्	१९
११.	संस्कृतवाङ्मयसंरक्षणसंवर्धनविधौ नेपालराष्ट्रस्य योगदानम्	२३
१२.	त्रिभुवनविश्वविद्यालयसंस्कृताध्ययनसंस्थानाध्यक्षकार्यालयस्य संक्षिप्तः परिचयः	३१
१३.	नैपालकविद्वद्दलस्य भारतभ्रमणम्	३५
१४.	जनताविद्यापीठस्य परिचयः	३७
१५.	पिण्डेश्वरविद्यापीठस्य परिचयः	३९
१६.	याज्ञवल्क्यलक्ष्मीनारायणविद्यापीठस्य परिचयः	४१
१७.	वाल्मीकिविद्यापीठस्य परिचयः	४३

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

१८.	राजार्चनासमारोहः	५१
१९.	अनुसन्धानगोष्ठी	५२
२०.	नैपालकजर्मनसंस्कृतविद्वद्गोष्ठी	५३
२१.	अनुसन्धानप्रविधिगोष्ठी	५६
२२.	पौरस्त्यानुसन्धानगोष्ठी	५७
२३.	पाठ्यक्रमविषयकानुसन्धानगोष्ठी	५८
२४.	संस्कृतानुसन्धानसरणिगोष्ठी	५९
२५.	संस्कृतपरिचर्चा - कार्यक्रमः	६२
२६.	कर्मकाण्डप्रशिक्षणकार्यक्रमस्य समुद्घाटनम्	६५
२७.	महर्षिवाल्मीकेः प्रतिमाया अनावरणम्	६७
२८.	पण्डितराजसोमनाथशतवार्षिकसमारोहः	७०
२९.	शिक्षादिवससमारोहः (२०४०)	७३
३०.	वाल्मीकिविद्यापीठस्य त्रयस्त्रिंशत्तमो वार्षिकोत्सवः	७५
३१.	संस्कृतछात्राणां काश्चन विशेषताः (उपलब्धिमूलकमेकं मूल्याङ्कनम्)	७७
३२.	नारायणहिटीपाठशालासंबद्धमप्रकाशितं पत्रम्	८३
३३.	राजकीयोच्चशिक्षाऽऽयोगस्य प्रतिवेदनस्य कश्चिदंशः	८६
३४.	संस्कृतविश्वविद्यालयपूर्वाधारसंबद्धा वार्ता	८७
३५.	संस्कृतसुधारपरामर्शदात्री समितिः	८८
३६.	संस्कृताध्ययनसंस्थानस्य विद्यापरिषदः सदस्यानां नामावली	८९
३७.	संस्कृताध्ययनसंस्थानस्यानुसन्धानसमितेः सदस्यानां नामावली	९०
३८.	संस्कृताध्ययनसंस्थानस्य विषयसमितेः सदस्यानां नामावली	९१
३९.	वाल्मीकिविद्यापीठस्य शिक्षणसमितीनां नामानि सदस्याश्च	९२
४०.	सेवानिवृत्तानां स्थानान्तरगतानाञ्च प्राध्यापकानां नामानि	९६
४१.	लेखात्मकप्रवचनानां संक्षिप्तं विवरणम्	९८
४२.	विद्यावारिधिसंलग्नानां विदुषां विवरणम्	१०२
४३.	विद्यावारिधये भारतङ्गतानां शिक्षकाणां नामानि	१०४
४४.	अनुसन्धानसमित्या स्वीकृतानि – अनुसन्धानकार्याणि	१०५
४५.	अनुसन्धानसमितौ प्रस्तुतानि– अनुसन्धानकार्याणि	१०६
४६.	साम्प्रतमनुसन्धानसमित्या सञ्चाल्यमानानि–अनुसन्धानकार्याणि	१०७

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

४७. ने.प्रा.सं. वाल्मीकिविद्यापीठस्य कार्यसमितेः सदस्यानां नामानि १०८

४८. वाल्मीकिविद्यापीठे कार्यरतानां प्राशासनिकानांकर्मचारिणां
कर्मकराणाञ्च नामानि १०९

४९. रानीपोखरीसंस्कृतमाध्यमिकविद्यालये तीनधारासंस्कृतछात्रावासेच
कार्यरतानां शिक्षकाणां नामानि १११

५०. वाल्मीकिविद्यापीठस्य पुस्तकालयस्थानां पुस्तकानां विषयगताः
संख्याः ११२

५१. वाल्मीकिविद्यापीठस्यान्तःप्राङ्गणे स्थापिताया वाल्मीकेः
प्रतिमाया अभिलेखः ११३

५२. आलोकगतस्थूलाशुद्धिनिवारकं शुद्धिपत्रम् ११५

□

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशकस्य किञ्चिदावेदनम्–

राजधान्यां काष्ठमण्डपे संस्कृतस्य प्रथितमुच्चाध्ययनकेन्द्रं मन्यते वाल्मीकिविद्यापीठम् । नवीनशिक्षायाः प्रवर्तनानन्तरं संस्कृताध्ययनसंस्थाने संघटितेऽपि पाठ्यक्रमानुसन्धानादिभिरन्यैश्च कार्यजातैः संस्कृतस्य संरक्षणसंवर्धनविधौ विद्यापीठस्यास्य दृश्यते विशिष्टं योगदानम् । साम्प्रतं संस्कृतोन्नयनदिशि संस्कृतकेन्द्राणामेतादृक्षाणां मनीषिणां संस्कृतानुरागिणाञ्च कीदृशं योगदानमपेक्ष्यते, मर्मज्ञानां पुरतः किमस्ति विज्ञापनीयम् । तथाप्यप्राप्तविषयाणां लाभायैव संस्कृते समुपलब्धानां निखिलसाधनस्रोतःसम्पदां परिरक्षणे सत्प्रयोगे सत्परिणामेऽपि जागरूकतया महान् यत्नो विधेयः प्रतिभाति ।

नेपालराष्ट्रे राष्ट्राभिमानिनां सर्वेषामेव कृते तादृशमविस्मरणीयं परमगौरवास्पदीभूतञ्च संस्कृतविश्वविद्यालयस्थापनायाः क्षणं वयं सोत्सुकं प्रतीक्षमाणाः स्मः । विश्वस्मिन्नेकमात्रस्य घोषितहिन्दुराष्ट्रस्य गौरव-गरिमाधायके सांस्कृतिककर्तव्योद्बोधनसूचके एतादृशेऽस्मिन्नवसरे विविधप्रोत्साहनेन भौतिकसम्पदा च सार्धमनुशासनमूलाया राष्ट्रियशाश्वतिकमूल्यमान्यतासंरक्षणात्मिकायाश्च स्वतःस्फूर्तचेतनाया भवति संस्कृतोन्नयने परमावश्यकता । संस्कृताध्ययनकेन्द्राणां समेषां विदुषां संस्कृतजिज्ञासावतां च रचनात्मकेन स्वतोजागरितसांस्कृतिकचेतनामूलकेन कार्यकलापेन राष्ट्रेऽस्मिन् सांस्कृतिकं पुनर्जीवनमवाप्तुं वयं प्रभविष्यामः ।

अस्य संस्कृतकेन्द्रस्य नास्त्येव मुखपत्रं संस्कृते प्रकाशितम् । अत्रत्यैः प्राध्यापकैः सञ्चालितायाः शास्त्रानुसन्धानपरिषदो मुखपत्ररूपां शास्त्रानुसन्धानमूलां मर्यादानाम्नीं पत्रिकामिदं विद्यापीठं समये समये प्रकाशयति राष्ट्रभाषायाम् । यद्यपि संस्कृतशिक्षायाः स्तरवृद्धिः, अनुसन्धानात्मिकायाः प्रवृत्तेर्विकासः, राष्ट्रे सांस्कृतिकं पुनर्जागरणञ्चेति महनीयमुद्देश्यं पुरतो निधाय संस्कृतेऽनुसन्धानसामग्रीसंवलिता पत्रिकैव प्रकाशनीयाऽऽसीत् । तथापि विविधकाठिन्यपारवश्येन संस्कृते

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रारब्धं सामयिकसंकलनरूपमालोकनामक लघुप्रकाशनमिदं त्रिभुवनविश्वविद्यालयस्य रजतजयन्त्याः पावनोपलक्ष्ये विशेषकलेवरेण सह पाठकानां पुरत इत्थमुपस्थापितमस्ति। यत्र तत्र विकीर्णाः काश्चन सामग्रीः संकलय्य संपादकमण्डलेन कृतोऽप्ययं प्रयत्नः संस्कृताध्ययनसंस्थानस्य तदन्तर्गतानां विद्यापीठानां तत्सम्बद्धानाञ्च केषाञ्चन कार्याणां समष्टिरूपं कञ्चन लघुपरिचयं प्रदर्शयितुं प्रभविष्यतीति मामकीनो विश्वासः।

अस्य सामयिकसंकलनरूपप्रकाशनस्य कृते स्वकीयां सारपूर्णां सम्मतिं प्रदाय प्रोत्साहयद्भ्यो राजगुरुभ्यः श्रीजुननाथपण्डितमहोदयेभ्यः, त्रिभुवनविश्वविद्यायलस्योपकुलपतिभ्यः प्रकाशनानुमतिप्रदातृभ्यः श्रीरामचन्द्रबहादुरसिंहमहोदयेभ्यः,चित्रादिनैकविधसामग्रीजातस्य परिप्राप्तौ सप्रोत्साहनं परमसहयोगिभ्यस्त्रिभुवनविश्वविद्यालयस्य विशिष्टाधिकारिभ्यः, संस्कृताध्ययनसंस्थानाध्यक्षेभ्यः श्रीतोयनाथपाण्डेयमहाभागेभ्यश्च शतशो धन्यवादान् समुपहरामि। प्रकाशनकार्यं सम्पादयितुं रात्रिन्दिवं प्रयत्नं कुर्वतां संपादकानाम्, उपप्राध्यापकस्यः श्रीदिनेशराजपन्तमहाभागस्य च कार्यकुशलतामुत्साहपूर्णं साहाय्यञ्च स्मारं स्मारं तेभ्यो विद्वद्भ्यः शतशः साधुवादान् ज्ञापयामि। प्रशासनिकमुद्रणालये मुद्रणसौविध्योपलब्धिविधौ सहानुभूतिपुरःसरं सहयोगिने सञ्चारमन्त्रालयस्य सहसचिवाय श्रीउत्तमलालश्रेष्ठमहोदयाय कृतज्ञतां प्रदर्शयामि। सामग्रीसंकलनक्रमे सहयोगं कुर्वाणो राष्ट्रियाभिलेखालयप्रमुखः श्रीबलरामडङ्गोल महाभागोऽन्ये सहयोगिनो ऽपि यथायथं धन्यवादभाजः सन्ति।

अन्ते च लघीयानपि रचनात्मकोऽयं प्रयासः पूर्वोक्तमुद्देश्यं पूरयितुमुच्चस्तरमुखपत्रतया परिणमन् संस्कृते नवनवानां प्रकाशनादिकार्याणामुद्भावने निमित्ततामेष्यतीत्याशास्ते।

शिवहरिमरहट्टा
सहायकाध्यक्षः (सहायकडीनः)
वाल्मीकिविद्यापीठस्य
संस्कृताध्ययनसंस्थानान्तर्गतस्य।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्पादकमण्डलस्य किमपि निवेदनम्–

निगमागममर्मज्ञा मनीषिणः,

विदन्त्येव भवन्तो वृकायितस्य भौतिकवादस्य सर्वतो विसृमरेण सन्तापेन विषीदन्तीं वर्तमानां परस्थितिं राष्ट्रियां संस्कृतिञ्च । राष्ट्रराष्ट्रियतासंस्कृति-सर्वस्वानामस्माकं कृते संस्कृतेः समुद्धाराय नान्या तरी विद्यते विहाय ज्योतिर्मयं संस्कृतवाङ्मयम् । तत्र च धीवरा धीवराः संस्कृतज्ञा विद्वांस एव भवितुमर्हन्ती-त्यत्र नास्ति शङ्कालेशलवोऽपि ।

मानवीयमूल्यानां ह्रासेन सम्प्रति सर्व एव जागतिको जनो यथा वर्तते दुःखदावदहनज्वालादन्दग्धस्तथैव संस्कृतस्पन्दितायाः संस्कृतेश्च ह्रासेनास्मद्राष्ट्र-मपि नितरां विषीदति । एकतः प्रतिपलं क्षीयमाणां संस्कृतिमपरतश्च समराणु-कोलाहलत्रासत्रस्तं वर्तमानं विश्वजनीनं वातावरणं स्मारं स्मारमनादिकालतःशान्ति समाराधयतां प्रशान्तस्य सत्वशुभ्रस्य नगाधिराजस्य स्निग्धे पार्वत्यप्रकृतिसुकुमारे वक्षसि स्वेदसलिलपावितजीवनानां शान्तिप्रियराजपरम्परासंरक्षितानामस्माकं भवन्ति मानसानि मर्माहतानि ।

सम्प्रति संस्कृतिमूलतत्वसंरक्षणे ज्ञानविज्ञानदीप्तस्य तपःपूतैः साधना-सिद्धैर्महनीयाचरणैर्महर्षिभिस्तपसा साधनया प्रतिभया च संस्कृतस्य संस्कृतस्याक्षय्यः पीयूषस्यन्दी ज्ञानराशिरेवास्य राष्ट्रस्य स्वरूपं शान्तं शुद्धं प्रबुद्धं क्षपिताशेषदोषं सर्वनमस्यञ्च सम्पादयितुं शक्नोति । केवलमत्रावश्यकं प्रयोगपरिपाट्यां युगानु-कूलतया परिवर्तनम् । संस्कृतिर्न केवलं संस्कृतज्ञानां सम्पत्तिरपितु राष्ट्रस्यैव निजत्वपरिचायकं किमपि भवति लक्ष्म । अतः संस्कृतिस्रोतोभूतस्य संस्कृतस्य संवर्धनसंरक्षणोत्तरदायित्वं संस्कृतज्ञानामेवेति गतिरोधजननीं भावनां समूल-मुच्छिद्य प्रशासनस्य शासकानाञ्च मनोभावनास्वामूलचूलपरिवर्तनपुरःसरं सर्वैरेव राष्ट्रवासिभिरस्य संरक्षणे न यावद् गभीरतया चिन्त्यते तावत् संस्कृतस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गतिरवरुद्धैव भविष्यति निश्चप्रचम् । अकारणमेव संस्कृतं विरुध्यन्तः सन्ति कियन्तो जना हिन्दूराष्ट्रे नेपालेऽपि, संस्कृतविरोधिनो जनाः संस्कृतिविरोधिन इति विचार्य न यावत् प्रशासनं सावधानं भवति तावत् संस्कृतस्य विकासे भवति प्रतिपदमवरोध एव । राज्यव्यवस्थायै नियम-विनियम-विधि-विधान-निर्माणसंशोधन-कार्येषु क्रियमाणेषु हिन्दूसंस्कृतेर्मूलाधारेषु यथा न पतेत् कुठारधारा तथाऽङ्गीकरणीया प्रशासकैर्निजा विचारधारा ।

नेपलस्य प्रशासनं सम्प्रति संस्कृतसंस्कृत्योः संवर्धनदिशि सत्यां सुदृढायामिच्छायां संस्कृतशिक्षाया राष्ट्रव्यापिविस्तारकार्यक्रमस्य, संस्कृतस्नातकेभ्यः संमानितस्य विशिष्टक्षेत्रस्य, संस्कृतस्य मूर्धन्यानां विदुषां संस्मरणीयस्य संमानस्य, संस्कृतस्य रचनाधर्मिणां प्रतिभाशालिनां कृते संस्कृतप्रज्ञाप्रतिष्ठानस्य, आराष्ट्रं जनजीवने संस्कृतस्य रात्रिन्दिवं व्यापकप्रचारप्रसारविधौ संस्कृतमूलकस्य वितन्तु-(रेडियो) कार्यक्रमस्य, संस्कृतपत्रकारिताया विकासाय च राष्ट्रियस्य प्रकाशनस्य व्यवस्थां नैव कर्तुं शक्नोतीति कथयितुं वयं न शक्नुमः । परं नैव विस्मरणीयं यत् पूर्वोक्तानि कार्याण्येव सम्प्रति संस्कृतस्य विकासाय मूलकारणानि प्रभवन्ति ।

संभवतः सर्वमेतद् विचार्य प्रशासनेन संस्कृतविश्वविद्यालस्य स्थापना निकटभविष्य एव विधीयमाना वर्तत इति चर्चाऽस्ति सम्प्रति जाज्वल्यमाना । अस्यां स्थितौ नैकविधान् तर्कवितर्कान् वादविवादाँश्च विहायास्माभिरस्मिन् राष्ट्रे संस्थापयिष्यमाणस्याक्षय्यपूर्वाधारपरिकल्पनाऽनुप्राणितस्य, सर्वसाधनसम्पन्नस्य, सर्वसौविध्यसम्पूर्णस्य, युगानुकूलस्य च संस्कृतविश्वविद्यालयस्य सहर्षं स्वागतं कर्तव्यं राष्ट्रियस्वार्थदृष्ट्या, विहाय सामूहिकं वैयक्तिकं वा स्वार्थम् । अस्मिन्नवसरे समुत्थापितः कश्चिदपि विवादः संस्कृतस्यैव कृते घातको भवितुमर्हतीति नैव विस्मरणीयम् ।

त्रिभुवनविश्वविद्यालयस्य रजतजयन्त्याः पावनप्रसङ्गे प्रस्तुतमिदमालोकनामकं सामयिकप्रकाशनमस्ति समाचारसूचनापरिचयात्मकं किमपि वस्तु । संस्कृतवाङ्मय-समर्चनाविधौ संस्कृत एव चिन्तनस्य पावनः प्रसङ्ग एवास्य कापि विच्छित्तिर्वर्तते । विद्यापीठस्य संस्कृतपत्रकारितादृष्ट्या प्रारम्भिकोऽयं प्रयासः । मानवस्वभाव-सुलभा दोषा यत्ने कृतेऽपि महति भवितुमर्हन्ति । अस्मिन् प्रकाशने विद्वज्जननयन-गोचरीभूतानां दोषाणां प्राप्तायां विवरण्यां दोषपक्षस्य संशोधनीयतां वयं सादरं विनिवेदयामः । परिचयात्मकविवरणसम्पादनव्याजेनापि सुरगवी समुपासितेति भावनाऽस्मन्मानसानि सन्तर्पयति नितराम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अस्य सम्पादने प्रारब्धे सति सहायकसंस्थानाध्यक्षेण वाल्मीकिविद्यापीठ-प्रमुखेन सामग्रीसंकलने, संकलितस्य सामग्रीजातस्य व्यवस्थापने मुद्रणकार्ये च रात्रिन्दिवं सम्पादकमण्डलेन सह निजां तत्परतां प्रदर्शयता महत् साहाय्यं प्रदत्तम्, उपप्राध्यापकेन श्रीदिनेशराजपन्तमहोदयेन च सम्पादनविधौ सार्धमासं यावद् निजं बहुमूल्यं समयं समर्प्य संस्मरणीयः सहयोगो विहित इत्युभयोरेव कृते प्रकाश्यते परमा कृतज्ञता। मुद्रणविधौ च शासकीयमुद्रणालयस्य (श्री ५ को सरकारको छापाखाना) निर्देशकः श्रीनगेन्द्रप्रकाशश्रेष्ठः कर्मचारिणश्चाशुतया तत्परतयाऽऽत्मीयतया च यत् साहाय्यं प्रदर्शितवन्तस्तस्य कृते सर्व एव ते धन्यवादार्हाः सन्ति। त्रिभुवनविश्वविद्यालयीयमुद्रणालयस्य प्रमुखः सहप्रशासकः श्रीनारायणलाल-नेपाली रजतजयन्तीसम्बद्धचिन्हप्रकाशनकर्मणि यत् साहाय्यं कृतवान् तस्य कृते साधुवादमप्रदाय नैव शक्यते स्थातुम्। अस्य प्रकाशनस्य कृते त्रिभुवनविश्व-द्यालयस्थापनासम्बद्धचित्राभिलेखप्रदानेन सहयोगितां प्रदर्शयन् रजिस्ट्रार-कार्यालयान्तर्गताभिलेखमहाशाखाप्रमुखः श्रीनारायणमिश्रश्चास्ति साधुवादभाक्।

अन्ते च संस्कृतस्य प्रोज्ज्वलं युगानुकूलं च भविष्यं प्रकाशयितुं सर्वेभ्यः संस्कृतज्ञेभ्यः संस्कृतानुरागिभ्यः संबद्धाधिकारिभ्यश्च प्रबलामभिरुचि स्फूर्तमुत्साहं मूर्तिमतीं सक्रियताञ्च प्रदद्यादिति भगवती विभूतिभासुरा भारती सविनयं सश्रद्धञ्च संप्रार्थ्यते।

-ॐ-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भास्वद्वंशवतंसकीर्तिरमणीरङ्गप्रसङ्गस्वनद्-
वादित्रप्रथमध्वनिर्विजयते वल्मीकजन्मा मुनिः ।
पीत्वा यद्वदनेन्दुमण्डलगलत्काव्यामृताब्धेः किम-
प्याकल्पं कविनूतनाम्बुदमयी कादम्बिनी वर्षति ।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सरस्वती श्रुतिमहती महीयताम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राजकीयसंस्कृतमहाविद्यालयं समुद्घाटयतः
श्री ५ त्रिभुवनस्य संभाषणम्

विद्यानुरागिणः प्रेयांसो देशवासिनः !

अद्यात्र सर्वेषां सान्निध्येऽस्य संस्कृतमहाविद्यालयस्योद्घाटनावसरं लब्ध्वा मोमुद्यते नितरां मामकीनं चेतः । यद्यप्ययं नेपालशासनेन समायोजितो विद्यते संस्कृतमहाविद्यालयस्तथाऽप्यस्य समायोजने देशवासिभिः प्रजाजनैर्विहिताय सहयोगाय विशेषतः संस्कृतविद्वद्भिरभिव्यक्ताय सद्विचाराय च हृदयतो धन्यवादान् वितरामि ।

जगतीतले जागतिकैर्जनैर्विभिन्नविषयेषु या या उन्नतयः कृतास्तास्ता विद्याप्रभावभाविताः सन्तीति सर्वविदितमेवास्ति । संस्कृतस्य महत्त्वप्रतिपादनाय नेदानीमस्माकं प्रशंसाया विद्यत आवश्यकता । पुराऽस्मत्पूर्वजानामृषीणां मुनीनाञ्च समये लौकिका भाषिकाश्च निखिला व्यवहाराः संस्कृतभाषयैव सञ्चाल्यन्ते स्म । संप्रति कारणवशात् संस्कृतविद्यायाः प्रचारो मन्दतामभजत् । अस्या विद्यायाः सर्वथा लोपस्तु न भूतो न च भविष्यति, वेद-दर्शन-पुराण-नीति-धर्मशास्त्रादिविषयेषु महान्तो ग्रन्थाः संस्कृतभाषायामेव विद्यन्ते । एतदतिरिक्ता अन्ये बहवो हस्तलिखिता ग्रन्थाश्चास्माकं महाविद्यालयस्य पुस्तकालये वर्तन्त एव । इमे ग्रन्था अस्मन्मातृभूमेरद्वितीयाः संपत्स्वरूपा इति वक्तुं शक्यते । वैदेशिकानां विदुषामस्मन्मातृभूमिं प्रति वर्धमानायाः श्रद्धाया विभिन्नेषु कारणेषु दुर्लभग्रन्थसम्पत्तिर्मूलं कारणम् ।

संस्कृतमहत्त्वं संस्कृतसंबद्धा विद्वांस एव विशेषतो जानन्ति । यद्यपि बहुसंख्यका देशवासिनो न जानन्ति संस्कृतम्, तथाऽप्यस्मत्समाजे वेददर्शनादिशास्त्राणां विचाराः सत्सङ्गमाध्यमेन प्रसृताः सन्ति । अस्माकं लोकव्यवहारा रीतिस्थितयो विधयो विधानानि च न्यूनाधिकरूपेण संस्कृतशास्त्रानुसारं प्रचलितानि सन्ति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृतविद्योपार्जनक्रमे गुरुशिष्याभ्यां पालनीया नियमा नितरां प्रशंसनीयाः सन्ति। अनयोः परस्परं श्रद्धाया विश्वासस्य प्रेम्णोऽनुशासनस्य च विषये वक्तव्यं नास्ति किमप्यवशिष्टम्। राष्ट्रस्योज्ज्वलं भविष्यत् सर्वेषु शिक्षकेषु छात्रेषु च निहितमस्ति। संस्कृतभाषाया महिमा नाद्यावधि सर्वजनदृष्टिगोचरीभूतोऽस्ति तथापि पुरुषार्थोद्योगाभ्यामप्राप्तव्यं नाधिकमेव वस्तु संभवेत्। अयं महाविद्यालयोऽस्मन्मातृभूमेर्भविष्यत् प्रोज्ज्वलयितुं सर्वाधिकसहयोगी भविष्यतीति मामकीना महत्याकाङ्क्षा वर्तते।

अन्त्ये चात्र समुपस्थितेभ्यः सर्वेभ्यो जनेभ्यः साधुवादान् समर्पयतामस्माकमस्य महाविद्यालयस्य सर्वविधायाः समुन्नतेः शुभा कामना विद्यते।

जय नेपाल !

सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै
तेजस्वि नावधीतमस्तु मा विद्विषावहै।

–उपनिषद्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्री ५ त्रिभुवनस्य संभाषणस्य मूलरूपम्

प्यारा विद्याप्रेमी प्रजाहरू !

आज यहाँ सबैको बीचमा यो नेपाल राजकीय संस्कृतमहाविद्यालयको उद्‌घाटन गर्न पाउँदा मलाई अत्यन्त खुशी लागेको छ। हुनता यो सरकारतर्फबाट आयोजित गरिएको हो, तर साथसाथै दुनियाँको सहयोग तथा खास गरीकन संस्कृत विद्वान्‌हरूको विचारलाई हार्दिक धन्यवाद दिन्छु।

संसारमा कति उन्नति भइरहेको छ, यो सबै विद्याकै प्रभावले हो भन्ने कुरा विदितै छ। संस्कृतको महत्त्वको बारे मैले यहाँ प्रशंसा गरिरहनुपर्ने होइन। पहिले हाम्रा ऋषिमुनिहरूको जमानामा संस्कृतमा मात्र कामकारवाई हुन्थ्यो। तर केही कारणवश यो विद्याको प्रचार केही कम हुन आएको छ। बिलकुल लोप त हुन पाएको छैन र हुने पनि छैन। वेद, दर्शन, पुराण, नीति, धर्मशास्त्र इत्यादि सबै ठूलठूला ग्रन्थहरू संस्कृत भाषामा नै छन्। यीभन्दा भिन्न अरू धेरै हस्तलिखित पुस्तकहरू अहिलेसम्म हाम्रो कालेजको पुस्तकालयमा छँदैछन्। यो हाम्रो मातृ-भूमिको अद्वितीय सम्पत्ति मान्न सकिन्छ। अन्तर्राष्ट्रिय विद्वान्‌हरूको हाम्रो देशप्रति श्रद्धा बढेको धेरै कारणमध्ये यो एउटा मूल कारण हो। यो भाषाको महत्त्व यसमा सम्पर्क भएका विद्वान्‌हरूले मात्र विशेष थाह पाउँछन्। तर यस भाषाको योग्यता सबैलाई नभए पनि संगतद्वारा यी शास्त्रहरूको विचार हाम्रो समाजमा फिँजिएको छ। हाम्रो सबै चालचलन, रीति स्थिति ऐन कानूनसम्म पनि धेरथोर यो शास्त्रमुताबिक चलिरहेकै छन्।

संस्कृतविद्योपार्जन गर्दा शिक्षक र शिष्यका नियमहरू बडो प्रशंसनीय छन्। यिनीहरूको परस्परको श्रद्धा, विश्वास, प्रेम तथा अनुशासनविषयमा केही भन्ने कुरा छैन। देशको उज्ज्वल भविष्य सबै शिक्षक र सबै विद्यार्थीमै निर्भर छ। संस्कृत भाषाको महिमा अहिलेसम्म सर्वसाधारण जनताको पहुँचमा पुग्न सकेको

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

छैन, तर पुरुषार्थ र उद्योगले प्राप्त नहुने कुरा कमै होला । यो महाविद्यालयले हाम्रो मातृभूमिको भविष्य उज्ज्वल पार्नमा धेरै धेरै नै सहयोग गर्नेछ भन्ने मेरो ठूलो आशा छ ।

अन्त्यमा यहाँ उपस्थित भएका सबैलाई धन्यवाद दिँदै यस महाविद्यालयको सर्व उन्नतिको शुभकामना गर्छु । जय नेपाल !

(२००९ वैक्रमाब्दस्या ऽषाढस्य ३ दिवसस्य गोरखापत्रतः समुद्धृतम्)

भाग्योदयेन वहुजन्मसमर्जितेन
सत्सङ्गमञ्च लभते पुरुषो यदा वै ।
अज्ञानहेतुकृतमोहमदान्धकारं
नाशं विधाय हि तदोदयते विवेकः ॥

—श्रीमद्भागवतम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रिभुवनविश्वविद्यालयस्य शुभारम्भसंस्मारकमितिवृत्तम्

दिवङ्गतस्य श्री ५ त्रिभुवनवीरविक्रमशाहदेवस्य ज्येष्ठपट्टमहिष्या कान्ति-राज्यलक्ष्मीदेव्या द्वादशोत्तरद्विसहस्र (२०१२) तमस्य वैक्रमाब्दस्य चैत्रमासस्याष्टादशतमे दिवस अष्टसदस्यात्मकस्य त्रिभुवनविश्वविद्यालययोजनाऽऽयोगस्य संघटनार्थं घोषणा विहिता ।

घोषणापत्रस्य संस्कृतभाषायां रूपान्तरम् –

प्रेयांसो देशवासिनः !

विदितप्रायमेव सर्वेषां यस्य कस्याऽपि राष्ट्रस्य वहुमुखि-विकासाय सर्व-जनकल्याणाय च शिक्षैव भवत्यावश्यकः प्रारम्भिक आधारः । अस्माकं परमपूज्यानां दिवङ्गतानां श्री ५ महाराजाधिराजानां हृदयेऽप्यन्याभिर्विकासयोजनाभिः सहाऽयमेव विषयः प्राधान्यमलभत, किन्तु कालस्य प्रतिकूलतया परमपूज्यानां तेषां करकमलाभ्यामेतद्देशानुकूलस्य विश्वविद्यालयस्य स्थापनाया दिव्याभिलाषः पूर्णतां न गतः । परमपूज्यानां श्री ५ महाराजाधिराजानामसामयिकरूपेण सहसा स्वर्गारोहणात् तत्रभवतां समस्तानभिलाषान् पूरयितुं युष्माभिरस्माभिश्च बद्ध-परिकरैर्भाव्यम् ।

अद्य तत्रभवतां स्वर्गारोहणस्य वार्षिकपुण्यतिथौ तं दिव्यमभिलाषं साकार-यितुमावाभ्यां श्रीत्रिभुवनविश्वविद्यालयस्य स्थापना विधीयमाना वर्तत इति संश्रावयन्त्योरावयोर्मानसं परमां मुदमाप्नोति । विश्वविद्यालयसम्बद्धप्रारम्भिक-कार्यसम्पादनायाऽऽयोगः संघटितः, आयोगसदस्यानामनुरोधेन तत्साभापत्य-मस्माभिः स्वीकृतमस्ति । विश्वविद्यालयस्य कृत आवश्यक्या भुवो निर्धारणं शीघ्रमेव सम्पाद्य केषाञ्चन प्रारम्भिककार्याणां व्यवस्थया सार्धं भवनस्य शिला-न्यासोऽपि संपत्स्यते । अस्या योजनायाः कृते प्रारम्भिको व्ययभार आवाभ्यामेव वक्ष्यते । महदिदं शुभकार्यं सफलयितुमायुष्मांस्तनयः श्री ५ महेन्द्रोऽपि विशिष्टं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सहयोगं कृतवानस्ति, नेपालशासनमपि साहाय्यं करिष्यति । अथ च वयमाशास्महे विश्वसिमश्चैतादृशेषु राष्ट्रियेषु कार्येषु सर्वे देशवासिनः सहयोगिनो भविष्यन्ति । अस्माकमिदं कार्यं श्रीपशुपतिनाथः सफलयत्वित्यस्माकं हार्दिकी कामना वर्तते ।

उक्ते योजनाऽऽयोगे निम्नाङ्किताः सदस्याः सन्ति ।

(१) श्री ५ मध्यमाधिराजकुमारो हिमालयवीरविक्रमशाहः
(२) श्री ५ कनिष्ठाधिराजकुमारो वसुन्धरावीरविक्रमशाहः
(३) श्री ५ महाराजाधिराजस्य मुख्यसचिवः श्री स. हंसमानसिंहः
(४) श्रीखड्गनरसिंहराणा
(५) शिक्षाविभागस्य निर्देशकः श्रीशारदाप्रसादः
(६) प्रधानाचार्यः श्रीभैरवबहादुरप्रधानः
(७) श्रीकविर्लक्ष्मीप्रसाददेवकोटा
(८) डा. श्रीपराशरनारायणसुवालः (सचिवः)

जय मातृभूमे !

कर्मण्येवाऽधिकारस्ते मा फलेषु कदाचन ।

—श्रीमद्भगवद्गीता

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

योजनायोगपत्रञ्च निजहस्ताक्षराङ्कितम् ।
कुर्वंती दृश्यते कान्ती राजमाता गरीयसी ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दाङ्गमण्डले विद्वत्सम्मेलनं समुद्घाटयतः श्री ५ महेन्द्रस्य संभाषणम्

उपस्थितविद्वद्वर्ग, महिलास्तथा सज्जनवृन्द !

अद्य गौरवमयेतिहासेन परम्परया संस्कृत्या चोतप्रोतस्यास्माकं नेपालस्यास्मिन् भागे (राप्त्यञ्चलान्तर्गतदाङ्गस्थितजनतासंस्कृतमहाविद्यालये) संस्कृत्या सह सम्बद्धानां संस्कृतविदुषां मध्ये स्वात्मानं लब्धवतो हर्षः स्वाभाविक एव । उपस्थितानां सर्वेषामतिथीनां हार्दिकं स्वागतं करोमि ।

संसारस्य सभ्यताया इतिहासस्य विकासे संस्कृतभाषाया महत्त्वपूर्णं दायित्वमस्ति । वैदिके काले कीदृशानामुच्चादर्शानामुत्कृष्टानां भावनानां चोत्थानेनार्यसंस्कृतेः प्रवाहः प्रवहन्नागतः, अस्माकं दैनिके जीवन एव तस्य कीदृशः प्रभावः पतितोऽस्ति, प्रत्यक्षमेवास्ति । संस्कृतस्य ज्ञानं विना वयमात्मन एवाचार-विचारयोर्मर्मापि बोद्धुं न शक्नुमः । मन्ये समयस्य परिवर्तनेन भवेत्, तेनैव ज्ञानेन विनाऽस्माभिः स्वीयेषु सारवत्सु विषयेष्वपि अबोधेन श्रद्धा लघूकृतास्ते । विशेषतया चास्मदीया नेपालीया नवयुवानो युवतयश्च विषयेऽस्मिन्संन्दिह्याभ्रान्ता न सन्तीति वक्तुं विवशाः स्मः ।

पुरातनकालादेव नेपालेन संस्कृतेऽभिरुची रक्षिता बुध्यते, क्रमेण चोन्नतिरपि कृतासीत् । यदि वयमस्माकमेव शैक्षिकमितिहासं निपुणतया पश्यामस्तदापी भणितुं शक्नुमो यद्दीर्घकालपर्यन्तं नेपालस्य शिक्षापद्धतिरेव संस्कृतमयी स्थितेति । संभवतः सर्वैर्नेपालिभिः सेयं पद्धतिरङ्गीकृता स्थिता । एता वार्ता अस्मत्सविधे स्थितेभ्यः शिलापत्रेभ्यः ताम्रपत्रेभ्यः सन्धिपत्रेभ्यो ग्रन्थेभ्योऽपि प्रमाणिता भवन्ति ।

अस्माकं स्वर्गमस्तक (सगरमाथा, माउण्ट-एवरेष्ट) सदृशेन संसारे सर्वोच्चेन शिखरेण शोभितस्य हिमवत्खण्डस्य माहात्म्यमपि संस्कृत एव प्राप्यते । अथ च सतीशिरोमणेरादर्शगृहिण्याः श्रीजानक्या एव न, किन्तु विश्वशान्तेः प्रसिद्धस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पूजकस्य युवराजस्य सिद्धार्थस्य (भगवतो गौतमबुद्धस्य) अप्यस्यामेव पावनभूमौ प्रादुर्भावोऽभूत्। अस्यामेव भूम्यां वाल्मीकिना रामायणं महाकाव्यं व्यलेखि, जडभरतेन वानप्रस्थाश्रमो विहितः पुलस्त्येन ऋष्यशृङ्गेण च ऋषिणा तपस्तप्तम्। वात्स्यायनेन कामसूत्रं लिखितम्। गोरखनाथ-मत्स्येन्द्रनाथाभ्यां नाथसम्प्रदायाच्च देवभाषया महती प्रेरणा प्राप्ता। पश्चादपि प्रतिवेशिराष्ट्रेषु विदेशेषु च नष्ट-भ्रष्ट-विलुप्तानां बहूनां ग्रन्थानामत्रैव संरक्षणं जातम्। अनेके विद्वांस आगत्यात्रैवावसन्, अत्रैव च ते पुष्पिताः फलिताश्च सर्वस्यास्य विषयस्य पुष्टिरस्माकं पुस्तकालयेषु आगमागारेषु मन्दिरेषु गुहासु च स्थितैर्ग्रन्थैर्लभ्यते। प्रायो बहुषु विषयेषु अतुल्या अमूल्याश्च ग्रन्था अस्मत्सविधे हस्तलिखितरूपाः साम्प्रतमपि सन्त्येव। वार्तेयं सर्वविदितप्रायैव।

परं परिवर्तनशीलः समयः परिवर्तमान एवागतः संसारस्य विभिन्नोन्नत-राष्ट्रेषु भौतिकवादः सर्वत्र व्याप्तः, सांसारिका भोगविलासा एव मानवजीवनस्य लक्ष्यीभूता जाताः। ततश्चाध्यात्मिकवाद आवश्यकानावश्यकान्धपरम्पराभिर्मत-मतान्तरैश्च मलिनीकृतः स्वभावतो जातः। अस्माकं प्राचीनानामुपयुक्तानां च ग्रन्थानामध्ययनं पाश्चात्त्यैर्विद्वद्भिः कर्तुमारब्धम्। सारो गृहीतः, समालोचना विहिता, उपयोगश्च कृतः। पाश्चात्त्यशिक्षया सभ्यतया च शनैः रञ्जितैरस्माभिश्च तस्यामेव दिशि दृष्टिं पातयितुमारब्धम्। तैः प्रतिपादितेषु विषयेषु क्षणिकसुख-भोगस्य लालसया चक्षुषी निमील्य वयं दृढामास्थां दर्शयितुं लग्नाः, अस्माकं महत्तायाः परिचायका अद्य ते जाता इति कथने नात्युक्तिः। इतश्च संस्कृतज्ञाः शिथिलतां गताः। वयं केवलमस्माकं शास्त्रेषु एतादृशं वर्तत इति वार्तामात्रे गर्वं गृहीत्वा स्थिता व्यावहारिका न सञ्जाता रटनात्मकविद्यायामेवाधिकं प्रयतिताः समयं परिचेतुं प्रयत्नं न कृतवन्तः आवश्यकानुसन्धानदिशि दृष्टिमेव न दत्तवन्तः। इयमतिदुःखदा वार्ता, अस्याः फलस्वरूपतोऽद्यास्मासु क्रमश आत्महीनताऽऽयाता, मानसिकी दुर्बलता सञ्जाता, अनुशासनादाचरणात्सत्याच्च वयं पश्चात्पतितुमारब्धाः।

अत एवातः परं नास्माभिर्विषयेष्वेतादृशेषु लज्जा कार्या प्रत्युत जातास्त्रुटीः सुधार्य समयं परिचित्य समुचितेन ज्ञानविज्ञानयोः समन्वयेन प्राचीनेतिहासस्य परम्परायाश्चाधारशिलां स्थिरीकृत्याधुनिके व्यावहारिके कर्मणि चरित्रे च कथ-मावश्यकः सुधारो विधेयः ? अथाहमनयैव विद्वत्सम्मेलनद्वारा संसारस्य सर्वान् संस्कृतानुयायिनो लेखकान् कवीन् विदुषः पण्डितान् विशेषज्ञान् सर्वसमक्षं हृदानुरुन्धे विज्ञापयामि चाथास्मिन्विषये दृढमनुसन्धानं व्यावहारिकं कार्यान्वयनञ्च नितान्त-मावश्यकम्, अपेक्षितञ्च।

यद्यप्येतादृशेषु गहनेषु विषयेष्वधिकं वक्तुं नाहं कोऽपि विद्वान्, तथापीयं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हर्षस्य वार्तास्ति यदद्यास्माकं संस्कृतज्ञानां दृष्टिकोणेऽपि परिवर्तनं दृश्यमानमस्ति, तस्यैव फलस्वरूपतो वयमद्यात्र समवेताः। उदारतयात्मगौरवेण सार्धमवसरोचितं कृत्वाऽस्माभिरस्माकं पुस्तकालयेषु, विद्यमानानां ग्रन्थानामध्ययनेऽनुसन्धाने च निष्पक्षपद्धत्या क्रियमाणेऽस्माभिरिदमप्येकं दिनं पुनर्दृश्येत यद्विज्ञानं पाश्चात्य-सभ्यताया एव पारिवर्हं नास्तीति। अस्माकं सङ्गेऽपि लोकोत्तरा वैज्ञानिका ग्रन्थाः सन्ति, येभ्यो जीवशास्त्रे, वनस्पतिशास्त्रे, आयुर्वेदे, रसायनशास्त्रे च महान् प्रभावः पतितुं शक्नोति। वैज्ञानिकेषु संस्कृतज्ञानं संस्कृतज्ञेषु च विज्ञानाभिरुचिर्यदि न स्यात् तदाद्यास्माभिरेषा समस्या दुष्पूरा स्यात्, अत एतयोर्द्वयोः (ज्ञान-विज्ञानयोः) समन्वयोऽपेक्षितः तदैव शुद्धानुसन्धानस्य वातावरणं भावि, तत एव च संसारे ज्ञान-विज्ञानद्वारा सुखं सुविधाः शान्तिश्च भविष्यन्ति, मानवसमाजश्च प्रफुल्लः फलितश्च स्यात्।

अपरत्र दर्शनेऽप्यस्माकं नेपालस्यैकं विशिष्टं दायित्वमस्ति। विदेहदर्शनेन याज्ञवल्क्यस्मृत्या च सममेव बौद्धदर्शनस्याप्यत्रैव प्रादुर्भावोऽभवत्। परमनयोर्द्वयो-र्दर्शनयोः समुन्नतिद्वारा नेपालीयैः समन्वयवादः स्थापितः, अन्यत्रेव परस्परम-मेलनं भवितुं न दत्तम्। धार्मिकी व्यावहारिकी च सहिष्णुतैवास्माकं दर्शन-स्याधारस्तम्भायमानासीदस्ति च। 'वसुधैव कुटुम्बकम्' इतिभावनैवास्य स्रोतोऽस्ति। वयं तर्पणं कुर्मः, जडचेतनात्मक – निखिल-प्राणिमात्रस्य तृप्तिं कामयामहे, देवताः पितॄंश्च सर्वान् मन्यामहे, कस्मिन्नपि कर्मणि क्रियमाणेऽपि फलाशां त्यक्त्वा कर्तव्यं ज्ञात्वा करणमेवोत्तममित्यत्र विश्वसिमः। एता भावना एवाद्यत्व आधुनिकेषु दार्शनिकसिद्धान्तेष्वपि गम्भीरतया यदि बद्धमूला भवेयुस्तदैव विश्वस्मिन्घटमाना विघ्नबाधा अपसरिष्यन्ति। 'सर्वभूतहिते रताः' इत्यस्य सत्यं स्वरूपं द्रष्टुं लभ्येतेति वक्तुं नाहमात्मानमसमर्थं मन्ये। एवमस्मिन्नेव समन्वयवादेऽस्माकं निर्दलीया पञ्चायतप्रजातान्त्रिकव्यवस्था साम्प्रतं निर्विकल्पा व्यवस्था सम्पन्नेति वदामि।

वयं समन्वयवादे विश्वासं रक्षामः। समन्वयात्मकदर्शनद्वारैव विश्व-समस्यापूर्तिर्भवितुं शक्नोतीति धारणास्माकमास्ते। अस्माकमसंलग्ना परराष्ट्र-नीतिरपि समन्वयवाद एवाधारितास्ति एतस्मादपि कारणादस्यां दिशि साम्प्रत-मस्माभिः पादश्चालनीय इति वक्तुमहं स्वकर्तव्यं मन्ये। अध्ययनस्याध्यापनस्य चात्यावश्यकतास्ति। एतेषु सर्वेषु कार्येषु संस्कृतविदुषां महदुत्तरदायित्वमासीदस्ति भविष्यति चेत्यत्रापि नास्ति मे शङ्का।

अयं च खलु प्रमोदस्य विषयोऽस्ति यद् विशेषतः पुरातनकालादेव समये समये समापतिता अनेका विघ्नबाधा निरस्य कालस्य परिस्थितेर्जनाकाङ्क्षाया-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्चानुरूपं नेपालेन स्वस्यास्तित्वं नेपालीयैश्च स्वस्य व्यक्तित्वं संरक्षितमस्ति । अस्मिन्नपि कर्मण्यस्माकं संस्कृतेः परम्पराया वीरपूर्वजानां विदुषां च महद्दायित्वदं ।तिद्स्म च विश्वस्य सर्वैर्विद्वद्भिर्विदितमेवास्ति ।

अथैकमात्रहिन्दूराष्ट्रे नेपाले संस्कृतविश्वविद्यालयस्यात्यावश्यकतास्माभिः सर्वैर्नेपालीयैर्विशेषतया च नेपालीयैर्विद्वद्भिरननुभूता नास्ति, परं कदा कथं चैष सम्भवति, कीदृशरूपे परिणाम्यमानो देशोचितो भविष्यति, किं कृत्वा चाधुनिकपद्धत्यास्माकं विद्वत्तायाः परम्परा स्थायिनी भवतीत्यत्र विषयेऽत्रोपस्थितैर्विद्वद्भिरारब्धस्य विचारविनिमयस्याहं हृदा सहर्षं स्वागतं करोमि, तथेतदपि वक्तुमभिलष्यामि यदतः परमस्माभिः कैरपि नेत्रे निमील्यान्धविश्वासतो विना कारणं कुत्रापि विषये क्रियमाणमन्धानुकरणं नेपालीयसमाजस्य कृते न शोभते । विश्वविद्यालयपर्यन्तेन प्रत्येकशिक्षालयेन तादृशः कार्यक्रमः प्रस्तोतव्यो यत्ततः शिक्षालयाद् विश्वविद्यालयाद् विनिर्गतः कोऽपि नेपालीयः स्नातकः सर्वप्रथममनुशासितश्चरित्रवानाधुनिकश्च सम्पन्नः परानपि तथा निर्मातुं शक्नुयात् । अत्र नान्यस्तर्को भवितुं शक्नोति । इदमपि साम्प्रतमत्र वक्तुं वाञ्छामि ।

अस्मिन्नेव प्रसङ्गे मण्डलस्यास्य जनतायाः सविधेऽपि पुनरेकवारमागत्येत्थं मिलितुं प्राप्ततया नितरां प्रीतोऽस्मि । अद्यास्माकं देशस्य सफलता समस्या च कस्मादपि नेपालिनस्तिरोहिता नास्ति, अत एव चास्मिन्विषयेऽधिकं वक्तुमावश्यकतां न पश्यामि । मयापि च स्वाभिप्रेताः सर्वे भावा जनसमक्षं समुपस्थापिता एवेत्यतः परं प्रत्येकनेपालीयसविध इदमेव वक्तुमभिलष्यामि यन्मया यथासमयमुपस्थापितानां विचाराणां कुशले कार्यान्वयन एव प्रत्येकनेपालिनां ध्यानं गते यथापूर्वमहं सर्वेषां कृतज्ञो भविष्यामि । अस्माभिः सर्वैर्नेपालीयैर्यथा गुरुतरकार्यस्यारम्भः क्रियते तथैव तस्य पूर्णतां विधातुमपि शक्तैर्भवितव्यम् ।

अन्ते चोपस्थितस्य सर्वस्य विद्वद्वर्गस्योपर्युल्लिखितविषये पुनरेकवारं ध्यानमाकृष्य सम्मेलनस्यास्य साफल्यकामनया सार्धं समारोहस्यास्य सम्बद्धेभ्यः सर्वेभ्यो हार्दिकं धन्यवादं ज्ञापयामि ।

जय नेपाल !

(२०२६ वैक्रमाब्दे प्रकाशितस्य संस्कृतविश्वविद्यालयस्य प्रतिवेदनस्य ९०–९५ पृष्ठेभ्यः समुद्धृतम्)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राष्ट्रपितुः पितुः स्वस्य प्रतिमां श्रद्धया सह ।
कुर्वन्ननावृतां भूपो महेन्द्रो द्योतते पुरः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्री ५ महेन्द्रस्य संभाषणस्य मूलरूपम्

उपस्थित विद्वद्वर्ग, महिला तथा सज्जनवृन्द !

आज गौरवमय इतिहास, परम्परा र संस्कृतिले ओत-प्रोत भएको हाम्रो नेपालको यस भागमा संस्कृतिसँग सम्बन्ध भएको संस्कृतका विद्वान्हरूको बीच आफूलाई पाउँदा हर्ष लाग्नु स्वाभाविकै हो र उपस्थित सबै अतिथिवर्गको हार्दिक स्वागत गर्दछु । संसारको सभ्यताको इतिहासको विकासमा संस्कृतको महत्त्वपूर्ण देन छ । वैदिक कालमा कस्ता उच्च आदर्शहरू उत्कृष्ट भावनाहरूको उठान भएर आर्य संस्कृतिको प्रवाह बग्दै आयो, हाम्रो दैनिक जीवनमा नै त्यसको कस्तो प्रभाव परेको छ, प्रत्यक्ष छ। संस्कृतको ज्ञान नभई हामीले आफ्नै आचार-विचारको मर्म पनि बुझ्न सक्तैनौं । शायद समयको परिवर्तनले गर्दा होला, त्यही ज्ञान नभएर हामीले हाम्रा गहकिला कुराहरूमा पनि नबुझेर श्रद्धा घटाउँदै लगेका छौं र खास गरी हाम्रा नेपाली नवयुवक-युवतीहरू यस विषयमा दुबिधामा परी नअल्मलिएका छैनन् भन्न करै लाग्दछ ।

पुरातन कालदेखि नै नेपालले संस्कृतमा दिलचस्पी लिएको बुझिन्छ र तरक्की पनि गर्दै गएको हो । हामीले हाम्रै शैक्षिक इतिहासलाई नियालेर हेर्‍यौं भने पनि यो भन्न सक्दछौं कि धेरै कालसम्म नेपालको शिक्षा-पद्धति नै संस्कृतमय थियो । शायद सबै नेपालीले यसलाई अँगालेका थिए । यी कुरा हामीसँग भएका शिलापत्र, ताम्रपत्र, सन्धिपत्र र ग्रन्थहरूबाट पनि प्रमाणित हुन्छन् ।

हाम्रो सगरमाथा जस्तो संसारको सबभन्दा अग्लो चुचुरो भएको हिमवत्खण्डको माहात्म्य पनि संस्कृतमा नै पाइन्छ । हुन पनि सतीशिरोमणि तथा आदर्शगृहिणी श्रीजानकीजीको मात्र होइन, विश्वशान्तिका प्रसिद्ध पुजारी युवराज सिद्धार्थ (भगवान् गौतमबुद्ध) को पनि यही पावनभूमिमा प्रादुर्भाव भयो । यही भूमिमा वाल्मीकिले रामायण महाकाव्य लेखे, जडभरतले वानप्रस्थाश्रम बनाए,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुलस्त्य र ऋष्यशृङ्ग ऋषिले तपस्या गरे। वात्स्यायनले कामसूत्र लेखे। गोरखनाथ, मछेन्द्रनाथबाट र नाथसम्प्रदायबाट पनि देवभाषालाई ठूलो प्रेरणा मिल्यो। पछि पनि छिमेकी राष्ट्रहरू तथा विदेशमा नष्ट-भ्रष्ट भएर गएका कैयन् ग्रन्थहरूको यहीं नै संरक्षण भयो। कैयन् विद्वान्हरू आएर यहीँ बसे, यहीँ फूले-फले। यी सब कुराको पुष्टि हाम्रा पुस्तकालय, आगम, मन्दिर गुम्वाहरूमा रहेका ग्रन्थहरूबाट मिल्दछ। धेरैंजसो विषयमा एक-से-एक अमूल्य ग्रन्थहरू हामीकहाँ हस्तलिखित रूपमा अद्यावधि छँदैछन्। यो सबैलाई जानकारी भएकै कुरा हो।

तर समय परिवर्तनशील छ र समयले पल्टा खाँदै आयो। संसारका विभिन्न उन्नत राष्ट्रहरूमा भौतिकवाद जतासुकै व्याप्त हुन थाल्यो, सांसारिक भोग-विलास नै मानव-जीवनको लक्ष्य बन्दै आयो। अनि आध्यात्मिकवादलाई चाहिँदो नचाहिँदो बुढी रूढी र मतमतान्तरले धमिल्याउनु प्रायः स्वाभाविकै भयो। हाम्रो प्राचीन र उपयुक्त ग्रन्थ-हरूको अध्ययन पश्चिमी विद्वान्हरूले गर्न थाले, सार निकाले, आलोचना गरे र फाइदा पनि उठाए। पश्चिमी शिक्षा र चालचलनमा बिस्तारै रंगिएका हामीहरूले पनि उतैतिर आँखा लगाउन लाग्यौँ। उनीहरूले प्रतिपादन गरेका विषयहरूमा क्षणिक सुखभोगको लालसाले आँखा चिम्लेर बढ्ता आस्था देखाउन लाग्यौँ र हाम्रो महत्ता चिनाउने आज उनीहरू भए भन्न कुनै अत्युक्ति हुँदैन र यतातिर संस्कृतज्ञहरू सेलाउँदै गए। हामी खालि हाम्रो शास्त्रमा यस्तो छ भन्ने कुरामा मात्र गर्व लिन लाग्यौँ र व्यावहारिक हुन सकेनौं। रटन्ते विद्यामा मात्र ज्यादा जोड दिन लाग्यौं। समयलाई चिन्ने कोशिश गरेनौं, आवश्यक अनुसन्धानपट्टि दृष्टिनै दिएनौं। यो ज्यादै दुःखको कुरा छ, यसको फलस्वरूप आज हामीहरूमा क्रमशः आत्महीनता आयो, मानसिक दुर्बलता हुन लाग्यो, अनुशासन, आचरण र सच्चाइबाट हामी पछि पर्न थाल्यौं। यसैले अब हामीले यस्ता कुरामा लाज मान्नु हुँदैन, बरु भएका भूलहरू सुधारेर समयलाई चिन्ने र सुहाउँदो ज्ञान र विज्ञानको समन्वयले प्राचीन इतिहास र परम्पराको जग न खलबल्याई, तर आधुनिक व्याव-हारिक कर्म र चरित्रमा कसरी आवश्यक सुधार गर्नुपर्दछ, आज म यसै विद्वत् सम्मेलनद्वारा संसारका सम्पूर्ण संस्कृतका अनुयायी, लेखक, कवि, विद्वान्, पण्डित, विशेषज्ञ सबैछेउ हार्दिक अनुरोध गर्दछु, अपील गर्दछु कि अब यस कुरामा ठोस अनुसन्धान र व्यावहारिक कार्यान्वियन हुनु नितान्त आवश्यक भएको छ, हुनुपर्दछ।

हुनत यस्ता गहन विषयमा बढ्ता कुरा गर्नु म कुनै विद्वान् होइन, तैपनि यो खुसीको कुरा छ कि आज हाम्रा संस्कृतज्ञहरूको दृष्टिकोणमा पनि परिवर्तन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



उद्घाटनस्य वेलायां श्रीपितुः स्मृतिसद्मनः ।
सराजपरिवारोऽसौ श्रीमहेन्द्रो विराजते ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देखिन लागेको छ र त्यसकै फलस्वरूप हामी आज यहाँ जम्मा भएका छौं, उदारता र आत्मगौरवका साथ समय सुहाउँदो गरी हामीले हाम्रा पुस्तकालयहरूमा भएका ग्रन्थहरूको अध्ययन र अनुसन्धान निष्पक्ष ढङ्गले गर्दै गयौं भने हामीले **यो** पनि फेरि एक दिन देख्नेछौं कि विज्ञान पश्चिमी सभ्यताको मात्र पेवा होइन। हामी–संग पनि एकसेएक वैज्ञानिक ग्रन्थहरू छन्, जसबाट जीव–शास्त्र, वनस्पति–शास्त्र, आयुर्वेद र रसायनशास्त्रमा ठूलो असर पर्न सक्दछ। विज्ञानज्ञाताहरूलाई संस्कृतको ज्ञान भएन र संस्कृतज्ञहरूलाई विज्ञानमा अभिरुचि भएन भने अब हामीले यो समस्या हल गर्न सक्दैनौं र यी दुवैको समन्वय हुनुपर्दछ। अनि मात्र शुद्ध अनुसन्धानको वातावरण बन्दछ र अनि मात्र संसारमा ज्ञान र विज्ञानद्वारा सुख, सुविधा र शान्ति हुने छ, मानव–समाज फल्नेछ, फुल्नेछ।

अर्कोतिर दर्शनमा पनि हाम्रो नेपालको एउटा विशेष देन छ। विदेह-दर्शन याज्ञवल्क्यस्मृतिका साथसाथै बौद्धदर्शनको पनि यहाँ प्रादुर्भाव भयो, परन्तु यी दुवै दर्शनको समुन्नतिबाट नेपालीहरूले समन्वयवाद निकाले, अन्यत्र झैं आपसमा अमेल हुन दिएनन्। धार्मिक तथा व्यावहारिक सहिष्णुता नै हाम्रो दर्शनको आधारस्तम्भ भयो र हो। 'वसुधैव कुटुम्बकम्'को भावना नै यसको स्रोत हो। हामी तर्पण गर्दछौं, जड चेतन सबै प्राणीमात्रको तृप्तिको कामना गर्दछौं, देवता पितृ सबैलाई मान्छौं, कुनै कर्म गर्दा पनि फलको आशा नराखेर कर्तव्य संझेर गर्नु नै उत्तम हो भन्ने कुरामा विश्वास राख्दछौं। यी भावनाहरूले नै आजको आधुनिक दार्शनिक सिद्धान्तहरूमा पनि गहिरिएर जरो हाल्न सके विश्वमा भइरहेका विघ्नबाधाहरू पन्छिन्थे र "सर्वभूतहिते रताः" को सच्चा स्वरूप देख्न पाइन्थ्यो भन्न म असमर्थ ठान्दिन तथा यही समन्वयवादमा नै हाम्रो निर्दलीय पञ्चायती प्रजातान्त्रिक व्यवस्था आज निर्विकल्प व्यवस्था हुन आएको छ भन्दछु।

हामी समन्वयवादमा विश्वास राख्दछौं। समन्वयात्मक दर्शनद्वारा नै विश्वसमस्या हल हुन सक्तछ भन्ने हाम्रो धारणा छ। हाम्रो असंलग्न परराष्ट्र-नीति पनि यसैमा आधारित छ। त्यसैले पनि यसतर्फ आज हामीले पाइला चाल्नुपरेको छ भन्नु म आफ्नो कर्तव्य ठान्दछु, अध्ययन, अनुसन्धान र अध्या-पनको दरकार परेको छ। यी सबै कार्यमा संस्कृतका विद्वान्हरूको ठूलो उत्तर-दायित्व थियो, छ र हुन्छ भन्ने कुरामा पनि मलाई शङ्का छैन।

यो खुशीको कुरा छ–विशेष रूपले परापूर्व कालदेखि नै बखतबखतमा आइपरेका अनेक विघ्नबाधालाई पन्छाई काल, परिस्थिति र जनआकांक्षाअनु-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रूप नेपालले आफ्नो अस्तित्व र नेपालीले आफ्नो व्यक्तित्वलाई बचाई आएको छ । यस कार्यमा पनि हाम्रो संस्कृति परम्परा र हाम्रा वीर पूर्वज तथा विद्वान्-हरूको ठूलो देन छ । यो पनि संसारका सबै विद्वान्बाट छिपेको कुरा होइन ।

आज एकमात्र हिन्दूराष्ट्र नेपालमा संस्कृत विश्वविद्यालयको खाँचोको हामी नेपाली सबै र खास गरी नेपाली विद्वान्हरूबाट महसूस नगरेका होइनौं, तर यो कैले सम्भव हुन सक्छ, कस्तो साँचोमा ढाले देश सुहाउँदो हुन सक्ला, के गरेर आधुनिक ढङ्गले हाम्रो विद्वत्ताको परम्परा कायम रहन्छ भन्ने कुरामा यहां उपस्थित विद्वान्हरूबाट यो छलफल हुन लागेको छ, त्यसको म सहर्ष र सहृदय स्वागत गर्दछु, तथा यो पनि भन्न चाहन्छु कि अब हामी कसैले पनि आँखा चिम्लेर अन्धविश्वासमा विना कारण कुनै कुरामा पछि लाग्नु नेपाली समाजलाई शोभा दिंदैन र जुनसुकै शिक्षालय तथा विश्वविद्यालयसम्मले पनि त्यस्तो कार्यक्रम तयार पार्नु पर्दछ कि त्यस शिक्षालय वा विश्वविद्यालयबाट निक्लेको कुनै पनि नेपाली विद्यार्थी सर्वप्रथम अनुशासित, चरित्रवान् र आधुनिक नेपाली हुन सकोस् बन्न र बनाउन सकोस् यसमा अर्को कुनै तर्क हुन सक्तैन, यो पनि म आज यहाँ भन्न चाहन्छु ।

यसै सिलसिलामा, यस जिल्लाका जनताछेउ पनि फेरि एकपल्ट आई यसरी भेटघाट गर्न पाएकोमा म ज्यादै खुशी छु । आज हाम्रो देशको सफलता र समस्या पनि कुनै नेपालीबाट छिप्न गएको छैन र त्यसैले यस विषयमा बढी बोलिरहनु पर्ने दर्कार देख्दिन । मैले पनि मलाई लागेको प्रायः सबै जसो कुराहरू जन-समक्ष पोखी सकेकैले अब प्रत्येक नेपालीछेउ यही मात्र भन्न चाहन्छु कि कुनै पनि नेपालीबाट मैले बखतबखतमा जनसमक्ष राखेका कुराको कुशल कार्यान्वयनमा मात्र ध्यान पुगे म सधैंको झैं सबैसंग कृतज्ञ हुनेछु । हामी सम्पूर्ण नेपालीले जसरी गहकिला कुराहरूको शुरुआत गर्दछौं त्यसैगरी त्यसलाई पूरा गर्न पनि सक्नुपरेको छ ।

अन्तमा उपस्थित सबै विद्वान्वर्गमा माथिका कुराको फेरि एकपल्ट सम्झना दिलाउँदै यस सम्मेलनको सफलताको कामनाका साथै यस समारोहसम्बन्धित सबैलाई हार्दिक धन्यवाद ज्ञापन गर्दछु ।

जय नेपाल ।

दाङ

२०२४ चैत्र १ गते बृहस्पतिवार

(२०२६ वैक्रमाब्दे प्रकाशितस्य संस्कृतविश्वविद्यालयस्य प्रतिवेदनस्य २७–३२ पृष्ठेभ्यः समुद्धृतम्)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



राष्ट्रगौरवमर्मज्ञो धर्मसंस्कृतिसादरः ।
~~भाषन्~~ द्वितीयदीक्षान्ते श्रीमहेन्द्रो महीयते ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राजकीयसंस्कृतमहाविद्यालयस्य समुद्घाटनावसरे प्रथम-प्रधानाचार्यस्य श्रीसोमनाथसिग्द्यालस्य सम्भाषणम्

अतिप्राचीनसमयादविच्छिन्नप्रवाहेण प्रचलिता विद्योतते संस्कृतभाषा। विश्वस्मिन् यावत्यो वर्तन्त आर्यभाषास्तासु सर्वत्र संस्कृतभाषाया न्यूनाधिकः प्रभाव उपलभ्यते। संस्कृतभाषायां मूलधातुभ्यो जायमाना अनेकार्थाः प्रत्ययाः सहस्रशः शब्दान् निर्माय संस्कृतवाङ्मयं संवर्धयन्ति। तेषु शब्देषु विभिन्न-पदसंयोजनपुरःसरं विधीयमाना समासप्रक्रिया साध्वर्थबोधकनवीनशब्दसंरचनायां सक्षमा भवति। अत एव संस्कृते शब्दानामक्षय्यकोषस्य विद्यमानतया संस्कृतं भावाभिव्यक्तये कदापि नान्याश्रितं भवितुमर्हति, शब्दविशेषादेव भाषिकं सर्वं व्यवहारं साधुतया संपादयितुञ्च शक्नोति। संपूर्णानां भारतीय-भाषाणां प्राणदायिनी वर्तते संस्कृतभाषा। अस्या एव ताश्च भाषास्तत्सम तद्भवरूपेण निःसृता। ताभिः सर्वाभिर्भाषाभिः स्वकीयमसामर्थ्यं पूरयितुमस्या एवाश्रयणात् तासामपूर्णान् शब्दकोषान् संभर्तुं सदा सक्षमायाः संस्कृतभाषाया निरतिशयामुदारतां को न जानाति? हिन्दी–मराठी–वंगाली–गुजरात्यादिभारतीयभाषासु सुप्रतिष्ठितासु, अस्मन्मातृभाषायां नेपाल्याञ्च संस्कृतस्य सहस्राधिकाः शब्दा एकाकारतया संमिलिताः सन्ति। आधुनिके व्यवहारे तु नवनवाः संस्कृतशब्दा दिनानुदिनं प्रविशन्तः सन्तीति संस्कृतस्य बोधेऽन्यासां भाषाणां बोधः सरलतया भवितुमर्हति। अन्यासु भाषासु कालचक्रपरिवर्तनक्रमेण बहुशः स्वरूपगतं परिवर्तनं जायमानं दृश्यते। किन्तु संस्कृतभाषातिप्राचीन-कालाज्जातप्रचारा व्याकरणादिनियमवद्धा निजं नाम सार्थं संपादयन्ती पर-सहस्रसंवत्सरेषु व्यतीतेष्वपि न परिवर्तिता। तस्याः शब्दा निजे पुरातने स्वरूपे प्रकाशमानाश्चिरकालपर्यन्तं स्थास्यन्ति। अत एव प्राचीनानां संस्कृताभिलेखानां ग्रन्थानाञ्च भावार्थपरिज्ञानाय न किमपि विद्यते काठिन्यम्। तस्मादेव हेतो-श्चिरस्थायिषु शिलालेखेषु प्रायशः संस्कृतभाषायाः प्रयोगस्यैव प्रचलनमस्ति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृतस्य प्रचारो न केवलं भारतवर्षे जावासुमात्रादिष्वपि पुरातने काल आसीत् । तेषां देशानामैतिहासिकाध्ययनानन्तरं संस्कृतस्य प्रभावो न केवलं तत्र तत्र, अपितु तद्दूरवर्तिषु क्षेत्रेष्वप्यासीदित्यवगम्यते । यूरोपमहादेशस्य प्राचीनासु मूलभाषासु संस्कृतशब्दानां प्रतिच्छायोपलभ्यते, आधुनिकभाषासु विशेषरूपेण। संस्कृतभाषाया विशिष्टग्रन्थानां तिब्वतीभाषायां चीनियाभाषायां च जाता अनुवादा उपलभ्यन्ते। यूरोपजगत्यपि संस्कृतस्य कृतेऽनल्प आदरो दृश्यते। अत एव संस्कृतभाषा प्राचीना विश्वभाषाऽस्तीति वक्तुं शक्यते । संस्कृतभाषा न केवलं धर्मसम्वन्धिनी, अपित्वियं व्यवहारोन्मुखी, अध्यात्मतत्त्वोपदेशिनी च भाषा विद्यते । अतिगभीरानपि विषयान् सरलतया प्रतिपादनेऽस्याः प्रवलसामर्थ्यादेव प्राचीनकालेऽर्वाचीनकाले च धार्मिका आध्यात्मिका ऐतिहासिका व्यावहारिकाः सामाजिकाश्च लौकिकालौकिकविषयग्रन्थाः संस्कृत एवोपनिवद्धाः । विश्वसाहित्येषु सर्वप्रथमं साहित्यं वैदिकसाहित्यमस्तीत्यत्र पौरस्त्य–पाश्चात्य विदुषां नास्ति वैमत्यम्। एतद्वैदिकसाहित्यमपि संस्कृतभाषायामेव विद्यते।

संस्कृते, श्रुतिस्मृतिपुराणाद्या धार्मिकाः, रामायणमहाभारतादय ऐतिहासिकाः, चरकसुश्रुतादयो वैद्यकविषयाः, कौटल्य–वार्हस्पत्यादयो नैतिकाः, गर्ग–भारद्वाजप्रभृतयो ज्यौतिषविषयकाः, सदाचार–शिल्प–वास्तुकला–काव्यनाटकादिविषया ग्रन्थाश्चात्यधिकतया निर्मिताः सन्ति । अध्यात्मविषये तु नैकविधशाखाप्रशाखारूपतयाऽनेकानि दर्शनानि प्रादुर्भूतानि । समयप्रभावेण संस्कृतस्यानेके प्राचीना ग्रन्था विलुप्ता विनष्टाश्च जाताः, तथाऽप्यवशिष्टोऽपि ग्रन्थराशिर्महानेव वर्तते ।

संस्कृतविद्या सर्वाङ्गपूर्णा विद्यते। निजेन गौरवगरिम्णा विश्वं विमोह्यानया चिरकालव्यापिनी प्रतिष्ठा समर्जितेति विषये विवेचकविदुषामुक्तयो लेखाः, इतिहासाः, यत्रतत्रोपलब्धाः शिलालेखाश्च सन्ति प्रमाणानि । परन्तु समयवशाद् जागतिकपरिस्थितिपरिवर्तनात् पाश्चात्यभाषागतसंमोहकचमत्कारविशेषेण संस्कृतविद्याया व्यापकतायां शैथिल्यमापतितमित्यनुभूयते ।

अस्माभिरार्यैरियं संस्कृतविद्या न कदापि समुपेक्षणीया। यतो हि, अस्या एवाधारेऽस्माकं चिरन्तनी संस्कृतिरुपजीवति । संस्कृतस्य रक्षयैव संस्कृतिः सुरक्षिता भवति, जातीयं गौरवञ्च भवति संरक्षितम् । संस्कृतस्य विस्मृतिरात्मविस्मृतिकारिणी भवितुमर्हति । वर्तमानभारतस्य महापुरुषा अपि संस्कृतगौरवमनुसन्धाय संस्कृतशिक्षायाः संवर्धने संस्कृतशिक्षापद्धतेश्च यथोचितसंशोधनकर्मणि प्रयतमाना विद्यन्ते । नवीनं भारतीयसंविधानं संस्कृतभाषायामनूद्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वैधानिके शब्दकोषे चाधिकाधिकतया संस्कृतशब्दान् प्रयुज्य पाश्चात्यभाषोन्मुखीं जनसमूहदृष्टिञ्च संस्कृतोन्मुखीं विधाय हिन्दीभाषाया उन्नतये संलग्ना विद्यन्ते । न केवलं भारतीयैरिदं संस्कृतं संमानितमपितु, उस्मानियाविश्वविद्यालये, अफगानविश्वविद्यालये च संस्कृतभाषाशिक्षणमनिवार्यतया विधीयत इति श्रूयते । ईरानदेशे च संस्कृतशिक्षणाय भारतीया विद्वांस आहूताः, रूसदेशे च रामायण-महाभारतयोरनुवादकार्यं जायमानं वर्तते । यूरोपमहादेशे तु पूर्वकालादेव विश्वविद्यालयेषु संस्कृतशिक्षा प्रचलन्ती वर्तते । अस्माकं नेपालः प्राचीनकालादेव निजायां संस्कृतौ समाश्रितः स्वतन्त्रो देशो वर्तते । अत्र स्वसंस्कृतेः परमाधारस्य संस्कृतस्य प्रचारोऽतिप्राचीनकालादेवासीदिति प्राचीनैः शिलालेखैर्विद्वन्निर्मितै-र्ग्रन्थैर्लेखैश्च ज्ञायते स्पष्टतया । सर्वेषां विषयाणां मर्मज्ञा विद्वांसोऽस्मिन् राष्ट्रे ख्यातनामानो जाताः । ते च देशदेशान्तरं गत्वा संस्कृतवाङ्मयमध्याप्य राष्ट्रस्य ज्ञानकोषं वर्धयन्तः सन्ति । ज्ञानार्जनाय स्वल्पजनानां दूरदेशगमना-पेक्षयाऽत्रैवोच्चविद्यालयस्य स्थापनं कृत्वा, उच्चशिक्षायाः संवर्धनेन बहून् जनान् विदुषो विधाय देशस्योन्नतिर्विधेयेत्यावश्यकं ध्येयं वर्तते ।

वर्तमानैः श्रीपञ्चकयुतैर्महाराजाधिराजैर्निजानि सुखदुःखानि विस्मृत्य निजं राष्ट्रं सुखसंपन्नं समृद्धं सुशिक्षितञ्च संपादयितुं परमकर्तव्यभावनया महान् प्रयासः कृतः, त्यागशक्त्या विवेकशक्त्या च राष्ट्रे प्रजातन्त्रात्मिका शासनपद्धतिश्च समुपस्थापिता । राष्ट्रस्यास्मिन् नवीने प्रभाते ज्ञानविज्ञानयोरालोकं विस्तार्य यथा सर्व एव राष्ट्रवासिनः सुशिक्षिता भवेयुस्तथा सर्वप्रथमं कर्तव्यभावनया विधेयम्। अनयैव दृष्ट्येदानीं यत्र तत्र विद्यालय–महाविद्यालयाः स्थाप्यमानाःसन्ति । इत्थं राष्ट्रे शिक्षायाः प्रचारस्येदं कार्यं राष्ट्रस्य चक्षुषोरुन्मीलने महदुपकरणं भवति । अनेन शिक्षाविस्तारेण सह निजसंस्कृतेर्मुख्याधारायाः संस्कृतविद्यायाः समुन्नयनमपि परमं कर्तव्यं वर्तते ।

संस्कृतं नाम द्रढयति राष्ट्रभक्तिम्, प्रक्षाल्यान्तःकरणमध्यात्ममाध्यमेन विरचयति शान्तिमयं वातावरणम्, सरलयति जीवनव्यवहारम्, विकासयति सदाचारं व्यक्तित्वञ्च, प्रकाशयति सत्यमार्गम्, प्रवृत्ति–निवृत्तिमाध्यमेनानन्दयति परलोकमिहलोकञ्च । ईदृशपरमपावनोद्देश्यानुप्राणितायां संस्कृतविद्यायां श्रद्धा-भावेनेदानीं राजधान्यां संस्कृतमहाविद्यालयस्य समुद्घाटनं परममोदस्य परम-कल्याणस्य च विषयो वर्तते । परमनेनैव महाविद्यालयेन संस्कृतविषय इतिकर्तव्यता न सिद्धयति, अपि त्वनेनैव प्रकारेण पर्वतप्रदेशेषु तराईक्षेत्रेषु राष्ट्रस्य कोणे प्रकोणे चेदृशानि संस्कृतशिक्षाकेन्द्राणि स्थापयित्वा यत्र तत्रोच्चशिक्षा-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शाखाप्रशाखारूपेण माध्यमिकानां प्राथमिकानां च विद्यालयानां विस्तारपूर्वक-मामेचीमहाकालीपर्यन्तं जनजीवने निजसंस्कृतिं प्रति स्वाभिमानमुत्पाद्य तत्प्रभावेण दूरदूरतरस्था देशा अपि यथा प्रभाविता भवेयुस्तथा प्रयासो विधेयः। संस्कृत-शिक्षापद्धतौ सामयिकं परिवर्तनं लक्ष्यीकृत्य पर्याप्तं संशोधनमावश्यकमित्यत्रापि प्रथमं विचारणीयम्, न केवलं प्राचीनतयैव व्यवहारः प्रोज्ज्वलो भवति, व्यवहारस्य साधुत्वसंपादनायाऽऽधुनिकताया अपि समावेशो भवत्यावश्यकः। संस्कृतशिक्षा-पद्धतिं देशकालसमाजव्यवहारोपयोगिनीं संपादयितुं प्रथमं प्रयासोऽनिवार्यो भवति। अनेनैव दृष्टिकोणेन भारतस्य काशीसंस्कृतमहाविद्यालयेऽपि पाठचक्रम-परिवर्तनपूर्वकं संस्कृतग्रन्थैः सह भूगोलेतिहास–नागरिकशास्त्र–अर्थशास्त्र-राजशास्त्र–गणित–विज्ञान–हिन्दी–आङ्ग्लभाषादिविषयान्तराण्यपि कानिचिद-निवार्यरूपेण कान्यपि वैकल्पिकरूपेण कानि चैच्छिकरूपेण समाविश्य तत्र चावश्यकतानुसारमौद्योगिकान् विषयानपि विनिवेश्याभिनवा पद्धतिरुप-स्थापिता वर्तते। अस्माभिरपि तदनुरूपतया संस्कृतशिक्षां संचालयितुं तत्र संबन्धं विधाय वाराणसेयराजकीयसंस्कृतमहाविद्यालयस्य परीक्षाकेन्द्रं नेपाले सञ्चालयितुं स्वीकृतिं लब्ध्वा तदनुरूपा च पाठचक्रमप्रणाली प्रवर्तिता। उपर्युक्त-सरण्या संस्कृतशिक्षायां मूलविषयत्वेन संस्कृतस्य प्राधान्ये, आङ्ग्लशिक्षायां मूल-विषयत्वेनाऽऽङ्ग्लभाषाप्राधान्येऽप्यन्येषां साधारणादिविषयाणां समानरूपेण बोधो भवति। अत एत्रोभयपक्षीया योग्यता समानकक्षीया भवति। आङ्ग्ल-भाषा-शिक्षिता इव संस्कृतशिक्षिता अपि सर्वकर्मकुशला भवन्ति। अनेनैव हेतुना भारतस्योत्तरप्रदेशशासनेन म्याट्रिक- पूर्वमध्यमयोः, आइ. ए.- उत्तरमध्यमयोः-बी. ए.– शास्त्रिणोः, एम्. ए.– आचार्ययोश्च समकक्षतायाः समानाधिकारस्य, परस्परविनिमयाधिकारस्य च सौविध्यं प्रदायाऽऽधिकारिकी सूचना प्रसारिताऽस्ति। तदनुसारिणी नूतना शिक्षणप्रणाल्यस्माभिरप्यङ्गीकृता विद्यते। अत एवानया शिक्षाप्रणाल्या समुत्पादिता विद्वांसश्छात्रा मूलविषयेन सह सर्वसाधारणव्यावहारिकविषयज्ञानसंपन्नाः सर्वेषु कार्यक्षेत्रेषु समानाधिकार-भाजो भविष्यन्तीति दृढं विश्वसिमि।

जय नेपाल !

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रधानाचार्यस्य सम्भाषणस्य मूलरूपम्

संस्कृतभाषा अति प्राचीन कालदेखि अविच्छिन्न प्रवाह रूपले चलेर आएको हो। विश्वमा जति आर्यभाषा छन् तिनको मूल स्रोतको विचार गर्दा संस्कृतको प्रभाव थोर–वहुत सबैमा परेको पाइन्छ। संस्कृतमा धेरै मूल धातुबाट अनेक अर्थका प्रत्ययहरू भएर हजारन् शब्द बनेर पदहरू जोडेर समास गर्दा भनेजस्ता नयाँ शब्द पनि बन्ने कला हुनाले भावलाई व्यक्त गर्न शब्दहरूको अक्षय भण्डार छ, यसले अरू कसैको पनि अवलम्बन गर्नुपर्दैन। आफ्नै भण्डारबाट यावत् व्यवहार चलाउन सक्तछ। अरू भारतीय भाषाको मूल भाषा यही हो, यसैबाट तद्भव-तत्समरूपले अनेक भाषा खडा भएका छन्। तिनले आफ्नो कमी पूरा गर्न कसैको आड लिने हुँदा अरूको अपूर्ण भण्डारलाई भरिदिने उदारता संस्कृतमा छ। हिन्दी, बङ्गाली, मराठी, गुजराती आदि भारतीय प्रतिष्ठित भाषामा र हाम्रो नेपाली भाषामा पनि संस्कृतका हजारन् शब्द एक जिउ भई मिलिरहेका छन्। आधुनिक व्यवहारमा ता नयाँ नयाँ संस्कृत शब्द दिनपरदिन प्रविष्ट हुन लागिरहेछन्, यसैले संस्कृतको ज्ञान भएमा अरू धेरै भाषामा प्रवेश गर्न सहायता मिल्दछ। अरू भाषामा समयको हेरफेरले स्वरूप परिवर्तन हुँदै आएको धेरै पाइन्छ। संस्कृत भाषाको अति पूरा कालदेखि प्रचार भइरहेको र व्याकरण आदिका नियमले बाँधिएको हुनाले हजारौं वर्ष हुँदा पनि शब्दहरू उही स्वरूपमा छन्, पछि पनि अधिकृत अवस्थामा चिरकालसम्म रही रहनेछन्। यसैले पुरानो संस्कृत लेख ग्रन्थहरूको भाव अर्थ बुझ्नलाई कठिन हुँदैन। यसै हुनाले चिरस्थायी शिलालेखहरूमा पनि प्राय. संस्कृतभाषाकै व्यवहार गर्ने चलन चलेको छ।

संस्कृतको प्रचार भारतमा मात्र भएको होइन, भारतीय उपद्वीप,जावा, सुमात्राहरूको प्राचीन तहको विचार गर्दा संस्कृतको छाया प्रतिच्छाया प्रभाव परपरसम्म पनि पुगेको थाहा पाइन्छ। यूरोपतिरका मूल प्राचीन भाषाहरूमा संस्कृत शब्दको प्रतिच्छाया पाइन्छ, अचेलको भाषामा त झन् विशेष छ। संस्कृतका

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गहन ग्रन्थको अनुवाद तिब्बती भाषा र चिनी भाषामा पनि भइरहेको पाइन्छ। यूरोपीय जगत्‌मा पनि संस्कृतको आदर कम छैन। यसले प्राचीन विश्वभाषा यो हो भन्न सकिन्छ। संस्कृत केवल धार्मिक भाषा होइन, प्रशस्त मात्रामा व्यावहारिक पनि छ, आध्यात्मिक पनि छ। जस्तोसुकै गहिरो विषयलाई पनि यथार्थ प्रतिपादन गर्ने खूबी यसमा हुनाले प्राचीन अर्वाचीन कालका धार्मिक, आध्यात्मिक, व्यावहारिक, ऐतिहासिक, सामाजिक आदि लौकिक अलौकिक सबै विषयका ग्रन्थहरू संस्कृतमा लेखिएका छन्। विश्वको साहित्यमध्येमा वैदिक साहित्य नै सर्वप्रथम हो भन्ने कुरामा प्राच्य पाश्चात्य सबै विद्वान्‌हरूको एक मत छ। यो आदि-साहित्य पनि यही भाषामा छ।

संस्कृतमा श्रुति, स्मृति, पुराण आदि धार्मिक, रामायण महाभारत आदि ऐतिहासिक, चरक, सुश्रुत आदि वैद्यक, कौटिल्य, वार्हस्पत्य आदि नैतिक, गर्ग भारद्वाज आदि ज्यौतिष, यस्तै सदाचार, शिल्प, वास्तु, काव्य, नाटक आदि विषय-विषयका ग्रन्थ प्रशस्त बनेका छन्। आध्यात्मिक विचारमा ता कैयन् शाखा-प्रशाखा भएर अनेक दर्शन खडा भएका छन्। समयको प्रभावले हाम्रा प्राचीन ग्रन्थहरू धेरै विनष्ट, लुप्त भए तापनि बाँकी रहेको मात्र पनि महान् राशि खडा छ।

संस्कृतविद्या सर्वाङ्गपूर्ण विद्या हो, आफ्नो गौरवले विश्वलाई मुग्ध गराएर यसले चिरकाल प्रतिष्ठा पाएको छ भन्ने कुरामा विवेचक विद्वान्‌हरूको उक्ति, लेख, इतिहास, ठाउँठाउँमा पाइएका शिलालेख आदि साक्षी छन्, तर समयको प्रभावले परिस्थितिमा परिवर्तन हुँदै आउँदा विदेशीय विद्याको चमकदमकले गर्दा संस्कृतको व्यापकतामा केही शिथिलता देखिन आएको छ। हामी आर्य जातिले यसलाई उपेक्षा गर्न हुँदैन। यसकै आधारमा हाम्रो संस्कृति खडा छ, यसैको रक्षाले हाम्रो संस्कृतिको रक्षा हुन्छ, आफ्नो जातीय गौरव सुरक्षित रहन्छ। यसको विस्मृतिले आत्मविस्मृति गराउने हुन्छ। आधुनिक भारतका महापुरुषहरू पनि संस्कृतको गौरवको अनुसन्धान गरी संस्कृतशिक्षा बढाउनुपर्दछ, यसको शिक्षाप्रणालीमा सुधार गर्नुपर्दछ भनी त्यसको प्रयत्नमा लागेका छन्। नयाँ भारतीय संविधानको समेत संस्कृतमा अनुवाद गराई वैधानिक शब्दकोषमा पनि संस्कृत शब्दको अधिकाधिक प्रयोग गराई अरू विदेशी भाषातर्फ झुकेका दृष्टिलाई फर्काएर संस्कृतमय पारी हिन्दीलाई उन्नत गराउन लागेका छन्। भारतीय मात्रले संस्कृतको आदर गरेको होइन कि, उस्मानिया युनिभर्सिटी, अफगान युनिभर्सिटीहरूमा पनि संस्कृतशिक्षा अनिवार्य गराएको सुनिन्छ। इरानमा पनि संस्कृतको शिक्षालाई भारतीय विद्वान् बोलाई लगेका छन्, रसियामा पनि संस्कृतका

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रामायण महाभारतको अनुवाद हुन लागेको छ। यूरोपमा त अघिदेखि नै विश्वविद्यालयमा संस्कृतको शिक्षा चलिरहेकै हो। हाम्रो नेपाल पुराकालदेखि आफ्नो संस्कृतिमा अडिरहेको स्वतन्त्र देश हो। यहाँ आफ्नो प्राचीन संस्कृतिको आधार भएको संस्कृतको प्रचार अघिदेखि नै भई आएको रहेछ भन्ने कुरा प्राचीन शिलालेख, विद्वान्हरूको ग्रन्थ लेखहरूबाट स्पष्टै छ। सबै विषयका विद्वान्हरू यहाँ प्रसिद्ध भएका छन्। देशान्तरमा समेत गएर संस्कृतविद्या पढाई देशको ज्ञानभण्डार बढाएका छन्। दूरदूर देशमा गएर थोर–बहुत व्यक्तिले विद्या कमाउनुभन्दा यहीं उच्च विद्यालय खडा गरी उच्च शिक्षा बढाउनु धेरै व्यक्तिलाई विद्वान् बनाई देशको उन्नति गराउनु आवश्यक ध्येय हो।

श्री ५ महाराजाधिराजबाट आफ्नो व्यक्तिगत सुखदुःखको पर्वाह नराखी आफ्नो राष्ट्रलाई सुखी, समृद्ध, सुशिक्षित गराउनु नै परम कर्तव्य सम्झिबक्सी त्यागशक्ति र विवेकशक्तिको साथसाथै देशमा प्रजातन्त्रपद्धति खडा गराई बक्सेको छ। मुलुकको यो नव प्रभातमा ज्ञान-विज्ञानको आलोक बढाई सारा जनतालाई सुशिक्षित गराउनु नै सर्वप्रथम महान् कर्तव्य भइरहेको छ। यही दृष्टिबाट अहिले जताततै स्कूल कलेजहरू खुल्न लागेका छन्। यसरी देशमा शिक्षा प्रचार हुनु देशको आँखा उघार्ने महान् साधन हो। यसको साथसाथ आफ्नो संस्कृतिको मुख्य जग भएको संस्कृतविद्याको पनि उन्नति गराउनु मुख्य कर्तव्य भइरहेको छ। संस्कृतविद्याले राष्ट्रभक्ति दृढ गराउँछ, अध्यात्मविचारद्वारा अन्तःकरण निर्मल पारी शान्तिमय वातावरण पैदा गर्दछ, जीवन व्यवहारलाई सरल गराउँछ, सदाचार र व्यक्तित्वको विकास गर्दछ, सत्यमार्गलाई प्रकाश गर्दछ। यसमा प्रवृत्ति निवृत्ति दुवै मार्गको विवरण हुनाले दुवै लोकलाई आनन्दमय गराउँछ। यस्तो पवित्र लक्ष्य भएको संस्कृत विद्यामा आदर श्रद्धा बढाई अहिले राजधानीमा संस्कृत महाविद्यालय यो खोलिएको बहुतै हर्ष र कल्याणको विषय भइरहेको छ। तर यतिले मात्र हुँदैन, यस्तै पहाड, मधेशमा समेत ठाउँठाउँ यस्ता उच्च संस्कृतशिक्षा-केन्द्र खडा भई जताततै तिनका शाखाप्रशाखाहरू माध्यमिक प्राथमिक शिक्षालय बढ्दै गई महाकालीदेखि मेचीसम्म जनतामा आफ्नो संस्कृतिको आत्माभिमान जाग्रत गराई त्यसको महकले दूरदूर देशसम्म लालायित हुने गराउनुपर्दछ। पहिले यो पनि विचार राख्नुपर्दछ कि संस्कृतको शिक्षाप्रणालीमा परिस्थितिमिल्दो परिवर्तन गरी सुधार गर्नु आवश्यक भइरहेछ। प्राचीनपनाले मात्र व्यवहार उज्ज्वल हुँदैन, आधुनिकपनाको पनि यसमा समावेश गरी यसलाई व्यवहारमा अधिक उपयोगी बनाउनुपर्दछ। देश काल समाज व्यवहार सुहाउँदो

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नपारी हुँदैन । यही दृष्टिले भारतमा पनि काशी संस्कृत कालेजमा समेत पाठ्य-परिवर्तन गरी संस्कृत ग्रन्थहरूको साथसाथ भूगोल, इतिहास, नागरिकशास्त्र, राजशास्त्र, गणित, केही विज्ञान, हिन्दी, इङ्गलिश आदि विषयान्तर पनि सर्व-साधारण र कुनै वैकल्पिक कुनै ऐच्छिक गराई औद्योगिक विषयहरूको समेत समावेश गरी नयाँ पद्धति खडा भएको हुनाले हामीले पनि उहीँसँग सम्बन्ध राखी बनारस गभर्नमेण्ट संस्कृत कालेजको परीक्षाकेन्द्र नेपालमा स्वीकृत गराएको उही-अनुसारको पाठ्यप्रणाली यहाँ चलाएको छ । सो प्रणालीबाट अंग्रेजीशिक्षा संस्कृतशिक्षा दुवैमा प्रधान विषय अंग्रेजी संस्कृत मात्र घटी-बढी भए पनि अरू साधारण विषयहरूको ज्ञान दुवैतर्फ समान हुनाले दुवै थरीको योग्यता एकै कक्षाको भई अंग्रेजी शिक्षित झैँ संस्कृत शिक्षित पनि जुनसुकै काममा पनि प्रवीण हुन्छन् । यही हेतुले उत्तरप्रदेश भारत सरकारले पूर्वमध्यमा र म्याट्रिकको, उत्तरमध्यमा र आई. ए. को, शास्त्री र बी. ए. को, आचार्य र एम. ए. को समान कक्षा समान अधिकार र एकतर्फबाट अर्कोतर्फ प्रवेश गर्न पाउने अधिकारको समेत सुविधा दिई सर्कुलर पनि जारी गरेको छ । वहाँको नियमावलीअनुसारको नयाँ पाठ्यप्रणाली त हामीले यहाँ पनि चलाएको हुनाले यो शिक्षा पाई तयार भएका संस्कृतका छात्रविद्वान्हरूले पनि विशेष विषयको ज्ञानको साथसाथ सर्वसाधारण, व्यावहारिक ज्ञानसमेत भएका हुनाले सबै कार्यक्षेत्रमा समान अधिकार पाउने-छन् भन्ने दृढ विश्वास छ ।

जय नेपाल

(२००९ वैक्रमाब्दस्याऽषाढस्य ३ दिवसस्य गोरखापत्रतः समुद्धृतम्)

सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ।

—अभिज्ञानशाकुन्तलम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृतवाङ्मयसंरक्षणसंवर्धनविधौ नेपालराष्ट्रस्य योगदानम्

—वेणीमाधवढकाल:

विश्वोत्तुङ्गहिमालभालस्य नेपालस्य समतलभूभागोपत्यकाऽधित्यकागहन-वनसूक्ष्मसरिन्नदीपर्वतहिमानीनिर्गतं यादृशं सौन्दर्यं तादृशमेवास्य विद्यते संस्कृतप्रोज्ज्वलं सांस्कृतिकं सौन्दर्यम् । अस्य सम्पादनविधौ यैर्हि मनीषिभिर्निजा प्रतिभा प्रवर्तिता, मेधा तत्रोन्मुखीकृता, निजं बहुमूल्यं जीवनञ्चार्पितं तेषां वन्द्य-चरितानां ज्ञानविषयं गतानां संस्मरणात्मकं प्रारभ्यते किमपि पुण्यं कर्म ।

राष्ट्रस्येतिहासस्यान्धकारमये गर्ते कियन्तः प्रतिभाशालिनो मेधाविनो महान्तो जना विलुप्ता जातास्तेषां नास्ति किमपि प्रामाणिकं साक्ष्यम् । विहित-योगदानान् तान् कानपि सादरं ससाधुवादञ्च संस्मृत्य साक्ष्येन प्रमाणितानां विशिष्टानां केषाञ्चिद् रचनाधर्मिणां सुरभारतीसेवकानां प्रस्तूयते सूक्ष्मा विवरणी ।

लिच्छविकाल:—

लिच्छविकालात् पूर्वतमस्य कालस्य संस्कृतसम्बद्धरचनात्मकक्रियाकलापस्य परिचयविधावद्य यावद् विद्यमानोऽन्धकार एव बाधकः । ततः प्रारब्धे लिच्छवि-शासने संस्कृतस्य रचनाविधौ सन्ति तिस्रो विभूतयः—

कविरनुपरमः कविर्बुद्धकीर्तिः कवी राजा जयदेवश्च ।

१. कविरनुपरमः— लिच्छविकालस्य सहायकशासनाधिकारिणो भौमगुप्तस्य पिता कवित्वसंपन्नो दार्शनिकश्चासीदनुपरमः । तस्यैका कृतिरस्ति— "द्वैपायनस्तोत्रम्" विद्वज्जनसमादृतम् ।

२. कविर्बुद्धकीर्तिः—कवेरस्य सुललितपदविन्यासः प्रोन्नता कल्पना माधुर्यमण्डिता च शैली सन्ति विशेषताः । अस्यान्यद् विवरणमस्ति नैव प्रमाणितम् ।

कृतिः— पशुपत्यभिलेखस्थाः कतिपये श्लोका एव कवेरस्य वैशिष्ट्यं प्रतिपादयन्ति ।

३. कवी राजा जयदेवः— लिच्छविकुलप्रसूतस्य शिवदेवस्य सूनुरसौ कविरासीत्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतिभाप्रोज्ज्वलः पशुपतिभक्तश्च। स्वयमेव स्थापिते पशुपत्यभिलेखे समुट्टङ्किताः पञ्च श्लोकाः कवेरस्य प्रोन्नतं कवित्वं विशुद्धं वैदुष्यञ्च प्रदर्शयन्ति। एतदतिरिक्ता बहवः कवयश्च तदानीन्तनेषु शिलालेखेषु श्लोकरूपेणैव विद्यन्तेऽन्यद्नामग्रामादिविवरणाभावान्न तेषां विषये किमपि वक्तुं पार्यते। भारवि-बुधस्वामिनोर्विषयेऽपि कैश्चन कविताकर्तृत्वमारोपितं, किन्तु साक्ष्याभावाद् वक्तुं न किमपि शक्यते।

लिच्छविकालस्याल्पीयसीषु शिलालेखात्मिकास्वपि रचनासु प्रोन्नतं कवित्वं वैदुष्यञ्च सन्निहितमस्तीति लिच्छविकालः संस्कृतजागरणे जागरूकः काल इति वक्तुं शक्यते निश्चप्रचम्।

मल्लकालः—

शास्त्रीयस्य वैदुष्यस्य विषये लिच्छविकालिकीं विच्छित्तिं सस्पृहं विलोकयन्नपि मल्लकालः संस्कृतसाहित्यस्य श्रव्यविधाया रचनादृष्ट्या विद्यते प्रोन्नतः कालः। राजपरम्परारक्षितस्यास्य संस्कृतवाङ्मयस्य मल्लकालः स्वर्णकाल एवेति वचने न भवति कापि वचनीयता। तत्र यैः संस्कृतवाङ्मयं संवर्धितं तेषां परिचयक्रमश्चेत्थमस्ति—

१. प्रतापमल्लः—

राजपुष्करिण्या हनुमद्द्वारस्य कालभैरवप्रतिमायाश्चः संस्थापकोः मल्लकालिकः प्रतापशाली राजा कवीन्द्रः प्रतापमल्लो विद्यते लक्ष्मीनरसिंहसूनुः १६८० तमे विक्रमाब्दे गृहीतजन्माऽसौ मल्लकालस्य संस्कृतकाव्यनिर्मितिविधावद्वितीयमस्ति व्यक्तित्वम्।

कृतयः— सर्वापराधक्षमास्तोत्रम्, संगीतदामोदरम्।

एतदतिरिक्ताः सन्त्यनेकेऽभिलेखाः प्रतापमल्लकवितासमलङ्कृता यत्र साहित्यिकं सौष्ठवं विद्योतते।

२. त्रिभुवनमल्लः—

अयमस्ति कृष्णचरितनाटकनिर्माता भक्तपुरराजपरम्परायाः प्रथमो नाटककारः।

३. जगज्ज्योतिर्मल्लः—

साहित्यशिल्पी कवीनां कलाकाराणाञ्चाऽऽश्रयदाता नाटककारो विद्यते जगज्ज्योतिर्मल्लः।

कृतयः— मुदितकुवलयाश्वनाटकम्, हरगौरीविवाहनाटकम्, कुञ्जविहारनाटकञ्च।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

४. जगत्प्रकाशमल्लः–

साहित्यस्य मर्मज्ञो विद्वानासीत्, नाटककारो जगत्प्रकाशमल्लः ।

कृतयः–

उषाहरणनाटकम्, नलीयनाटकम्, पारिजातहरणनाटकम्, मलयगन्धिनीनाटकम्, प्रभावतीहरणनाटकम्, मदनचरितनाटकम्, मूलदेवशशिदेवोपाख्यानम् ।

५. जितामित्रमल्लः–

अयमासीत् विद्याव्यसनी कविहृदयश्च संस्कृतनाटककारः ।

कृतयः– कालीयमथनोपाख्याननाटकम्, जैमिनिभारतनाटकम्, मदालसाहरणम्, गोपीचन्द्रनाटकम्, महाभारतनाटकम्, रामायणनाटकम् ।

६. भूपतीन्द्रमल्लः–

साहित्यसंगीतकलासु कृतादरो नाट्यशिल्पी भूपतीन्द्रमल्लो मल्लकालस्यास्ति विशिष्टं व्यक्तित्वम् ।

कृतयः– उषाहरणनाटकम्, कोलासुरवधोपाख्याननाटकम्, गोपीचन्द्रोपाख्याननाटकम्, कंसवधनाटकम्, गौरीविवाहनाटकम्, जालन्धरोपाख्याननाटकम्, पद्मावतीनाटकम्, जैमिनिभारतनाटकम्, पशुपतिप्रादुर्भावोपाख्याननाटकम्, मुदावतीहरणम्, रूक्मिणीपरिणयः, विक्रमचरितनाटकम्, विद्याविलापनाटकम्, श्रीखण्डचरितनाटकम् ।

७. रणजिन्मल्लः–

अयमासीत् भक्तपुरस्यान्तिमः शासको धर्माभिरुचिः संस्कृतानुरागी संस्कृतनाटककारः ।

कृतयः– इन्द्रविजयनाटकम्, उषाहरणनाटकम्, कृष्णकैलासयात्रोपाख्याननाटकम्, कृष्णचरित्रनाटकम्, कोलासुरवधोपाख्याननाटकम्, खट्वासुरवधोपाख्याननाटकम्, गोरक्षोपाख्यानम्, कृष्णचरित्रोपाख्यानम्, चन्द्राङ्गदोपाख्याननाटकम्, जलशायिविष्ण्वादिसृष्ट्युपाख्यानम्, दिक्पालगणेशोपाख्यानम्, पृथूपाख्याननाटकम्, मदनचरित्रकथा, मान्धात्र्युपाख्यानम्, ययात्युपाख्यानम्, रामायणनाटकम् ।

८. भूपालेन्द्रमल्लः–

नलचरितनाटकनिर्माता प्रतापमल्लस्य पौत्रो भूपालेन्द्रमल्लो वैदुष्येण कवित्वेन चासीत् समलङ्कृतः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

९. जगज्जयमल्लः–

अयमासीद् दार्शनिकः शान्तस्वभावो नाटककारः।

कृतयः– अभिनवप्रबोधचन्द्रोदयनाटकम्, अभिनवप्रबोधचन्द्रोदयः, प्रबोधचन्द्रोदयनाटकम् ।

१०. रामभद्रशर्मा–

ललितपुराभिजनः कश्चिद्राजगुरुरासीन्नाटककारो रामभद्रशर्मा ।

कृतयः– हरिश्चन्द्रनृत्यम्, गोपीचन्द्रनाटकम्, कीर्तिपताका ।

११. जयन्तः–

अयमासीन्मल्लकालिकः कश्चित्शासनाधिकारी कविः ।

कृतिः–

महीरावणवधनाटकम् ।

१२. माणिकः–

प्रतिभाप्रोज्ज्वलो मल्लकालिकः कविरस्ति माणिकः ।

कृती–

राघवानन्दनाटकम्, भैरवानन्दनाटकम् ।

१३. धर्मगुप्तः–

अयमासीन्मल्लकालस्य विशिष्टो नाटककारः ।

कृतिः–

रामाङ्कनाटिका ।

१४. शुभराजः–

बनेपाशासकस्य रणमल्लस्य समकालिकस्तत्राश्रितो नाटककार आसीदयम् ।

कृती– रूपमञ्जरीपरिगयनाटकम्, पाण्डवविजयनाटकम् ।

१५. वंशमणिः–

अयमासीत् प्रतापमल्लस्याश्रितो विशिष्टो विद्वान् कविश्च वंशमणिः ।

कृतिः– गीतिदिगम्बरनाटकम् ।

पूर्वोक्तैरन्यैश्चाज्ञातनामभिः कविभिर्मल्लकाले संस्कृतस्यानुकरणीया सेवा विहिता विश्वसन्निधौ नेपालपक्षतः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शाहकालः—

मल्लकालस्योत्तरार्धे भाषिकगुणस्तरदृष्ट्या स्खलद्गतेः संस्कृतस्य पुनर्जागरणं जातं शाहकाले । पृथ्वीनारायणस्य राष्ट्रनिर्मातुः समयात् प्रारब्धः शाहकालः सर्वपक्षतः सौभाग्यशाली कालः । संस्कृतस्य रचनात्मकविकासदृशाऽयं विद्यते सर्वसमादृतो मूल्यवान् कालः । अस्मिन् काले विशेषतः पूर्वार्धेऽस्य कालस्य यैर्मेधाविभिःसंस्कृतं समर्चितं, तेषामुत्तरार्धे ज्ञातानां च विशिष्टानां विदुषां विवरणं प्रस्तूयते—

१. कविः शक्तिवल्लभोऽर्ज्यालः—

गोर्खामण्डलीयः साहित्यसङ्गीतकलामर्मज्ञो लक्ष्मीनारायणसूनुर्भूपपुरोहितः कवित्वशक्तिसमलङ्कृतोऽयमस्ति शाहकालस्य महान् सारस्वतो जनः ।

कृतयः— जयरत्नाकरनाटकम्, हास्यकदम्बः, दानप्रकाशः, इन्द्रध्वजोत्सवः, सुधातरङ्गिणी, ललितमाधवः ।

२. वाणीविलासपाँडे—

शाहकालस्य विशिष्टो विद्वान् व्यवहारनिपुणश्च कविरस्ति वाणीविलासपाँडे ।

कृतयः— वाणीविलाससिद्धान्तः, दुर्गाकृत्यकौमुदी पुरश्चरणप्रयोगरत्नदीपिका, वेदान्तसारसंग्रहः, प्रशस्तिरत्नावली, नवरत्नयुगलस्तोत्रम्, दुर्गास्तोत्रम्, गंगास्तोत्रम्, भुजङ्गप्रयातस्तोत्रम्, अनेके तदानीन्तना अभिलेखाश्च ।

३. कविः सुन्दरानन्दबाँडा—

ऐतिहासिककाव्यकारः कविरयमस्ति ललितपुरलब्धजन्मा संस्कृतनेपालीनेवारीभाषाणां विद्वान् लेखकश्च ।

कृतयः— त्रिरत्नसौदर्यगाथा, राजेन्द्रनिमन्त्रणा, बहादुरशाहवर्णनम् व्याघ्रभैरवसुन्दराष्टकम्, लोकनाथसुन्दराष्टकम्, श्रीघनानन्दसुन्दराष्टकम्, कुलरत्नपञ्चकम्, चैत्यराजसुन्दरस्तवः, त्रिरत्नसुन्दरषोडशी ।

४. कविः सुकृतिदत्तपन्तः—

बागलुङ्गाभिजनो नेपालस्य विशिष्टो महाकविरयमासीत् १८७९ तमे विक्रमाब्दे लब्धजन्मा भार्गवीभद्रदत्तयोः पित्रोरानन्दवर्धनः स्वप्रतिभया माघभारविभवभूतिसमानो नेपालभूमेरलङ्कारः । इदानीं तद्गुणगौरवगायिका

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ल·यत एकैव कृतिः कार्तवीर्यार्जुनमहाकाव्यम् ।

५. छविलालसूरिः (ढुङ्गेलः)

१८७६ तमे विक्रमाब्दे समुत्पन्नस्तदानीं नेपालस्य विभिन्नेषु प्राशासनिकेषु पदेषु सेवारतोऽपि संस्कृतसाधनारतः ख्यातकीर्तिः प्राप्तराजप्रीतिः साहित्यव्यसनी कविरस्ति छविलालसूरी रामेछापाभिजनः।

कृतयः– सुन्दरचरितं नाटकम्, कुशलवोदयनाटकम्, वृत्तालंकारः, विरक्तितरङ्गिणीशतकम् ।

६. विद्वच्छिरोमणिः कुलचन्द्रगौतमः–

नैपालकसंस्कृतकविकुलमुकुटमणिर्विद्वच्छिरोमणिः कुलचन्द्रगौतमो जीवनपुराभिजनः १९३४ तमे विक्रमसम्वत्सरे स्वजन्मना नेपालधरणीमलङ्कृतवान्। रामाकान्तिरसौ कविरस्ति प्रतिभायाः पूर्णावतारः, कवित्वस्य पराकाष्ठा वैदुष्यस्य पराभूमिरिति स्मारं स्मारं तस्य गुणगौरवं संस्कृतसमर्चनसमर्पणञ्च स्वतो मस्तकं भवति प्रणतम् ।

कृतयः– कृष्णकर्णाभरणकाव्यम्, भागवतमञ्जरी, गंगागौरवम् प्रेमपञ्चपञ्चाशिका, वन्दनायुगलम्, प्रपन्नचर्चा, आदर्शदम्पती सीतारामौ, हरिवरिवस्या, शोकमहोर्मिः ।

७. पण्डितराजः सोमनाथसिग्द्यालः–

प्रतिभापुञ्जो वैदुष्यकुञ्जः साहित्ये सिद्धहस्तो व्याकरणे सञ्चालितहस्तो नेपालस्य वन्दनीयं व्यक्तित्वमस्ति शिष्यशतैराराधितचरणयुगलः पण्डितराजः श्रीसोमनाथः सिग्द्यालः ।

प्रकाशिताः कृतयः– सुन्दरचम्पूः, संस्कृतचन्द्रिका, अनुवादचन्द्रिका, आदर्शराघवपुष्पाञ्जलिः, प्रतिसंस्कृता सिद्धान्तकौमुदी ।

८. पण्डितो नीलदेवपन्तः–

उल्लेखनीयकृतीनामभावेऽपि विद्यावंशरचनया येन देशे देशान्तरेषु च पदवाक्यप्रमाणधुरन्धरत्वेन विशिष्टा भूमिकोपस्थापिता । महामहोपाध्यायेन सुब्रह्मण्यशास्त्रिणा महामहोपाध्यायेन झोपाह्वेन चित्रधरेण महामहोपाध्यायेन सीतारामशास्त्रिणा च विशिष्टगुरुत्वेन समाराधितचरणकमलः पालपाभिजनो महर्षिकल्पो नीलदेवपन्तो नेपालभूमेर्गौरवमासीत् । यस्य शिष्यैः प्रशिष्यैश्च वैदुष्येण कवित्वेन च समाराधिता सुरसरस्वती सम्प्रत्यपि विद्योतते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

९. न्यायरत्न–पद्मप्रसादभट्टराई–

नेपालस्याद्वितीयमधर्षणीयं व्यक्तित्वमस्ति पद्मप्रसादभट्टराई, येन विद्यावंशरचनया सुरसरस्वती संवर्धिता संरक्षिता च। देशदेशान्तरख्यातकीर्तिरसौ विद्वच्चूडामणिः सम्प्रत्यपि भारतीयैर्नेपालकैश्च विद्वद्भिः सादरं संस्मर्यते।

एतदतिरिक्तं शाहकाले निम्नलिखितैर्महानुभावैः संस्कृतं रचनात्मकदृष्ट्या संवर्धितम्–

कुलधर्मप्रकाशिकाप्रणेता कुलनिधिः, कवितानिकषोपलकारो लक्ष्मणसूरिः, जैमिनिसूत्रटीका–पञ्चाङ्गसिद्ध्यादिग्रन्थकारो नीलकण्ठजोशी, भक्तविजय–पृथिवीन्द्रवर्णोदयकाव्यकर्ता ललितावल्लभकविः, कर्पूरस्तवव्याख्याकारः पण्डितराजो रङ्गनाथः, ईशतत्त्वविवेचनकर्ता धरणीधरपन्तश्च शाहकालस्य संस्कृतसमर्चका आसन्।

वाचस्पतिपन्त– गंगादत्त–विष्णुहरि–विश्वनाथशास्त्रि–नरनाथ–जीवनाथ–श्रीरङ्ग–वीरेन्द्रकेसरि–विज्ञानकेसरि-हरिनाथ–धर्मदत्त–गोपाल-हिमनाथादयोऽनेके शाहकालिका विद्वांसः संस्कृतस्य संरक्षणे सम्वर्धने च विशिष्टया प्रतिभया निगमागमेषु, विद्यावंशस्य सर्वनमस्यां परम्परां निर्माय महद् योगदानं कृतवन्तः।

अस्मिन्नेव प्रसङ्गे विस्तृतोपोद्घातरचनापुरःसरं काश्यपसंहितायाः सम्पादको देशदेशान्तरख्यातकीर्तिर्निगमागममर्मज्ञो विद्वच्छिरोमणिर्हेमराजपाँडे, विकीर्णाभिरनेकाभिः स्तुतिभिः सह श्रीरामचरितामृतकाव्यस्य निर्माता खिदिमाभिजनो दधिराममरासिनी, विकीर्णाभी रचनाभिः सह ईश्वरास्तित्वे मानानीति ग्रन्थस्य प्रणेता मीनप्रसादनेपालः पालपाभिजनः, जीवनदान–भारतीवैभवादिग्रन्थनिर्माता पालपीयो माधवप्रसाददेवकोटा, पृथ्वीनारायणस्योपदेशस्य पद्यमय्या संस्कृतव्याख्याया रचयिता काष्ठमण्डपीयो नयराजपन्तः, ईशावास्यवृत्ति–तदर्थमेव– विश्वेदेवा इत्याख्यकाव्य- सत्यहरिश्चन्द्रमहाकाव्यानां रचयिता पूर्णप्रसादब्राह्मणः, संस्कृतपद्यानां विरचनैः सहैतिहासिककृतीनां सम्पादको योगी नरहरिनाथः, रुद्राष्टाध्यायसार-महेन्द्रविजयकाव्यनिर्माता लमजुङ्गवास्तव्यो बद्रीनाथसुवेदी, अन्यैः खण्डकाव्यैः सार्धं नाचिकेतसमहाकाव्य-श्रीकृष्णचरितामृतमहाकाव्ययोर्निर्माता कृष्णप्रसादघिमिरे काष्ठमण्डपीयः, भगवद्वरिवस्या-साम्राज्यलहरीस्तवकाव्यनिर्माता बुद्धिसागरपराजुली पोखराभिजनः, विकीर्णैर्गद्यपद्यैः सह रुक्मिणीपरिणयखण्डकाव्यनिर्माता काष्ठमण्डपीयो गुणराजखनालः, रामभक्तमालायाः कर्ता गोरखाभिजनो गायत्रीपण्डितः, विकीर्णैर्गद्यपद्यैः सह परिणामनाटकस्य प्रणेता काष्ठमण्डपीयचूडानाथभट्टरायः, महेन्द्रोदयमहाकाव्यरचयिता

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भरतराजशास्त्री मन्थलीयः, श्री ५ वीरेन्द्रशुभराज्याभिषेककाव्य–महेन्द्रविरह–वेदनालघुकृति–गोरक्षशाहवंशमहाकाव्यप्रणेता प्यूठानाभिजनो हरिप्रसादाचार्यः, गण्डकीगौरवादिकाव्यनिर्माता गुल्मीवास्तव्य उमानाथपन्थी, नेमुनेर्नेपालादिकाव्यरचयिता गुल्मीवास्तव्यष्टीकारामपन्थी, काव्यप्रकाशटीकाकारः शिवराजाचार्यः तनहुँवास्तव्यः, महोत्तरीमण्डलीयः श्लोकसिद्धान्तकौमुदीप्रणेता सुरेशझा, किमुपहरामीति गद्यकाव्यप्रणेता विष्णुराज आत्रेयः कपिलवस्तुवास्तव्यश्च सन्ति शाहकाले संस्कृतसमर्चकाः । अस्मदज्ञानवशादन्येषां विद्वद्विभूतीनां नामानि यदि नामात्र नोट्टङ्कितानि तत्र सर्व एव ते क्षमाप्रदानपुरःसरमस्मदज्ञानमङ्गीकरिष्यन्तीति विश्वसिमि ।

विश्वप्राङ्गणे नेपालेनोपस्थापिता गौरवमयी संस्कृतसंरक्षणसंवर्धनपरम्परा कविजनैरलङ्कृता विद्वज्जनैर्विभूषिता वैज्ञानिकैर्नवैः प्रयोगैर्विश्ववन्दिता सर्वजनहृदयगम्या च सत्याकल्पं स्थास्यतीत्यत्र नास्ति संदेहलेशलवोऽपि ।

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ।

— **हितोपदेशः**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रिभुवनविश्वविद्यालयसंस्कृताध्ययनसंस्थानाध्यक्ष-कार्यालयस्य संक्षिप्तः परिचयः

महिमालयस्य हिमालयस्य वक्षेऽधिष्ठितेऽस्मिन् नेपाले प्राचीनकालादेव केवलं संस्कृतवाङ्मयमेव राष्ट्रियशिक्षायाः सर्वाङ्गपूर्णस्वरूपमासीत्। विक्रमीय-विंशशताब्द्या एवात्रापि पाश्चात्त्याङ्गलशिक्षायाः प्रवेशे "नावीन्यं रामणीयकम्" इति धिया जातेऽपि चाकचिक्ये पाश्चात्त्यशिक्षायाः संस्कृतवाङ्मयं नेपाले सगौरवं हार्दिकं स्थानं गृह्णातीति नाविदितं विदुषां शेमुषीमताम्।

आङ्गलशिक्षाप्रवेशस्य शताब्द्याः पश्चान्नेपाले राष्ट्रियावश्यकतया विविधविद्यागतशिक्षाविकासस्य सिद्धान्ते स्वीकृतेऽद्ययावदंगीभूता संस्कृतशिक्षा राष्ट्रियशिक्षापद्धतेर्योजनानुसारं शिक्षाङ्गत्वेन नूतनाकार आकारिता।

त्रिभुवनविश्वविद्यालयान्तर्गतं स्वीकृतेषु षोडशाध्ययनसंस्थानेष्वन्य-तमस्यास्य संस्कृताध्ययनसंस्थानस्यापि त्रिंशदुत्तरद्विसहस्रतमे (२०३०) वैक्रमाब्दे संस्थापनं जातम्।

तदनन्तरं जनमनोभावनापूरकस्य संस्कृतस्य हिन्दुसंस्कृतेश्च परिपालकस्य परमया कृपयाऽध्ययनसंस्थानस्य संस्थिती रापत्या निर्झरशीकरैः संभाविते प्रकृत्या रमणीये दाङ्गमण्डले बेलझुण्डीस्थाने स्थिरीकृतेति, तत एव कालात् स्थानाच्चैतत् संस्कृताध्ययनसंस्थानं राष्ट्रियोद्देश्यानुसारं स्वकीयगौरवानुकूलं नेपाले संस्कृत-वाङ्मयस्य संरक्षणं संवर्द्धनं परिपोषञ्च कुर्वदास्त इति विदांकुर्वन्त्येव सज्जनाः।

अधुनास्य संस्थानस्याध्ययनाध्यापनाङ्गभूतानि पञ्च विद्यापीठानि सन्ति, चैतानि निर्दिश्यते—

(१) स्ना. उ. केन्द्रीयविद्यापीठम् – दाङ्गे विल्वकुञ्जे २०३९ विक्र-मीयवत्सरादारब्धमिदं विद्यापीठं केवलं स्नातकोत्तरस्तरीयम्।

(२) वाल्मीकिविद्यापीठं काष्ठमण्डपे स्थितम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(३) जनताविद्यापीठं दाङ्गविजौरीग्रामे स्थितम् ।

(४) पिण्डेश्वरविद्यापीठं सुन्सरीमण्डलस्य धराने स्थितम् ।

(५) याज्ञवल्क्यलक्ष्मीनारायणविद्यापीठं महोत्तरीमण्डलस्य मटिहानी-स्थाने स्थितम् ।

एतेषामुपर्युक्तानां पञ्चानां विद्यापीठानां नेतृत्वं संस्कृताध्ययनसंस्थान-मेव विभर्तीति विदन्त्येव सर्वे। यद्यपि सर्वेषामध्ययनसंस्थानानां सामान्यं प्रवर्तनं समानमेवास्ति, तथापि किञ्चिद् वैशिष्ट्यं समेषां भवति, तदेव पार्थक्ये हेतुरिति संस्कृताध्ययनसंस्थानस्य कार्यकलापो निम्नानुसारमस्ति ।

(१) नियमानुसारमध्यक्ष (डीन) स्याध्यक्षत्वे संघटिता २० संख्या-त्मिका विद्यापरिषत् ।

(२) नियमानुसारमध्यक्ष (डीन) स्याध्यक्षत्वे संघटिता ११ सदस्या-त्मिकानुसन्धानसमितिः ।

(३) वाल्मीकिविद्यापीठस्थस्य संस्कृताध्ययनसंस्थानस्य सहायकाध्यक्ष-स्याध्यक्षत्वे संघटिता २० सदस्यात्मिका विषयसमितिः।

एताः पूर्वोक्तास्तिस्रः शैक्षिका विधाः ।

संस्थानाध्यक्षस्य कार्यालयस्थाः शाखाः–

१. अनुसन्धान–पाठ्यक्रम–प्रकाशनशाखा ।

२. आर्थिकप्रशासनशाखा ।

३. कर्मचारिप्रशासनशाखा ।

५. योजना–निर्माणशाखा ।

६. शैक्षिकप्रशासनशाखा (परीक्षाप्यत्रैवान्तर्भूताऽस्ति) ।

७. सामान्यप्रशासन–भाण्डागारशाखा ।

पूर्वोक्ता एताः प्रशासनिकाः शाखाः।

अत्रेदमवध्येयमस्ति यत् कार्यालयेऽत्र स्वकीयं मुद्रणालयमप्यस्ति सञ्चालितम् । तथैव संस्थानस्यास्य नाम्न्यधिकृतायां ३१४ विघापरिमितायां भूमौ कृषिकार्यमपि सञ्चालितमस्तीति ।

एवञ्चाधुनाऽत्र कार्यालयेऽधिकृतस्तरीयाः ९ कर्मकराः, सहायकस्तरीयाः २४ कर्मकरा निम्नस्तरीयाश्च २५ कर्मकराः कार्यरताः सन्ति ।

अथातोऽस्याध्ययनसंस्थानस्य भौतिकं स्वरूपञ्चेत्थं प्रदर्श्यते –

(१) प्राशासनिककार्यालयभवनम्

(२) संस्कृतमन्दिरम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



संस्कृताधीतिसंस्थानं त्रिलोकेश्वरशोभितम् ।
स्फीतभूभागसंपन्नं विल्वकुञ्जे महीयते ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(३) अतिथिगृहसंयुतं मुद्रणगृहम्
(४) सभाभवनम्
(५) भाण्डागारगृहम्
(६) कर्मकरावासगृहम्
(७) निर्मिता जलाधानी (पानीटयांकी)
(८) दौवारिकगृहम्
(९) केन्द्रीयविद्यापीठभवनम्
(१०) छात्रावासभवनम्
(११) छात्राणां महानसगृहम्
(१२) निर्मितः कूपः
(१३ निर्मिताः कुटीरा :

बहुमूल्या यान्त्रिकी भूतिः

(१) विद्युदुत्पादकयन्त्रम्
(२) मुद्रणयन्त्रम् (विविधोपकरणसमेतम्)
(३) जीपपदवाच्यं यानम्
(४) ट्र्याक्टरपदवाच्यं लघुगोदारणयन्त्रम् (विविधोपकरण–युक्तम्)
(५) पावरट्रेलरपदवाच्यं लघुगोदारणयन्त्रम्
(६) मोटरसाइकिलपदवाच्यं यानम्
(७) सिञ्चनयन्त्रम् (पम्पिङ्गसेट)

तथैव वाहनो घोटकः, टंकणयन्त्राणि, टंकणप्रतिलिपियन्त्र–गणकयन्त्रादीनि बहूनि कार्यालयोपकरणानि च कार्यालये ऽस्मिन् सन्ति ।

अध्ययनसंस्थाने पेयजलाभावस्य पूरणार्थं सर्वकारेणैव "बेलझुण्डी खानेपानी योजना" सञ्चालिता, अधुना सा योजना सम्पन्ना च ।

एवञ्चाध्ययनसंस्थानस्य कृषिभूमेः सिञ्चनाय गुहार खोला सिंचाई योजना संचाल्यमाना वर्तते सर्वकारद्वारा। एवं संस्कृताध्ययनसंस्थानस्य परिसरे सम्प्रति अतिरिक्तपत्रालयो (हुलाक)ऽपि विद्यते ।

एवंक्रमेण त्रयस्त्रिंशदुत्तरद्विसहस्र तमे २०३३ वैक्रमाब्दे कार्यालयस्यास्य कर्मकराणां श्रद्धावतां समेषां महानुभावानाञ्च सत्साहाय्येन कार्यालयस्यास्य परिसरे श्रीत्रिलोकेश्वरमहादेवस्य मन्दिरं स्थापितम् । तच्च वज्रमयं मन्दिरं मनोहरं विद्यते । तत्रैव गणेश–सूर्य-देवी–विष्णु–राधाकृष्ण–सरस्वती–गुह्येश्वरी-कालिका-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मालिकानां देवानाँ देवीनाञ्च मन्दिराण्यपि निर्मितानि सन्ति । तत्र दैनिकी पूजा कार्यालयस्थानां समस्तपदाधिकारिशिक्षककर्मकराणां मासिकश्रद्धादानेन प्रचलति । मन्दिराणां व्यवस्थापनायैका प्रबन्धसमितिश्च संघटिता वर्तते ।

उत्पादिता जनशक्तिः–

२०३८ माघसत्रावधौ

(१)	प्रमाणपत्रस्तरे	४५८
(२)	स्नातकस्तरे	३५८
(३)	स्नातकोत्तरस्तरे	१७

अस्तिचाध्ययनसंस्थानात् संचाल्यमाना संस्कृतषण्मासिकी पत्रिका हैवमती।

एवं चात्राध्ययनसंस्थाने संस्थानस्योन्नत्या एका परामर्शदात्रीसमितिरपि संघटिताऽस्ति, तथैव श्री ५ सर्वकारस्य शिक्षामन्त्रालयेन संघटिता संस्थाध्यक्षस्याध्यक्षत्वे एका दाङदेउखुरी जग्गाव्यवस्थासमितिरस्ति ।

इत्थमुपरि संक्षेपतो वर्णितस्य संस्कृताध्ययनसंस्थानस्योन्नयनेऽध्यक्ष पदमलङ्कुर्वाणो वर्तते सम्प्रति प्रा. श्री तोयनाथपाण्डेयमहोदयः, एवं च सहायकाध्यक्षपदं च उपप्रा. श्रीगोविन्दकोइरालामहोदयः ।

अस्याध्ययनसंस्थानस्योन्नत्यै कार्यालयेऽस्मिन्नध्यक्षसहायकाध्यक्षपदयोरधिष्ठिता महोदयाः प्रारम्भात् सन्तीमे ।

अध्यक्षपदे – (१) प्रा. श्री अम्बिकाप्रसाद-अधिकारिमहोदयः
२०३०।२।१७ ततः २०३६।८।९ पर्यन्तम् ।
(२) प्रा. श्रीतोयनाथपाण्डेयमहोदयः
२०३६।८।९ दिवसतः ।

सहायकाध्यक्षपदे – (१) उपप्रा. श्रीविद्यानाथोपाध्यायमहोदयः
२०३३।३।१ ततः २०३५।२ मासान्तपर्यन्तम् ।
(२) उपप्रा. श्रीराधाकृष्ण– अधिकारिमहोदयः
२०३५।३।१ ततः २०३७ ज्येष्ठमासान्तपर्यन्तम् ।
(३) सहप्रा. श्रीवाबुरामपोखरेलमहोदयः
२०३७।३।२ ततः २०३८।१०।२० पर्यन्तम् ।
(४) उपप्रा. श्री गोविन्द कोइरालामहोदयः
२०३९।२।९ दिवसतः ।

एवंप्रकारेण पल्लवितं पुष्पितं फलितञ्च संस्थानमिदं भविष्ये विश्वस्यैव कृते प्राच्यविद्याया अद्वितीयमाकर्षणकेन्द्रं भवितुं प्रभवति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



विद्यापीठस्य नूत्नस्य केन्द्रीयाख्यस्य सुन्दरम् ।
भवनं भासते शश्वद् दाङ्गस्य विल्वकुञ्जके ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भारतभ्रमणम्

त्रिभुवनविश्वविद्यालयस्य कार्यक्रमानुसारं भारते वर्तमानसमये संस्कृत-पाठ्यक्रमसंस्कृताध्ययनस्थितिपरिज्ञानाय संस्कृताध्ययनसंस्थानाध्यक्षस्य प्राध्यापक-श्रीतोयनाथपाण्डेयमहाभागस्य नेतृत्वे प्रा.श्रीगङ्गाधरपराजुली– सहायक-संस्थानाध्यक्षसहप्राध्यापकश्री.शिवहरिमरहट्टामहाभाग–उपप्राध्यापकडा. श्री.वी.र-देवविष्टमहाभागैः समन्वितं संस्कृतविदुषां दलं पूर्वोक्तलक्ष्यपरिप्राप्तये भारतस्य लक्ष्मणपुर–इन्द्रप्रस्थ–हरियाणा–हरिद्वार–ऋषिकेश–मैसूर–मुम्बई–पूना–वाराणसीस्थानां संस्कृतसंस्थानानां च निरीक्षणं विधाय तत्तत्क्षेत्रस्थैः संस्कृतसमर्पितैः ख्यातिप्राप्तैर्विद्वद्भिश्च सह संस्कृतोत्थानाय परामर्शं विधाय चत्वा-रिंशदुत्तरद्विसहस्रतमस्य (२०४०) वैक्रमाब्दस्य माघमासस्योर्नत्रिंशतमदिवसाद् भारतभ्रमणं प्रारभ्य फाल्गुनमासस्य चतुर्विंशतितमे दिवसे प्रत्यावर्तितम्। तेना-ध्ययनदलेन भारते संस्कृतसम्बन्धिविभिन्नसमसामयिककाठिन्यनिराकरणाय तत्रत्यानां विदुषां पुरः प्रश्नावली प्रपत्रमुपस्थापितम् । तत्रोपस्थापिते प्रश्नावली–प्रपत्रे निम्नलिखिताः प्रश्ना आसन् ।

१. संस्कृतवाङ्मयस्याधुनिकजनजीवनोपयोगितायै कीदृशः पाठ्यक्रमोऽ-पेक्षितः, येन प्रौढपाण्डित्यं विलुप्तं न भवेत् ?

२ शिक्षासरणिः परीक्षाप्रणाली च प्रचलितैव परिष्कार्या,उतान्यै वान्वेषणीया? आद्ये कः परिष्कारप्रकारः ? द्वितीये च कीदृक् तस्याः स्वरूपम् ?

३. भौतिकाविष्कृतिचाकचक्यावर्जिता आर्ययुवानः कथं स्वमार्गे प्रत्यानेया : ?

४. इतिहासपुराणादिषु वर्णिताः शस्त्रास्त्रविमानादिविद्या पुनरुज्जीवयितुं शक्या न वा ? शक्याश्चेत् कथम् ?

५. याभिरार्यमहर्षय उत्कृष्टां ख्यातिमवापुस्ता योगसिद्धयः कथमद्य आत्म-सात्कर्तव्याः ?

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

६. ग्रद्यत्वे पण्डितंमन्या अपि स्नानसंध्यादिविधुरा इति श्रौतस्मार्तकर्मधर्माणामुद्धारः कथं संपाद्यः ? शुष्केष्टिप्रशिक्षणेन वा कियानुपकारः संभवेत् ?

७. सांप्रतिकं भौतिकं विज्ञानं संस्कृते कथं समावेश्यम् ? एतद्विषयकाः संस्कृतग्रन्थाः के सुलभाः ?

८. शासनसहयोगं विनाऽऽर्यसंस्कृतिरुन्नेतुं शक्या न वा ? न चेत् तत्र शासनं कथमनुकूलयितव्यम् ?

९. किमद्यत्वे वर्णाश्रमधर्माणां यथापूर्वं परिपालनं संभवति ?

१०. आबालवृद्धवनितं संस्कृतभाषाप्रचाराय कोऽभ्युपायः ! अपि वा संस्कृतं राष्ट्रभाषात्वेनोद्घोषयितुं शक्यम् ?

११. आर्यसंस्कृतेः सुरभारत्याश्च संरक्षणाय संहत्य के प्रकाराः ?

अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ॥

—श्रीमद्वाल्मीकीयं रामायणम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



संस्कृताधीतिकेन्द्रेषु भारतस्य पुरेषु च ।
संस्कृतस्य स्थितिं ज्ञातुं तस्य पाठ्यक्रमस्य च ॥
विहितभ्रमणं भाति नेपालविदुषां दलम् ।
तोयनाथाऽऽहितं गङ्गा–शिव–वीरसमन्वितम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जनताविद्यापीठस्य परिचयः

परितो महामहीधरमण्डिते मुखरितसरित्समूहधौतमुखमण्डले शस्यश्यामले राप्तीप्राञ्चलमणिमुकुटायमाने दाङ्गजनपदे विद्योतमानस्य स्थानीयानां विद्यानुरागिणामुदारमानसानां जनानां श्रद्धासिक्तश्रमसंपादितस्वरूपस्य पश्चिमाञ्चल-मध्यमाञ्चल–सुदूरपश्चिमाञ्चलवर्तिनां संस्कृतसंस्कृतिसादराणां जनानामेकमात्रस्य ज्योतिरिङ्गणस्य निजैर्मौलिकैर्गुणैः सार्थ- नाम्नो जनताविद्यापीठस्य निजं किमपि वैशिष्टयं वर्तते ।

इदं विद्यापीठं रामेश्वरपोखरेल–जागेश्वरब्राह्मण–अमरराजशर्मणां वैविध्यपूर्णेन सत्प्रयासेनाष्टोत्तरद्विसहस्र (२०२८) तमस्यविक्रमसंवत्सरस्य वैशाखमासस्य द्वाविंशतितमे दिवसे वैशाखस्य शुक्लपक्षेऽक्षयतृतीयायां तिथौ सूदयरामेश्वरशिवालये सर्वप्रथमं जनतामहाविद्यालयनाम्ना समुद्घाटितं सत् ततःप्रभृति तत्रत्यानां जनानां श्रद्धास्पदं स्थलं भूत्वा विशिष्टानां विदुषां निर्माणे शास्त्रीयज्ञानप्रचारप्रसारकर्मणि च महद् योगदानं दददस्ति ।

दशोत्तरद्विसहस्र (२०१०) तमे विक्रमाब्दे सूदयरामवंशविभवैर्जागेश्वर-ब्राह्मण–अमरराजशर्मा–दत्तात्रेयशर्मप्रभृतिभिः टेकनाथगौतम–गणेशकुमारदेवकोटा-प्रभृतिभिरन्यैश्च महानुभावैर्भूदानान्दोलनप्रवर्तकैस्तत्रत्येभ्यो मजगैंयाजनानां परिवारेभ्यो दानपत्रत्रयमाध्यमेन द्वादशशतविगाहापरिमिता भूमिर्जनतामहाविद्यालयाय लब्धा । अनेन हेतुनेदं विद्यापीठं स्थापनायाः प्रारम्भकालादेव स्वावलम्बि सन् निजां चिरस्थायितां नितरामभिव्यञ्जयद् विद्योतते ।

राप्तीगङ्गापावनजलकणशीतलसमीराभिषिक्तस्य दाङ्गजनपदस्येतिहासे संप्राप्ता सा चिरस्मरणीया स्वर्णाक्षरोट्टङ्कनीया वेला यत्र चतुर्विंशत्युत्तरद्विसहस्रतम (२०२४) स्य विक्रमाब्दस्य चैत्रमासस्य प्रथमसप्ताहे संस्कृतसंस्कृतिसमर्पितस्व-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कीयजीवनेन महीमहेन्द्रेण श्री ५ महेन्द्रेण भारतीयानां श्री १०८ करपात्रस्वामिप्रभृतीनां विद्याविद्योतितान्तःकरणानां विदुषां नैपालकानां च पण्डितराजसोमनाथसिग्द्यालप्रभृतीनां विद्वन्मूर्धन्यानां समुपस्थित्या गङ्गायमुनयोर्मध्ये निजं सारस्वतं स्वरूपं प्रकाशयता वैदिकध्वनिगुञ्जिते श्रद्धामयप्रजाजनपुञ्जिते सकलशास्त्रमर्मज्ञजनसमञ्चिते वातावरणे जनतामहाविद्यालयस्य प्राङ्गणे विद्वत्संमेलनस्य निजाभ्यां करकमलाभ्यां समुद्घाटनं व्यधायि ।

अस्मिन् विद्यापीठे दिगम्बरझा–आनन्दझा–पूर्णचन्द्रढुङ्गेल–गङ्गाधरपराजुलीमहाभागैः क्रमशः प्रधानाचार्यपदं समलङ्कृत्य निजा योगदानसंस्मरणीया सेवा समर्पिता । सिद्धिनाथगौतममहाभागश्च विद्यापीठप्रमुखपदं समलङ्कृत्य विद्यापीठस्य सेवां विहितवान् । संस्थापकसदस्यः रामेश्वरपोखे्लमहोदयश्च नवीनशिक्षापद्धतेः प्रारम्भे सम्प्रति च विद्यापीठप्रमुखपदमङ्कृत्य निजया सेवया जनतापीठस्य समुन्नतये बद्धपरिकरो वर्तते ।

अस्मिन् विद्यापीठे सम्प्रति प्राचीनन्यायव्याकरणसाहित्येतिहासपुराणधर्मशास्त्राणां प्राच्यविषयाणां; आङ्ग्लभाषानेपालीभाषाराजशास्त्रार्थशास्त्राणाञ्च सहायकविषयाणामध्ययनाध्यापनव्यवस्था सुचारुरूपेण प्रचलति । अत्र संप्रति नवदशसंख्यकाः शिक्षकाः कार्यव्यापृता विद्यन्ते ।

अध्ययनाध्यापनसंपत्स्रोतसाञ्च दृष्ट्येदं विद्यापीठं सर्वेषां प्रेरणास्पदं सत् किमपि निजं वैशिष्टयं धत्ते ।

क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः ।

– माघमहाकाव्यम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पिण्डेश्वर–विद्यापीठस्य परिचयः

कुशिकतनयायाः कौशिक्याः पूर्वस्यां दिशि विराजमानाया धन्यधराया धराननगर्याः पावनं मुकुटमिव विराजते विजयपुरम् । भगवत्या दन्तकाल्या भगवतः पिण्डेश्वरस्य च पीठाभ्यां मण्डिते विजयपुरे भगवतः पिण्डेश्वरस्य नाम्ना त्रिभुवनविश्वविद्यालयान्तर्गतं पिण्डेश्वरविद्यापीठं विद्योतते । अष्टोत्तरद्विसहस्र-(२००८) तमस्य विक्रमसंवत्सरस्य मार्गशीर्षमासे मङ्गलमये मुहूर्ते श्रीपण्डित-छविलालप्रभृतिविदुषां तदानीन्तनस्य मोरङ्गमण्डलाधीशस्य श्रीभूपालमानसिंह-कार्कीमहोदयस्य च सत्प्रयासेन श्री ५ त्रिभुवनस्य शासनकाले श्रीपिण्डेश्वर-संस्कृतमहाविद्यालयस्य स्थापना जाता । अस्य महाविद्यालयस्य स्थापनाकाले नवसंख्यापरिमिताः शिक्षका आसन् । तदाऽस्मिन् महाविद्यालये पञ्चसप्ततिपरिमितानां छात्राणां निःशुल्कभोजनव्यवस्था जाता । प्रारम्भत एवात्रोच्चशिक्षापर्यन्तं पठनपाठनव्यवस्था सञ्चलति स्म । अत्र विद्यार्थिनोऽधीत्य काशीस्थराजकीयसंस्कृतमहाविद्यालयं गत्वा परीक्षां ददति स्म। तदानीन्तनविदुषां प्रयासैरस्य सञ्चालनव्यवस्था शासनान्तर्गतेन गोष्ठी (गूठी) विभागेन कृता ।

त्रयोदशोत्तरद्विसहस्र (२०१३) तमे विक्रमाब्दे देशभ्रमणविनिःसृतेन श्री ५ महेन्द्रेण महाविद्यालयभवनस्य शिलान्यासो विहितः । एतद् भवनं सपादैकलक्षरुप्यकाणां व्ययेन शिक्षाविभागद्वाराष्टाविंशत्युत्तरद्विसहस्र (२०२८) तमे विक्रमाब्दे निर्मितम् । तस्य महाविद्यालयीयभवनस्य समुद्घाटनं प्रधानमन्त्रिणा श्रीकीर्तिनिधिविष्टमहोदयेन कृतम् । त्रिंशदुत्तरद्विसहस्र (२०३०) तमे विक्रमाब्दे राष्ट्रियशिक्षापद्धत्याः प्रवर्तनानन्तरमस्य महाविद्यालयस्य पिण्डेश्वर-विद्यापीठमिति नामपरिवर्तनं जातम् । एतदनन्तरं त्रिभुवनविश्वविद्यालयान्त-र्गतत्वेनास्य सञ्चालनकार्यं प्रारब्धम् । अस्मिन् विद्यापीठे संप्रति स्नातकपर्यन्तं प्राच्यविद्यासु नव्यव्याकरणं, प्राचीनन्यायः, साहित्यञ्चेति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विषयत्रयस्याध्यापनं भवति। नव्यविद्यासु तु नेपालीभाषा, आङ्ग्लभाषाऽर्थशास्त्रं राजनीतिशास्त्रञ्चेति विषयचतुष्टयस्याध्यापनं भवति। प्राच्यविद्यासु नवसंख्यका नव्यविद्यासु षट्संख्यकाः शिक्षकाश्चेति पञ्चदशसंख्यकाः शिक्षकाः सन्ति। अस्मिन् विद्यापीठे छात्रावासस्य पुस्तकालयस्य च सुव्यवस्था वर्तते। विद्यापीठस्य भव्यं भवनं दर्शकाणां मनांसि भृशं स्पृशति। त्रयस्त्रिंशदुत्तरद्विसहस्र (२०३३) तमे विक्रमाब्देऽस्य विद्यापीठस्य भव्यरूपेण रजतजयन्ती सम्पन्ना, तस्मिन्नवसरे विद्यापीठेन स्मारिका च प्रकाशिता।

पूर्वाञ्चलक्षेत्रस्य पावनं विद्यातीर्थमिदं राष्ट्रस्य शैक्षिकसांस्कृतिकसमुत्थानविधौ प्रशंसनीयमवदानमर्पयत्, संस्थापनसंवर्द्धनजागरूकाणां संस्कृतानुरागिणां जनानां तपःपूतं मूर्तं पुण्यमिव प्रकाशते।

संस्कृतविद्याया लोपस्तु न भूतो न च भविष्यति।

– श्री ५ त्रिभुवनः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



विजयनगरे रम्ये धरानमुकुटायिते ।
पिण्डेश्वराञ्चितं भाति विद्यापीठनिकेतनम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

याज्ञवल्क्यलक्ष्मीनारायणविद्यापीठस्य परिचय :

भगवत्या जनकनन्दिन्या जन्मना पावनस्य राजर्षेर्जनकस्य लोकोत्तर-ज्ञानचमत्कृतस्य पावनेन नाम्ना विश्रुतस्य महर्षेर्याज्ञवल्क्यस्य ज्ञानसाधनाक्षेत्रस्य मिथिलाक्षेत्रमण्डनस्य जनकपुराञ्चलस्य महोत्तरीजनपदस्य दक्षिणस्यां दिशि पुरा सेनवंश्यैः शाहवंश्यैश्च राजभिः समाराधिते वैष्णवजनसंकुले लक्ष्मीनारायण-विराजिते मृत्खनिक्षेत्रे (मटिहान्यां) विद्योतते याज्ञवल्क्यलक्ष्मीनारायणविद्या-पीठम् ।

महापुरुषचरणरजोभिः पावितदिङ्मण्डलस्य मिथिलामहीमण्डनस्य मृत्खनिक्षेत्रस्य धार्मिकमाध्यात्मिकं गौरवं प्रतिपालयन्नद्यापि विराजते वैष्णव-मतानुयायिनां महात्मनां मटिहानीमठः। यत्रत्यस्य चमत्कारविशेषस्य दिव्या कथा सम्प्रत्यपि जनैर्गृहे सादरं कर्णातिथीक्रियते

तस्यव मठस्य गुठीसंस्थानान्तर्गतया भूसंपत्त्या याज्ञवल्क्यलक्ष्मीनारायण-विद्यापीठेमटिहानीप्रधानपाठशालायां चाधीयमानानामष्टोत्तरशतमितानां छात्राणां निःशुल्कभोजनव्यवस्था संपाद्यते ।

पुरा जनकपुरे ज्ञानकूपप्रधानपाठशाला, मटिहान्यां च मटिहानीप्रधान-पाठशालेति द्वौ विद्यालयावास्ताम् । यत्राधिकृतरूपेण पूर्वमध्यमकक्षापर्यन्त-स्याध्यापनस्य व्यवस्थायां सत्यामप्यनधिकृतरूपेण, आचार्यकक्षापर्यन्तमेवाध्ययनाऽध्यापनव्यवस्था नैकविधविद्वज्जनोत्पादनेन राष्ट्रं पुनाति स्म ।

त्रिभुवनविश्वविद्यालये सर्वात्मना सक्रिये सति द्वावेव विद्यालयौ स्नातक-स्तरपर्यन्तस्याध्ययनस्य व्यवस्थया महाविद्यालयतामापन्नौ । त्रिंशदुत्तरद्विसहस्र (२०३०)तमे विक्रमाब्दे च महाविद्यालयद्वयं नवीनशिक्षाप्रवर्तनानन्तरं निजां निजां भिन्नतां परित्यज्य याज्ञवल्क्यलक्ष्मीनारायणविद्यापीठेन नाम्नैकस्मिन्नेव विद्यापीठे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परिणतं सत् मटिहानीक्षेत्रे स्नातकस्तरपर्यन्तयोच्चशिक्षाव्यवस्थया समलङ्कृत जातम् ।

अस्मिन् विद्यापीठे संप्रति वेदव्याकरणसाहित्यज्यौतिषाणां शास्त्रीयाणां विषयाणां नेपालीमैथिलोराजशास्त्रादीनां च सहायकविषयाणामध्यापनकार्यं प्रचलति । अत्र संप्रति २१ संख्यकाः शिक्षकाः कार्यरता विद्यन्ते । सप्तत्रिंशदुत्तर-द्विसहस्र (२०३७) तमे वैक्रमाब्दे चात्र नैपालकानां संस्कृतविदुषामभूतपूर्वा श्रीमतोपकुलपतिना रामचन्द्रबहादुरसिंहमहोदयेन समुद्घाटिता विशिष्टाऽनुसन्धान-गोष्ठी संपन्ना ।

इत्थमैतिहासिकपृष्ठभूमिविलसितं पावन्या आर्यसंस्कृतेः केतुभूतं नेपाल-भारतयोः सांस्कृतिकसम्बन्धस्य सेतुभूतं संस्कृतस्य विकासे हेतुभूतं जनकनन्दिनी-जन्मभूमौ जागतिकान् जनान् सञ्जीवयति नितराम् ।

संसारस्य सभ्यताया इतिहासस्य च विकासे संस्कृतभाषया महत्वपूर्णमवदानं कृतमस्ति ।

—श्री ५ महेन्द्रः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मटिहानीमठासन्नं विद्यापीठनिकेतनम् ।
मैथिलीमहनीयायां मिथिलायां महीयते ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वाल्मीकिविद्यापीठस्य परिचयः

नगराजस्य हिमालयस्यातिपावने ऽङ्के विराजमानस्य धराधाम्नो नेपालस्य राजधान्यां पशुपतिपावितायामनिर्वचनीयसौन्दर्यराशिसमन्वितायां भगवत्या भारत्या मूर्तिमन्मन्दिरमिव, हिन्दूजनानामद्वितीयमाशाकेन्द्रमिवाऽऽर्यतत्त्वस्य मौलिकं तत्त्वमिव, शास्त्राणां सारसङ्ग्रह इव, वैदिकधर्मस्य केन्द्रबिन्दुरिव, विद्योतमानं विख्यातयशसां शेमुषीजुषां विदुषां तपःस्थलं नैकविधशास्त्रावगाहनधौतान्तःकरणानां प्रौढपाण्डित्यमण्डितानां शास्त्राणां धुरान्धारयतां विद्वद्धौरेयाणां दिव्यं साधनास्थलं युगानुकूलचेतनादीप्तमानसानां विश्वजनीनघटनाचक्रविश्लेषणपटूनां स्फीतचेतसां प्राध्यापकानां च तैस्तैर्गुणविशेषैर्विलक्षणं राष्ट्रस्यैवाऽऽदरणीयं स्पृहणीयमिवानुकरणीयमिव सारस्वतं तीर्थमस्ति महर्षेरादिकाव्यप्रणेतुर्वाल्मीकेः पावनेनाभिधानेन समञ्चितं वाल्मीकि-विद्यापीठम् ।

यत्र वेदस्य व्याकरणस्य साहित्यस्य प्राचीनन्यायस्य नव्यन्यायस्य ज्यौतिषस्य वेदान्तस्य धर्मशास्त्रस्य मीमांसायाः सर्वदर्शनस्येतिहासपुराणस्य चाधीतिबोधाचरणप्रचारणैः सह समयानुकूलानामाधुनिकविषयाणामप्यध्ययनाध्यापनव्यवस्था युगबोधसम्पन्ननिगमागममर्मज्ञलोकव्यवहारजागरूकस्नातकोत्पादने भवति परमा सहायिका ।

विश्वेषां जनानां कृत उच्चस्तरीयज्ञानसंप्रेषणसक्षमस्यास्य विद्यापीठस्य वर्तमानं यत्स्वरूपं विद्योतते तन्न सहसा समागतं न च स्वतो निर्मितमस्त्यपितु शताधिकवर्षव्यापिभिः सुकृतीनां सत्प्रयासैरङ्कुरितं पल्लवितं पुष्पितं सफलञ्च निष्पन्नमित्यत्र नास्ति सन्देहलेशलवोऽपि ।

एतत्स्वरूपसंपादनसंबद्धेतिहासपर्यालोडनक्रमेऽनादिकालादेवेयं नेपालभूमिः संस्कृतशिक्षयाऽनुप्राणितेति निष्कर्षः समुदेति । यतो हि नेपालस्येतिहासे प्रामाणिकस्य लिच्छविकालस्याभिलेखेषु तदुत्तरवर्तिनो मल्लकालस्य च काव्येषु

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नाटकेषु च संस्कृतभाषाप्रयोग एव प्रमाणयत्येतत्तथ्यम् । तदुत्तरवर्तिसमयेऽपि संस्कृतविद्यानुरागिभिर्विद्वद्भिर्निजेषु गृहेषु संमिलितान् छात्रान् गुरुकुलपद्धत्याऽध्याप्य संस्कृतभाषायाः संरक्षणसंवर्द्धनक्रमः प्रपञ्चितो वेदमूला निजा संस्कृतिः सेविता, मनुमुनिजनप्रणीता पावना परम्परा च प्रतिपालितेति विषये नास्ति विदुषामैतिह्यमर्मज्ञानां वैमत्यम् ।

वाचस्पतिपन्तप्रभृतयो बहुश्रुता विपश्चितः शासनसहयोगेन श्री ५ सुरेन्द्रविक्रमस्य शासनसमये श्री ३ जङ्गबहादुरे च प्रधानमन्त्रिपदमध्यासीने राजधान्यामेकं संस्कृतविद्यालयं स्थापितवन्त इति संस्कृतसर्वस्वैर्विद्वद्भिर्ज्ञातचर एवास्ति विषयः ।१

कालक्रमेण राजकीये संरक्षण आङ्गलशिक्षां संस्थात्मिकां विधातुं जायमानस्य प्रयासस्य परिणामः संस्कृतशिक्षायाः संस्थात्मकत्वसंपादने हेतुर्जातः । ततः चतुस्त्रिंशदुत्तरैकोनविंशतिशततमे (१९३४) विक्रमसंवत्सरे काष्ठमण्डपे राजपुष्करिण्याः (रानीपोखरी) उत्तरस्यां दिशि स्थिते ऽतिसामान्यभवन एको विद्यालयोऽभवत् समुद्घाटितः । तस्मिन्नेव भवने कियत्कालानन्तरं श्री ३ वीरशमशेरस्य कृते श्वेतप्रासादनिर्मितिप्रक्रियायां प्रारब्धायां स विद्यालयोऽष्टचत्वारिंशदुत्तरैकोनविंशतिशततमे (१९३८) विक्रमसंवत्सरे राजपुष्करिणीं निकषा वर्तमाने वर्तमानसंस्कृतमाध्यमिकविद्यालयभवने प्रापितः । तत्र व्यवस्थितरूपेण वेदव्याकरणसाहित्यादिविषयाणां मध्यमकक्षापर्यन्तमध्यापनं प्रारब्धं पञ्चपञ्चाशदुत्तरैकोनविंशतिशतमाद् (१९५५) वैक्रमसंवत्सरात् । तदनन्तरं द्विसप्तत्युत्तरैकोनविंशतिशततमे (१९७२) विक्रमाब्दे पण्डितराजसोमनाथसिग्यालमहोदये प्रधानाध्यापकपदमलङ्कुर्वति छात्राणां शिक्षकानाञ्च संख्यायां स्फीतायां प्रौढिमापन्नः स विद्यालयो नवत्युत्तरैकोनविंशतिशततमाद् (१९९०) विक्रमाब्दाचार्यकक्षापर्यन्तस्याध्ययनस्य व्यवस्थाया निरतिशयगौरवगरिम्णालङ्कृतो जातः । तदानीमपि काशीस्थराजकीयसंस्कृतमहाविद्यालयस्य पाठ्यक्रममङ्गीकृत्य विधिवदत्राध्ययनानन्तरं परीक्षाप्रदानाय काशीगमनव्यवस्था तु पूर्ववदेवाऽऽसीत् प्रचलिता ।

पण्डितराजसदृशानां धुरन्धरविदुषां सत्प्रयासेन भाविनो भाविनो राजकीयस्य संस्कृतमहाविद्यालयस्य कक्षाणां सञ्चालनस्याष्टोत्तरद्विसहस्र (२००८) तमाद् विक्रमाब्दात् तस्मिन्नेव विद्यालये जातः शुभारम्भ इव शुभारम्भः ।

---

१. अस्मिन् संबन्धे श्रीदिनेशराजपन्तमहोदयस्य सौजन्येनैकस्यैतिहासिकपत्रस्योपलब्ध्या सप्तविंशतिसमुत्तरोनविंशतिशततमे (१९२७) विक्रमाब्दे नारायणहिटीपाठशालाया अस्तित्वं सद्यःप्रमाणितमस्ति । तत्पत्रञ्चास्य सामयिकप्रकाशनस्य ८३ तमे पृष्ठे प्रकाशितमस्ति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



वाल्मीकिभवनं भव्यं नेपालशैलीसुन्दरम् ।
प्रदर्शनीपथे रम्ये राजधान्यां महीयते ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अस्य विद्यालयस्येतिहासे सौवर्णैर्वर्णैं रञ्जनीया तदानीन्तनैर्विद्वद्भिश्चिर-प्रतीक्षिताऽऽगामिभिरिदानीन्तनैश्च चिरस्मरणीया प्रभातस्योषेव सा पावनवेला संप्राप्ता नवोत्तरद्विसहस्रतमस्य (२००९) विक्रमाब्दस्य ज्येष्ठमासस्य ज्येष्ठतमे सर्वश्रेष्ठतमे चैकत्रिंशत्तमे दिवसे। यदा राष्ट्रपितुः श्री ५ त्रिभुवनस्य करकमलाभ्यां वर्तमान-गुठीसंस्थानाश्रिते पुतलीमार्गमध्यवर्तिनि भवने राजकीयस्य संस्कृतमहाविद्यालयस्य वैदिकविधिपूर्वकमुद्घाटनं सम्पन्नम्। यत्र च सर्वप्रथमं परमगौरवास्पदं प्रधानाचार्य-पदं श्रीमता पण्डितराजेन सोमनाथसिग्द्यालमहोयेनालङ्कृतम्, (कार्यकाल: २००८।९।४ तः– २०१५।१।३० पर्यन्तम्)। तत्रभवतः पण्डितराजमहाभागस्य वैदुष्यगभीरे नीतिन्यायनिपुणे ओजस्विनि सर्वजनाभिवन्द्ये नेतृत्वे चोत्तरोत्तरं महाविद्यालयेन निजा सर्वाङ्गव्यापिनी श्रीसमृद्धिर्विहिता। तदुत्तरञ्च प्राज्ञत्वेन पण्डितराजमहोदये प्रज्ञाप्रतिष्ठानं प्रति प्रस्थितवति प्रौढवैदुष्यसमलङ्कृतो देश-देशान्तरव्याप्तकीर्तिः सुकृती तत्रभवान् श्रीपद्मप्रसादभट्टराईमहाभागो (कार्यकाल: २०१५।१२।३० तः– २०२३।९।११ पर्यन्तम्) द्वैतीयकतया प्रधानाचार्यपदं विभूषयाञ्चकार। तदानीमाचार्यकक्षापर्यन्तमेव सुव्यवस्थितेनाध्ययनाध्यापनकर्मणा परं प्रमोदमापन्ना इव सर्वे एव शास्त्रीयविषया परमया श्रिया चरमेण चैश्वर्येण समन्विता जाताः। तदा च प्रौढपाण्डित्यमण्डितैः सर्वशास्त्रपण्डितैः पूर्वजमहापुरुष-निर्दिष्टपावनपरम्परयाऽखण्डितैर्धर्मसंस्कृतिसमुन्नायकैः सदाचारसहायकैः प्राध्यापकैः सद्विद्यानुरागिभिरनेकसंख्यकैरन्तेवासिभिश्च मेधाविभिः सोऽयं महाविद्यालयो राष्ट्रस्य रत्नमिव संस्कृतेर्मुकुटमिव सन् सर्वनमस्यतामङ्गीचकार।

पक्षाघातपीडया तत्रभवति पद्मप्रसादमहोदये सेवानिवृत्ते सति विद्वद्-विभूषणः श्रीरामनाथ आचार्यमहाभागः (कार्यकाल: २०२४।२।६ तः–२०३०।३।३० पर्यन्तम्) प्रधानाचार्यपदमलङ्कृत्य निजया सक्रियया सेवया महाविद्यालयस्य स्वरूपं विद्यया भौतिकसंपदा च समलङ्कृतं सम्पादितवान्।

येषां हि शास्त्रविशेषधुरन्धराणामपि निगमागममर्मज्ञानां विद्वन्मूर्धन्यानां श्रीसोमनाथ–पद्मप्रसाद–रामनाथ–बदरीनाथ–जुननाथ–शेषराज–नयराज – रामचन्द्र–सोमनाथपौडेल–कृष्णेश्वरझाप्रभृतीनां माङ्गल्यमण्डिताभिर्मेधाभिः साधनास्फूर्तदिव्यकल्पनोद्भासिताभिश्च प्रतिभाभिरिदं विद्यापीठं (तदानीन्तनश्च महाविद्यालयः) आप्लावितम्। तन्नैवास्ति विस्मरणीयम्।

द्वाविंशत्युत्तरद्विसहस्रतमे (२०२२) विक्रमाब्दे च राजकीयमहाविद्यालयीयाया आचार्यकक्षाया अध्यापनव्यवस्था कीर्तिपुरवर्तिन्याचार्यविभागे जाता। चतुर्विंशत्यु-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्तरद्विसहस्रतमे (२०२४) विक्रमाब्दे च शासनद्वारा ग्रामं पश्य (गाउँ फर्क) इत्यभियानस्य प्रवर्तनानन्तरमयं राजकीयमहाविद्यालयो महर्षेर्वाल्मीकेः पावनं नामात्मनि संयोज्य वाल्मीकिसंस्कृतमहाविद्यालयनाम्ना लोकविश्रुतो जातः। त्रिंशदुत्तरद्विसहस्रतमे (२०३०) विक्रमाब्दे च राष्ट्रे नवीनशिक्षापद्धतेः संचालनक्रमे वाल्मीकिसंस्कृतमहाविद्यालयनाम्ना पूर्वप्रसिद्धस्यास्याभिधानं जातं वाल्मीकिविद्यापीठमिति। तदानीन्तनस्य प्रधानाचार्यस्य श्रीरामनाथाचार्यमहोदयस्योर्जस्वलया सक्रियतया श्री ५ महेन्द्रस्य सदिच्छानुसारं भृकुटीमण्डपसमीपवर्ति कलात्मकप्राच्यशैलीविनिर्मितं वर्तमानं भव्यं भवनं गूठीसंस्थानेनास्य विद्यापीठस्य कृते विनिर्मितम्। ततस्तत्प्राक्तनं पुतलीमार्गस्थं भवनं विहायेदं वाल्मीकिविद्यापीठं नवीने भवने सञ्चालितं जातम्। त्रिंशदुत्तरद्विसहस्रतमस्य (२०३०) विक्रमाब्दस्य श्रावणमासादारभ्यात्र प्रमाणपत्रस्तरादनुसन्धानस्तरपर्यन्तमध्ययनाध्यापनानुसन्धानकार्याणि सन्ति सञ्चालितानि।

त्रिशदुत्तरद्विसहस्रतमाद् (२०३०) विक्रमाब्दात् प्रधानाचार्यपदस्थानापन्ने विद्यापीठप्रमुखपदे सहायकसंस्थानाध्यक्षत्वविशिष्टे स्थित्वा क्रमशो विद्वद्भिः श्रीतोयनाथपाण्डेय (कार्यकालः–०३०।४।९ तः ०३६।८।८ पर्यन्तम्)–श्रीविद्यानाथोपाध्याय (कार्यकालः– ०३६।९।११ तः ०३७।७।३० पर्यन्तम्)–श्रीसिद्धिनाथ–गौतम–(कार्यकालः ०३७।८।९ तः ०३९।८।३ पर्यन्तम्) महानुभावैर्निजे निजे कार्यकाले त्रिभुवनविश्वविद्यालयस्य नवीनशिक्षापद्धत्या निर्दिष्टमार्गेण संस्कृताध्ययनसंस्थानस्य निर्देशानुसारमस्य विद्यापीठस्य सञ्चालनकर्मणि निजनैजत्वविशिष्टं योगदानं विहितम्। सम्प्रति तस्मिन्पदे स्थित्वा युवा विद्वान् श्रीशिवहरिमरहट्टा-(कार्यकालः– ०३९।८।१६ तः) महानुभावोऽस्य विद्यापीठस्य प्रोन्नतये रचनात्मकैः क्रियाकलापैः स्वकीयां सेवामर्पयन्नस्ति। श्रीबाबुरामपोखरेल (०३६।७।१२ तः–०३७।३।१ पर्यन्तम्)–श्रीविष्णराज आत्रेय (०३७।३।२६ तः–०३७।६।७ पर्यन्तम्)-श्रीशिवहरिमरहट्टा (२०३७–६–१० तः–२०३९।८।१५ पर्यन्तम्)-महाभागैरस्य विद्यापीठस्य सहायकपीठप्रमुखपदे नियुज्य कार्यं कृतम्। इदानीञ्च (२०३९।१०।७ तः) सहायकपीठप्रमुखपदे स्थित्वा श्रीनीलमणिढुङ्गानामहाभागः स्वकीयां सक्रियतां साहाय्यञ्च प्रदर्शयन्नस्ति।

अस्य विद्यापीठस्याध्ययनाध्यापनानुसन्धानव्यवस्थाः–

प्रमाणपत्रस्तरे–

अत्र वेदव्याकरणन्यायज्यौतिषसाहित्येतिहासपुराणानां मूलविषयाणां नेपालीराजशास्त्रार्थशास्त्राणां सहायकविषयाणामाङ्ग्लभाषानेपालीनेपालपरिचयानाञ्चानिवार्यविषयाणां प्रचलति पठनपाठनव्यवस्था सुचारुरूपेण।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



जी. ए. ए. संस्थयोद्भूतां रत्नशील्डपुरस्कृतिम् ।
विजित्य मुदिताः सन्ति छात्राः प्राध्यापकैर्युताः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्नातकस्तरे–

अत्र शुक्लयजुर्वेदनव्यव्याकरणसिद्धान्तज्यौतिषप्राचीनन्यायनव्यन्याय-साहित्येतिहासपुराणपूर्वमीमांसाशाङ्करवेदान्तधर्मशास्त्रसर्वदर्शनविषयैः साधं नेपालीराजनीतिशास्त्रार्थशास्त्राणां सहायकविषयाणामाङ्गलभाषानेपाली भाषयोश्चानिवार्यविषययोरध्ययनाध्यापनादीनि कार्याणि सम्पाद्यन्ते ।

स्नातकोत्तरस्तरे–

अत्र शुक्लयजुर्वेदनव्यव्याकरणसिद्धान्तज्यौतिषप्राचीनन्यायनव्यन्याय-साहित्येतिहासपुराणपूर्वमीमांसाशाङ्करवेदान्तधर्मशास्त्रसर्वदर्शनविषयाणां विश्ले-षणप्रधाना समीक्षासमन्विता चाध्ययनप्रणाली प्रचलति संप्रति ।

अनुसन्धानस्तरे–

अत्र न्यायधर्मशास्त्रसाहित्यसर्वदर्शनराजनीतिशास्त्रनेपालीविषयेषु एकादश-संख्यका अनुसन्धातारः संलग्नाः सन्ति ।

वृत्तिविकासकार्यक्रमः–

त्रिभुवनविश्वविद्यालयस्य वृत्तिविकासकार्यक्रमानुसारमस्माद् विद्यापीठाद् वेदज्यौतिषवेदान्तसाहित्येतिहासपुराणधर्मशास्त्रविषयसंबद्धा विद्वांसो नवसंख्यका अनुसन्धातुं विद्यावारिधये मित्रराष्ट्रं भारतं प्राप्ताः सन्ति ।

श्री ५ महेन्द्रछात्रवृत्तिकार्यक्रमः–

त्रिभुवनविश्वविद्यालयस्यानुसन्धानमहाशाखायाः श्री ५ महेन्द्रछात्र-वृत्तिसंबद्धकार्यक्रमानुसारमस्य विद्यापीठस्य केचन प्राध्यापका अनुसन्धानकार्ये संलग्नाः सन्ति सांप्रतम् ।

लघ्वनुसन्धानपरियोजनाकार्यक्रमः–

संस्कृतस्य सर्वेषां शास्त्रीयाणां विषयाणां नेपालोन्मुखतया सारसंग्रह-कर्मणि नवीनतथ्यान्वेषणकार्ये च परमसहयोगिन्याः, (संस्कृताध्ययनसंस्थाना-न्तर्गताया अनुसन्धानसमित्याः) लघ्वनुसन्धानपरियोजनायाः कार्यक्रमानुसारं संप्रति तासु लघ्वनुसन्धानपरियोजनासु बहवो विद्वांसः संलग्नाः सन्ति ।

छात्रवृत्तिव्यवस्था–

छात्रवृत्तिव्यवस्थान्तर्गतमत्र विद्यापीठेऽधीयानेभ्यः १५५ सङ्ख्यकेभ्यश्छात्रेभ्यः प्रतिमासं २००।– परिमितानि रुप्यकाणि वितीर्यन्ते । छात्रवृत्तेरन्तर्गतत्वेनैव तीनधारासंस्कृतछात्रावासे भोजनादिसौविध्यप्रदानकार्यमपि सञ्चाल्यते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुस्तकालयव्यवस्था–

अस्मिन् विद्यापीठे विशालस्य प्राच्यदुर्लभग्रन्थमण्डितस्य ११४४८ संख्यकैः पुस्तकैरन्वितस्य पुस्तकालयस्य व्यवस्था विद्यते ।

रानीपोखरीसंस्कृतमाध्यमिकविद्यालयः–

नेपालराष्ट्रस्य शैक्षिकसाहित्यिकसांस्कृतिकसामाजिकधार्मिकक्रियाकलापानां समुत्थाने विहितविशिष्टयोगदानस्य पुरातनगौरवमयपृष्ठभूमिपोषितस्यास्य माध्यमिकविद्यालयस्य सञ्चालनमपि स्वपृष्ठपोषकत्वाद् विधीयते संप्रति वाल्मीकिविद्यापीठप्रशासनेन । नैपालकानां पूर्ववर्णितानां बहूनां विदुषां कर्मक्षेत्रेऽस्मिन् विद्यालये वेदव्याकरणन्यायज्यौतिषसाहित्यानां पञ्चानां मूलविषयाणां नेपालीगणितविज्ञानाङ्ग्लभाषादीनाञ्चाधुनिकविषयाणां विद्यते पठनपाठनव्यवस्था संप्रति । यत्र श्रीशुकदेवपौड्यालसदृशाः ख्यातयशसो वैयाकरणमूर्धन्याः संप्रत्यपि कार्यरताः सन्ति । श्रीदेवीप्रसादलम्सालमहोदयश्च सांप्रतमत्र प्रधानाध्यापकपदमलङ्करोति । अत्र तदानीन्तनस्य शिक्षासहायकमन्त्रिणः श्रीराजेश्वरदेवकोटामहोदयस्य प्रमुखातिथित्वे विंशत्युत्तरद्विसहस्रतमे (२०२०) वैक्रमाब्दे भव्यरूपेण पुनर्मेलनसमारोहः सम्पन्न : ।

डम्बरभीमप्रसादछात्रवृत्तिः–

श्रीमत्या भीमकुमारीथापाभिधया दात्र्या डम्बरभीमप्रसादछात्रवृत्तिनाम्ना सञ्चालिता छात्रवृत्तिव्यवस्था ३१०८५।–परिमितरूप्यकराशिसमर्पणेन । तस्य कोषनिहितस्यार्थराशेः कुसीदेन संप्रति प्रतिमासं रानीपोखरीसंस्कृतमाध्यमिकविद्यालये वेदमधीयानायैकस्मै छात्राय व्याकरणमधीयानायैकस्मै छात्राय, ज्यौतिषमधीयानायैकस्मै छात्राय च छात्रवृत्तयो दीयन्ते ।

बाबुकृष्णतिवारीछात्रवृत्तिः–

रानीपोखरीसंस्कृतमाध्यमिकविद्यालयस्य शिक्षकेण श्रीबाबुकृष्णतिवारीमहोदयेन २००००।– परिमितरूप्यकराशिं समर्प्य बाबुकृष्णतिवारीछात्रवृत्तिव्यवस्था सञ्चालिता । तदनुसारञ्च तस्यार्थराशेः कोषलब्धकुसीदेन प्रतिमासं सांप्रतं साहित्यन्यायविषयवतो रानीपोखरीसंस्कृतमाध्यमिकविद्यालयस्य द्वयोश्छात्रयोः कृते छात्रवृत्ती प्रदीयेते ।

न्यायरत्नपद्मपुरस्कारः–

प्राध्यापकः श्रीमुकुन्दनाथभट्टराईमहाभागः पूर्वमध्यम– परीक्षायां न्यायविषये सर्वाधिकानङ्कान् लब्ध्वा समुत्तीर्णाय छात्राय प्रतिवर्षं पुरस्कारं दातुमनाः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न्यायरत्नगुरोर्नाम्ना पुरस्कारविधायकः ।
प्रशस्तिपत्रकं गृह्णन् श्रीमुकुन्दो विराजते ॥



साहित्ये विषये न्याये पठतोश्छात्रयोः कृते ।
बाबुकृष्णपुरस्कारस्थापनोद्दीप्तमानसः ॥
शिक्षादिनोत्सवे (२०३९) भाति बाबुकृष्णमहोदयः ।
संस्थानाध्यक्षतो गृह्णन् प्रशंसापत्रकं मुदा ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

१५००।– परिमितमर्थराशिं समर्प्य न्यायरत्नपद्मपुरस्कारं स्थापितवान्। तदनुसारञ्च प्रतिवर्षं तादृशाय छात्राय पुरस्कारो वितीर्यते।

तीनधारासंस्कृतछात्रावाससञ्चालनम्:–

नेपालराष्ट्रस्य साहित्यिकराजनीतिकसांस्कृतिकाधिकारिकव्यक्तित्व-निर्माणस्य क्षेत्रे विहितयोगदान ऐतिहासिकगौरवालङ्कृतः संस्कृतछात्रावासो राजप्रासादस्य दक्षिणस्यां दिशि स्वरूपेण पुरातनोऽपि निजेन विशिष्टेन महत्त्वेन विद्योतते पीतवर्णालङ्कृतः। त्रयश्चत्वारिंशदुत्तरैकोनविंशतिशततमे (१९४३) विक्रमसंवत्सरे संस्थापितस्यास्य सञ्चालनं त्रिंशदुत्तरद्विसहस्र (२०३०) तमविक्रमाब्दपर्यन्तं नेपालशासनायत्तमासीत्। ततोऽयं त्रिभुवनविश्वविद्यालयान्तर्गतो जातः। संप्रति च वाल्मीकिविद्यापीठप्रशासनद्वारा छात्रवृत्तिशीर्षकसंप्राप्तस्रोतसा संचाल्यते। अत्र वाल्मीकिविद्यापीठेऽधीयानानां ७१ (एकसप्तति:) संख्यकछात्राणां रानीपोखरीसंस्कृतमाध्यमिकविद्यालयेऽधीयानानाञ्च ३५ (पञ्चत्रिंशत्) संख्यकछात्राणां कृते निःशुल्कावासभोजनादिव्यवस्था भवति। अधुनास्य छात्रावासस्य सुपरीक्षकपदे श्रीमाधवराजगौतममहाभागो वर्तते। पञ्चविंशत्युत्तरद्विसहस्रतमे (२०२५) विक्रमाब्दे श्री ५ महेन्द्रेण प्रार्थनामण्डपादि– निर्माणपुरःसरमस्य जीर्णोद्धृतिः संपादिता। तदैव तत्र श्री ५ महेन्द्रस्य शुभागमनसमये राजार्चनासमारोहश्च सुसम्पन्नः।

प्रतियोगितादयः–

वाल्मीकिविद्यापीठस्य विद्यार्थिसंघेन पूर्वं सप्तत्रिंशदुत्तरद्विसहस्रतमे (२०३७) विक्रमाब्द उपत्यकाव्यापिनीं कविता–प्रतियोगितां समायोजितवताऽस्मिन् चत्वारिंशदुत्तरद्विसहस्रतमे (२०४०) वर्षेऽपि छात्रमनीषावर्धिनी, उपत्यकाव्यापिनी सचलफलका (रनिंगशील्ड) वादविवाद-प्रतियोगिता समायोजिता। श्रीतोयनाथपाण्डेयमहाभागस्य विद्यापीठप्रमुखत्वे जी.ए.ए.द्वारा समायोजिताया मन्तर्विद्यापीठ (क्याम्पस) रत्नशील्डप्रतियोगितायामत्रत्यैश्छात्रैः, आत्माराम-घिमिरे–हृषीकेशोपाध्याय-केशवगौतमैः प्राथम्यमवाप्य रत्नशील्डविजयो विहितः।

वाल्मीकेः प्रतिमाया अनावरणम् –

एकोनत्रिंशदुत्तरद्विसहस्रतमाद् (२०२९) वैक्रमाब्दादवरुद्धस्य विद्यापीठ-वार्षिकोत्सवस्य पुनर्जागरणक्रमे समायोजिते द्वात्रिंशत्तमस्य वार्षिकोत्सवस्य पावनेऽवसरे चत्वारिंशदुत्तरद्विसहस्रतमस्य (२०४०) विक्रमाब्दस्य ज्येष्ठमासस्य एकत्रिंशत्तमे दिवसे तत्र संमिलितैर्मूर्धन्यैर्मनीषिभिर्विद्वद्भिरुच्चाधिकारिभिश्च खचिते संमाननीयैः राजगुरुभिश्च समलङ्कृते शिक्षाराज्यमन्त्रिणा सन्दीपिते विश्व-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विद्यालयस्योपकुलपति–शिक्षाध्यक्ष–रजिष्ट्रार (प्रस्तोतृ) प्रभृतिभिरुच्चाधिकारिभिः सुशोभिते तत्रागतैरनेकैश्छात्त्रैः सकौतूहलं नयनगोचरीकृते, उत्सवजन्यामोदमयकलरवगुञ्जिते वैदिकमङ्गलध्वनिसमञ्चिते वातावरणे तदानीन्तनेन प्रधानमन्त्रिणा श्रीसूर्यबहादुरथापामहोदयेन महर्षेर्नेपालाभिजनस्यादिकाव्यप्रणेतुर्वाल्मीकेः, त्रयस्त्रिंशदुत्तरद्विसहस्रतमे (२०३३) विक्रमाब्दे विद्यापीठप्राङ्गणे स्थापितायाः श्वेतप्रस्तरनिर्मितायाः प्रतिमाया विधिपूर्वकमनावरणं व्यधायि ।

विद्यापीठे जायमानानि निर्माणप्रकाशनादीनि विशिष्टकार्याणि–

विगतार्थिकवर्षे स्वीकृतेन धनराशिना प्राच्यविज्ञानस्य सिद्धान्तज्यौतिषविषयस्य प्रयोगात्मकशिक्षणाय वेधशालाया निर्मितिरप्यारब्धा वर्तते । तदर्थञ्च कानिचिदुपकरणानि सन्ति समानीतानि । वेदविषयस्य प्रायोगिक–शिक्षणाय वाल्मीकिविद्यापीठस्यैव परिसर आगामिनि ०४१–०४२ तमे आर्थिकवर्षे वर्तते यज्ञशालाया निर्माणयोजना ।

नेपालराष्ट्रियाभिलेखालये संरक्षितानां प्राच्यपाण्डुलिपीनां संकलनकार्यमपि विगतवर्षेष्विव संप्रत्यपि प्रचलदस्ति । प्राचीनहस्तलिखितग्रन्थानां सूक्ष्माध्ययनाय प्रतिच्छवियन्त्रस्य (माइक्रोफिलमरिडराख्यस्य) व्यवस्था विधीयमाना वर्ततेऽस्मिन्नेवार्थिके संवत्सरे ।

इदञ्च विद्यापीठं शास्त्रानुसन्धानपरिषदन्तर्गतां मर्यादानाम्नीं षाण्मासिकीं पत्रिकामपि प्रकाशयति ।

विद्यापीठस्य केन्द्रस्थितिजन्या विशेषता –

इदमेव विद्यापीठं वर्तते संस्कृताध्ययनसंस्थानान्तर्गताया विद्यापरिषदो विषयसमितेश्चोपवेशानामधिकृतं स्थलम् । अनुसन्धानसमितेश्च महत्त्वपूर्णानां कार्यजातानां सञ्चालनकेन्द्रमपीदमस्तीति नास्ति तिरोहितं विदुषाम् । इदमेवास्ति भूमिः त्रिभुवनविश्वविद्यालयसञ्चालितस्य कर्मकाण्डपद्धतिप्रशिक्षणकार्यक्रमस्य । इत एव सम्पाद्यन्ते सं. अ. सं. संबद्धानां पाठ्यक्रमाणां निर्माणसंशोधनादीनि कार्यजातानि ।

अत एवेदं संस्कृताध्ययनसंस्थानस्य महत्त्वपूर्णं पुरातनमैतिहासिकपृष्ठभूमिसंमानितञ्च विद्यापीठमस्तीति विदन्ति विज्ञा विद्वांसः ।

शिक्षाया नवजागरणकालादद्यावधि राष्ट्रराष्ट्रियता–संस्कृत–संस्कृतिसंरक्षणसंवर्धनविधौ वाल्मीकिविद्यापीठेन विहितं संस्मरणीयं योगदानं भविष्यति देशवासिनां कृते प्रेरणायाः पावनं स्रोतः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उपत्यकामयीं वादविवादप्रतियोगिताम् ।
उद्घाटयति मन्त्री श्रीप्रकाशचन्द्रलोहनी ॥

उपत्यकामयीं छात्र-कविताप्रतियोगिताम् ।
उद्घाटयति विख्यातो बालकृष्णसमः कविः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राजार्चनासमारोह

२०२५ तमविक्रमाब्दस्य चैत्रमासस्य २२ तमे दिवसे श्री ५ महेन्द्रेण तीनधारासंस्कृतछात्रावासे संस्कृतक्षेत्रसमर्पितमभिनन्दनमङ्गीकृतम् । तस्मिन् समये संस्कृतछात्रावासस्य महेन्द्रप्रार्थनामण्डप–पुस्तकालय–स्नानागार–भोजनालयाश्च राज्ञा सम्यगवलोकिताः । उक्तसमारोहे मुख्याञ्चलाधीश–सरदार–श्रीविष्णुमणि–आचार्यद्वारा स्वागतसमितेरध्यक्षस्य सदस्यानाञ्च राज्ञः पुरस्तात् परिचयप्रदानानन्तरं वाल्मीकिसंस्कृतमहाविद्यालयस्य प्रधानाचार्यः श्रीरामनाथ–आचार्यो राज्ञः समक्षे माल्यार्पणपुरःसरमभिनन्दनपत्रं समर्पितवान् । तदानीं निर्माणसम्बन्धिविवरणं प्रस्तुतवता प्रा.श्रीचूडानाथभट्टरायमहाभागेन संस्कृतछात्रावासस्य विविधनिर्माणकार्येषु जीर्णोद्धारकर्मणि च ३००६१९।५५ परिमितानि रूप्यकाणि व्ययीभूतानीति प्रतिपादितम् ।

समारोहस्याऽऽरम्भे महाविद्यालयस्य प्राध्यापकैरुच्चारितैर्वेदध्वनिभी राज्ञः स्वागतपुरःसरं वातावरणं गुञ्जितमासीत् । तस्मिन्नवसरे प्रधानमन्त्री सूर्यबहादुरथापा, प्रधानन्यायाधीशो भगवतीप्रसादसिंहः, राष्ट्रियपञ्चायताध्यक्षो ललितचन्दः, मन्त्रिगणोऽन्ये विशिष्टा महानुभावाश्च समुपस्थिता आसन् ।

न रत्नमन्विष्यति मृग्यते हि तत् ।

—अभिज्ञानशाकुन्तलम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनुसन्धानगोष्ठी

२०३५ वैक्रमाब्दे ज्येष्ठमासस्य १९ तमे दिवसे त्रि. वि. अनुसन्धानमहाशाखायाः समायोजनायां संस्कृतानुसन्धानस्य कृते ग्राह्यमार्ग इतिविषये सञ्जाताया द्विदिवसीयानुसन्धानगोष्ठ्याः त्रि. वि. शिक्षाध्यक्षेण श्रीकमलप्रकाशमल्लमहाभागेन समुद्घाटनं कृतम्। तत्र उपप्रा. श्रीविद्यानाथ उपाध्याय-प्रा. (रा. प. द्वि.श्रे.) श्रीश्रीकृष्णचार्य उपप्रा. श्रीरत्नेश्वरझामहाभागैः रचितं कार्यपत्रं संयोजकेन श्री विद्यानाथउपाध्यायेन प्रस्तुतम्। तस्मिन् कार्यक्रमे संस्कृताध्ययनसंस्थानाध्यक्षः प्रा. श्रीअम्बिकाप्रसादमहाभागः, अनुसन्धानमहाशाखाप्रमुखः श्रीशङ्करप्रसादप्रधानमहाभागोऽन्ये विद्वांसश्च स्वकीयान् विचारान् प्रकटितवन्तः ।

वयं (संस्कृतज्ञाः) केवलमस्माकं शास्त्रेष्वेतादृशं वर्तत इति वार्तामात्रे गर्वं गृहीत्वा स्थिता व्यावहारिका न सञ्जाता रटनात्मकविद्यायामेवाधिकं प्रयतिताः समयं परिचेतुं प्रयत्नं न कृतवन्तः, आवश्यकानुसन्धानदिशि दृष्टिमेव न दत्तवन्तः । इयमतिदुःखदा वार्ता, अस्या फलस्वरूपतो ह्यास्मासु क्रमश आत्महीनताऽऽ याता, मानसिकी दुर्बलता सञ्जाता, अनुशासनादाचरणात् सत्याच्च वयं पश्चात्पतितुमारब्धाः।

—श्री ५ महेन्द्रः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेपालक–जर्मनसंस्कृतविद्वद्गोष्ठी

संस्कृताध्ययनसंस्थानस्येतिहासे गौरवमयं स्थानं रक्षयन्ती नव्यतया भव्यतया च समायोजिता महदुद्देश्यानुप्राणिता नैपालक–जर्मनसंस्कृतविद्वद्गोष्ठ्यैकाऽभूतपूर्वा समायोजनाऽऽसीदिति विषये कस्यापि नास्ति कापि विप्रतिपत्तिः।

नैरन्तर्यमेकरसेन गतिविहीनेन कूपजलायितेन जीवनेन यथा न भवति मानसिकरूपेण स्वस्थः कश्चिदपि जागतिको जनस्तथैव भवति शिक्षाक्षेत्रस्य कस्यापि जीवनमपि । वस्तुतो रचनाधर्मितयाऽऽविष्कृतनूतनतथ्यस्य विषयगतवैविध्यालङ्कृतस्य युगानुकूलतामुपेतस्य सौविध्यचमत्कृतस्य विद्वज्जनक्रियाकलापस्य भूमिका संबद्धशिक्षाक्षेत्रे प्रोत्साहनस्याऽऽशाया विश्वासस्य च करोति सञ्चारं स्पन्दयति च तदन्तर्गतानां जनानां मानसम् । तदा सामाजिकप्रतिष्ठाया आकर्षणस्य कार्यक्षेत्रस्य च प्रश्ना भवन्ति स्वतः समाहिताः । अस्मिन् सन्दर्भे सेयं गोष्ठी खद्योतायित एकः प्रयोग आसीत् । पञ्चत्रिंशदुत्तर द्विसहस्र (२०३५) तमस्य विक्रमाब्दस्याऽऽश्विनमासस्यैकत्रिंशत्तमदिवसात् कार्त्तिकमासस्य पञ्चमदिवसपर्यन्तं जाताया गोष्ठ्याः प्रथमे दिवसे तदानीन्तनस्योपकुलपतेःश्रीजगतमोहनअधिकारिमहोदयस्य सभापतित्वे प्रा. (रा.प.प्र.श्रे.) श्री सोमनाथ पौडेल महोदयेन प्रा.(रा.प.द्वि.) श्रीदामोदरकोइरालामहोदयेन च स्वस्तिवाचने विहिते सति गोष्ठी प्रारब्धा । ततस्तदानीन्तनेन संस्कृताध्ययनसंस्थानाध्यक्षेण श्रीअम्बिकाप्रसादअधिकारिमहोदयेन स्वागतभाषणं विदधता बहुमूल्यप्रतिफलप्राप्तये पारस्परिकविमर्शाय विद्वद्गोष्ठी समभिप्रेरिता । ततस्तात्कालिकः सामान्यप्रशासनराज्यमन्त्री श्रीश्रीभद्रशर्ममहोदयः सहर्षं विद्वद्गोष्ठीं समुद्घाटयन्नेषा गोष्ठी राष्ट्रद्वयस्यैव कृते भवतु परमोपयोगिनीति मन्तव्यं प्रकटितवान् ।

तस्मिन्नवसरे गणतन्त्रजर्मनीदेशस्य महामहिमो राजदूतो नेपालस्य कृते श्रीकार्लमार्क्समहोदयः, नेपालानुसन्धानकेन्द्रस्य (नेपाल रिसर्च सेन्टर) प्रतिनिधिः प्रा. डा. श्रीमाईकेलमहोदयः, त्रिभुवनविश्वविद्यालयस्य शिक्षाध्यक्षः डा.

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीकमलप्रकाशमल्लमहोदयः, संस्कृताध्ययनसंस्थानस्य सहायकाध्यक्षो वाल्मीकिविद्यापीठप्रमुखः सहप्रा. श्रीतोयनाथपाण्डेयमहोदयः, वाल्मीकिविद्यापीठस्य छात्रप्रतिनिधिः श्रीकोषराजन्यौपाने च विद्वद्गोष्ठ्याः सकारात्मकप्रतिफलप्राप्तये स्वानि मन्तव्यानि प्रकटितवन्तः । सभापतेरासनात् श्रीमानुपकुलपतिर्जगत्-मोहनअधिकारिमहोदयश्च संस्कृतस्य शाश्वतं मूल्यं गायन् रचनात्मकमार्गेण तत्संवर्धनविधौ सर्वानेव विदुषोऽप्रेरयत् ।

षड्दिवसव्यापिन्यां तस्यां गोष्ठ्यां जर्मनदेशीया विद्वांसः– श्री ओस्कर भी. हिन्यभरः, डा. श्रीमाईकेलहानः, डा. श्रीएडवर्डगायलः डा. श्रीवर्नहार्डकोल्भरश्च पञ्च कार्यपत्राणि नैकविधानुसन्धेयविषयसंवद्धानि प्रस्तुतवन्तो जर्मनपक्षेण । नैपालका विद्वांसः सहप्रा. श्रीतोयनाथपाण्डेयः, प्रा. (रा. प. प्र. श्रे.) श्रीगोपाल–निधितिवारी, उप प्रा. डा. श्रीदेवराजपौडेलः, उपप्रा. श्रीलोकनाथढकालः, उपप्रा. श्रीखेमराज उपाध्यायः, उपप्रा. श्रीशिवहरिमरहट्टा, प्रा. डा. श्रीहरिदेवमिश्रः, उपप्रा. श्रीविद्यानाथ उपाध्यायः, उपप्रा. श्रीविष्णुराज आत्रेयः, सहप्रा. श्रीसरस्वती-प्रसादघिमिरे, उपप्रा. श्रीदुर्गाप्रसादवाडी, उपप्रा. श्रीवावुरामपोखरेलश्च चत्वारि कार्यपत्राणि नेपालपक्षतः प्रस्तुतवन्तः।

तस्मिन्नवसरे वाल्मीकिविद्यापीठस्य वेदविभागेन शुष्केष्टियज्ञः प्रदर्शितः। ज्यौतिष-विभागेनच ज्यौतिषसामग्रीणां प्रदर्शनं कृतम् । छात्रैः प्रदर्शितः शास्त्रार्थकल्पो वाद-विवादकार्यक्रमश्च। तस्मिन्नवसरे तत्र संमिलितानां विदुषां मनोरञ्जनाय संघटिताया नाटकोपसमितेरायोजनायां उपप्रा. श्रीविद्यानाथ उपाध्यायस्य संयोजकत्वे कविरत्नश्रीकृष्णप्रसादघिमिरेविरचितं नेपालगौरवंनाम रूपकं सञ्जातमभिनीतम्। तत्र मेघदूतस्य भावाभिनये उपप्रा. श्रीविद्यानाथउपाध्यायश्च प्रथमस्थानं लभन् स्वर्णपदकसमलङ्कृतो जातः ।

कार्तिकमासस्य पञ्चमे दिवसे समापनसमारोहावसरे सभायाः साभा-पत्यमङ्गीकृतं संस्थानाध्यक्षेण श्रीअम्बिकाप्रसादअधिकारिमहोदयेन । प्रमुखा-तिथेरासनञ्च समलङ्कृतं राष्ट्रियपञ्चायताध्यक्षेण श्रीरामहरिशर्ममहाभागेन । तत्र विशिष्टैरन्यैर्महानुभावैः सह सहायकशिक्षामन्त्रिणः श्रीहीरालालविश्व-कर्ममहोदस्योपकुलपतेः श्रीजगतमोहन अधिकारिमहोदयस्य च समुपस्थिति-रासीत् ।

तदा प्रा. डा. श्री माईकेलहानः, स. शि. मं. श्रीहीरालालविश्वकर्मा, सभापतिः श्रीअम्बिकाप्रसादअधिकारी, सहायकसंस्थानाध्यक्षः उपप्रा. श्रीराधाकृष्ण–अधिकारी च सामोदं स्वविचारानुपस्थापितवन्तः । तदा षोडशसदस्यीया नैपालक-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विदुषां नयपालानां जर्मनानाञ्च संस्थितिः ।
संस्मारयति तां भव्यां विद्वद्गोष्ठीं पुराकृताम् ॥



विद्वद्गोष्ठीसमाहूतविदुषां प्रीतये कृते ।
नाटके यानि पात्राणि तानि भान्ति बुधैः सह ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जर्मनविद्वत्कार्यसमितिर्मिथो विमृश्य निम्नलिखितान् प्रस्तावान् पारितवती । प्रस्तावानां सन्ति निम्नाङ्किता विन्दवः –

१. नेपालदेशस्य संस्कृतौ परम्परायां च संस्कृतस्य महत्त्वपूर्णं स्थानं वरीवर्ति। अतः स्वसंस्कृतेः स्वपरम्परायाश्च संरक्षणाय संस्कृतशिक्षाया राष्ट्रव्यापि प्रसारणमावश्यकम् ।

उपर्युक्तोद्देश्यप्राप्त्यर्थं साधारणशिक्षाक्षेत्रेऽपि चतुर्थकक्षातः स्नातककक्षा-पर्यन्तं संस्कृतमनिवार्यतया निर्धारणीयम्, कर्मकाण्डस्य ज्यौतिषस्य सत्यावश्यके विषयान्तराणां च प्राविधिकी शिक्षा च दातव्या ।

नेपालस्य परम्परागतसंस्कृतशिक्षणस्यानुसन्धानपद्धतेः शर्मण्यदेशस्या-धुनातनसंस्कृतशिक्षणस्यानुसन्धानपद्धतेश्च परस्परं विनिमय आवश्यकः। कार्य–मिदमधोङ्कितानुसारं प्रारब्धव्यमिति पक्षयोरुभयोः सम्मतिः । यथा–

(क) उभयोः पक्षयोर्विदुषां छात्राणां ग्रन्थानाञ्चाऽऽदानप्रदानाभ्याम् ।

(ख) उभयोर्देशयोर्विश्वविद्यालयेषु चाऽऽगन्तुकप्राध्यापकपदं संस्था-प्यैतदद्वारा परम्परागताधुनातन्योः शिक्षणानुसन्धानपद्धत्योर्विनिमयेन ।

(ग) छात्राणां चोभयपक्षीयाणां परस्परं विनिमयेन ।

२. विनिमयकार्यक्रमे प्रारब्धे नैपालक–जर्मनविदुषां संयुक्तकार्यक्रमश्च संचालनीयः । अस्य च कार्यक्षेत्रमधोऽङ्कितं भविष्यति –

(क) मूर्तिनिर्माणविषयकसंस्कृतग्रन्थसम्पादनम् ।

(ख) स्वयम्भूपुराणस्य तत्सदृशानामन्येषाञ्च ग्रन्थानां सम्पादनम्।

वैदिकविधानानां शास्त्रीयमधुना प्रचलितं च प्रयोगविधिमनुसृत्य तुलनात्मकमध्ययनम् । ज्यौतिषग्रन्थानामध्ययनम् ।

तान्त्रिकग्रन्थानां तेषां विधिप्रयोगाणाञ्चाध्ययनम् । संस्कृते निबद्धानां संस्कृतोपयोगिनामन्येषां जर्मनग्रन्थानां पत्रपत्रिकादीनां नेपाले, नैपालकानाञ्च शर्मण्यदेशे विनिमयकार्यक्रमसंचालनायोभयोर्देशयोः सम्बद्धाधिकारिणः प्रार्थनीयाः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनुसन्धानप्रविधिगोष्ठी

२०३७ तमे वैक्रमाब्दे श्रावणमासस्य २८ तमे दिवसे डा. श्रीहरिदेवमिश्रमहाभागस्य सभापतित्वे द्विदिवसीयानुसन्धानप्रविधिगोष्ठी समायोजिता वाल्मीकिविद्यापीठस्य सभाकक्षे। तस्यां डा. श्रीजगदीशचन्द्ररेग्मी डा. श्रीप्रेमरमणउप्रेतिमहाभागाभ्यां प्रस्तुतस्य कार्यपत्रस्य डा. श्रीदेवराजपौडेल– डा. श्रीवल्लभमणिदाहालाभ्यां समीक्षा कृता। तस्मिन् समारोहे संस्कृताध्ययनसंस्थानस्य सहायकसंस्थानाध्यक्षौ श्रीविद्यानाथउपाध्यायश्रीबाबुरामपोखरेलमहाभागौ त्रि. वि. अनुसन्धानमहाशाखाप्रमुखो डा. श्रीशङ्करप्रसादप्रधान–महाभागोऽन्ये वक्तारश्चानुसन्धानप्रविधिसम्बन्धे स्वविचारं प्रकटितवन्तः। गोष्ठ्या द्वितीये दिवसे श्रावणस्य २९ तमे दिवसे विसर्जनसमारोहश्च संघीयगणतन्त्रजर्मनीदेशस्य कृते नेपालस्य महामहिमराजदूतस्य श्रीरामहरिशर्मणः सभापतित्वे शिक्षामन्त्रिणो माननीयस्य श्रीमरीचमानसिंहस्य प्रमुखातिथित्वे सुसम्पन्नः। तस्मिन् समारोहे श्रीखेमराजउपाध्याय–सहायकविद्यापीठप्रमुखश्रीविष्णुराजआत्रेयप्रभृतयो वक्तारोऽपि स्वकीयविचारं प्रकटितवन्तः।

शैले शैले न माणिक्यं मौक्तिकं न गजे गजे।
साधवो नहि सर्वत्र चन्दनं न वने वने ॥

सुभाषितरत्नभाण्डागारम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



बुधो हरिप्रसादाख्यः कार्यंपत्रस्य लेखकः ।
पौरस्त्यविधये तत्र कुरुते तस्य वाचनम् ॥

वसुशक्तिनभोनेत्रे (२०३८) विक्रमादित्यवत्सरे ।
अनुसन्धानसद्गोष्ठ्यां पौरस्त्यविधिसंविदि ॥
समीक्षां कार्यपत्रस्य नैयायिकशिरोमणिः ।
मटिहान्यां विधत्तेऽसौ गङ्गाधरपराजुली ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उपकुलपतिः श्रीमान् रामचन्द्रवहादुरः ।
अञ्चलाधीशडीनाभ्यां महन्तेन बुधैः सह ॥
अनुसन्धानगोष्ठीं तां पौरस्त्यविधिपूर्विकाम् ।
समुद्घाटय मुदाऽऽविष्टो मटिहान्यां बिराजते ॥

भाति कमलमल्लोऽयं शिक्षाध्यक्षपदान्वितः ।
गोष्ठीमुद्भासयन् प्राज्ञैरनुसन्धानपूर्विकाम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पौरस्त्यानुसन्धानपद्धतिगोष्ठी

२०३८ तमविक्रमसंवत्सरस्य फाल्गुनमासस्य २४ तमे दिवसे महोत्तरी-जनपदान्तर्गते याज्ञवल्क्यलक्ष्मीनारायणविद्यापीठे मटिहानीमठस्य महन्तस्य श्रीकौशलकिशोरदासमहाभागस्य सभापतित्वे सम्पन्नायाः पौरस्त्यानुसन्धानपद्धति-गोष्ठयास्त्रिभुवनविश्वविद्यालयस्योपकुलपतिना श्रीरामचन्द्रबहादुरसिंहमहाभागेन समुद्घाटनपुरःसरं संस्कृतस्यानुसन्धानविषये संस्कृताज्ञानां कर्तव्यं विज्ञापितम्। तस्मिन्नवसरे जनकपुराञ्चलाधीशः श्रीलालकाजीगुरूङ्गमहाभागोऽपि स्वमन्तव्य-मुपस्थापितवान्। संस्कृताध्ययनसंस्थानाध्यक्षेण प्रा. श्रीतोयनाथपाण्डेयमहाभागेन स्वागतभाषणं कृतम्। तत्र सह प्रा. श्रीहरिप्रसादआचार्यमहाभागेन "अनुसन्धान-विषयपौरस्त्यपद्धतिदिग्दर्शनम्" इति विषये कार्यपत्रं प्रस्तुतम्। तस्य च समीक्षा सहप्रा. श्रीगङ्गाधरपराजुलीमहाभागेन कृता। तस्यां गोष्ठयाम् "अनुस-न्धानसञ्चालनं, नेपाले संस्कृतानुसन्धानसरणिः" चेति विषयद्वयविवेचनाय समूह-द्वयं संघटितमासीत्। अनुसन्धानसञ्चालनसमूहस्य संयोजकः सहप्रा. श्रीगङ्गाधर-पराजुलीमहाभागः सहसंयोजकश्च उपप्रा. श्रीशिवहरिमरहट्टामहाभागश्चाऽऽसीत्। नेपाले संस्कृतानुसन्धानसरणिसमूहस्य संयोजकः उपप्रा. श्रीलोकनाथढकाल-महाभागः सहसंयोजकश्च सहप्रा. श्रीविष्णुराजआत्रेयमहाभाग आसीत्।

परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणाम्।
धर्मे स्वीयमनुष्ठानं कस्यचित् सुमहात्मनः॥

सुभाषितरत्नभाण्डागारम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पाठ्यक्रमविषयकानुसन्धानगोष्ठी

२०४० विक्रमसंवत्सरस्य ज्येष्ठमासस्य १२ तमदिवसात् १४ तमदिवसपर्यन्तं प्रचलितायाः त्रि. वि. संस्कृताध्ययनसंस्थानेन दाङ्गविल्वकुञ्जवर्तिस्वकीयकार्यालयपरिसरे समायोजितायाः पाठ्यक्रमविषयकगोष्ठ्याः शिक्षाध्यक्षेण श्रीचन्द्रप्रसादगोर्खालीमहाभागेन समुद्घाटनं कुर्वता तत्सम्बन्धे प्रवचनं कृतम् । संस्कृताध्ययनसंस्थानाध्यक्षेन प्रा. श्रीतोयनाथपाण्डेयमहाभागेन च स्वविचाराः प्रकटिताः । पाठ्यक्रमविकासकेन्द्रस्य कार्यवाहक उपनिर्देशकः श्रीवेदनाथरेग्मी, कार्यपत्रलेखकाः सहप्रा. श्रीविद्यानाथ उपाध्याय सहप्रा. श्रीदुर्गाप्रसाददवाडी उपप्रा. श्रीवेणीमाधवढकालमहाभागाः, सं. अ. सं. सहायक–संस्थानाध्यक्षः सहप्रा. श्रीशिवहरिमरहट्टामहाभागः, तस्याः सभायाः सभापतिः सहप्रा. श्रीगङ्गाधरपराजुलीमहाभागश्च स्वकीयान् विचारान् प्रकटितवन्तः ।

षष्टिसंख्यकैः सहभागिभिः समन्वितायां तस्यां गोष्ठ्यां सहायकसंस्थानाध्यक्ष उपप्रा.श्रीगोविन्दकोइराला,जनताविद्यापीठप्रमुखः सहप्र. श्रीरामेश्वरशर्मा,पिण्डेश्वरविद्यापीठप्रमुखः सहप्रा. श्रीपुरूषोत्तमभट्टराई,वाल्मीकिविद्यापीठस्य सहायकपीठप्रमुखः उपप्रा.श्रीनीलमणिढुङ्गाना, प्रा.श्री खेमराजउपाध्यायः प्रा. श्रीटीकाप्रसादवस्ती, उपप्रा. श्रीसोमनाथपौडेलः, सहप्रा. श्रीशिवराजआचार्यः, प्रा. श्रीहरिप्रसादआचार्यः, अनुसन्धानशाखाप्रमुखः– उपप्रा. श्रीदिनेशराजपन्तः सहप्रा. श्रीतीर्थराजसुवेदी, सहप्रा. श्रीऋषिरामपोखरेलः, सहप्रा. श्रीविष्णुराजआत्रेय इत्यादयोऽनेके प्रवक्तृमहाभागाः पाठ्यक्रमस्य विभिन्नपक्षेषु स्वविचारं प्रकटितवन्तः । तस्यां गोष्ठ्यां शास्त्रीयविषयाणां पृथक् पृथक्समालोडनाय विषयगतं समूहविभाजनं कृतमासीत् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पाठ्यक्रमानुसन्धानगोष्ठ्या उद्घाटनक्रमे ।
चन्द्रप्रसादगोर्खाली शिक्षाध्यक्षपदान्वितः ॥
तोय-विद्या-शिवैः सार्धं दाङ्गस्थे विल्वकुञ्जके ।
संस्कृताधीतिसंस्थान आलपन् वर्तते मुदा ॥

ज्यौतिषस्य प्रयोगाय यन्त्रं वैज्ञानिकं नवम् ।
दर्शयन् दर्शकान् भाति जोशी केशवनामकः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृतानुसन्धानसरणिगोष्ठी

संस्कृताध्ययनसंस्थानस्याऽयोजनायां सुनसरीजनपदान्तर्गते धरानस्थे पिण्डेश्वरविद्यापीठे, एकचत्वारिंशदुत्तरद्विसहस्र (२०४१)तमस्य विक्रमाब्दस्य ज्येष्ठ-मासस्याष्टमदिवसाद् दशमदिवसपर्यन्तं त्रिदिवसीयाऽनुसन्धानगोष्ठी संपन्ना ।

त्रि. वि. वि. शिक्षाध्यक्षस्य डा. श्रीचन्द्रप्रसादगोर्खालीमहाभागस्य प्रमुखातिथित्वे पूर्वाञ्चलक्षेत्रीयशिक्षानिर्देशकस्य श्रीदेवराजरेग्मीमहाभागस्य साभापत्ये प्रथमदिवसीये कार्यक्रमे समारब्धे वैदिकमङ्गलध्वनिभिः श्री ५ महाराजाधिराजस्य श्री ५ महाराज्ञ्याश्च चित्रयोर्माल्यार्पणे विहिते सति संस्कृताध्ययनसंस्थानस्याध्यक्षः प्रा. श्रीतोयनाथपाण्डेयमहाभागः स्वागत–भाषणं कुर्वन् संस्कृताध्ययन-संस्थानस्यानुसन्धानसम्बन्धिनं गतिविधिं विस्तृततया प्राकाशयत् ।

प्रमुखातिथिः श्रीगोर्खालीमहोदयः संस्कृतवाङ्मये संरक्षितं ज्ञानराशिं जनजीवनेऽनुसन्धानमाध्यमेन प्रापयितुं सर्वान् संस्कृतज्ञान् विदुषोन्यवेदीत् ।

कार्यपत्रलेखकाः उपप्रा. श्रीगोपालनिधितिवारी, सहप्रा. डा. श्रीदेवराजपौडेलः, उपप्रा. डा. श्रीवीरदेवविष्टश्चाऽऽसन् । तेषां प्रातिनिध्यं कुर्वन् डा. पौडेलोऽनुसन्धानसरणिमहत्त्वविषये स्वविचारं प्रकटितवान् ।

राष्ट्रियाभिलेखालयस्य प्रमुखः श्रीवलरामडङ्गोलमहोदयः संस्कृते सञ्चितं ज्ञानराशिमुपयोक्तुं संस्कृतविद्वद्भिर्महान् प्रयासो विधेय इति स्वमन्तव्यं प्रकटित–वान् ।

समारोहस्य सभापतिपदमलङ्कुर्वता श्रीरेग्मीमहाभागेन संस्कृतक्षेत्रस्य नैकविधानि वैषम्यविद्धानि काठिन्यानि विविच्य तन्निराकरणाय संस्कृतज्ञैः समर्पितै–र्भाव्यमिति निर्दिष्टम् ।

संस्कृताध्ययनसंस्थानस्य सहायकाध्यक्षः सहप्रा. श्रीशिवहरिमरहट्टामहाभाग-श्चानसन्धानसरणिगोष्ठीसञ्चालनस्यानिवार्यामावश्यकतां प्रतिपादयन् तत्र समुप-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्थितेभ्यः सर्वेभ्यः साधुवादान् व्यज्ञापयत् । तस्मिन् समारोहे पूर्वाञ्चलस्य ख्यातयशसः पं. श्रीछविलालपोखरेल. –पं. श्रीदीनानाथपौडेल –पं. श्रीशालिग्रामपौडेलमहाभागाः, अधिवक्ताश्रीगोपालप्रसादखनालोऽन्ये च संस्कृतानुरागिणो जनाः संस्कृतशिक्षाया महत्त्वविषये स्वमन्तव्यानि प्राकाशयन् ।

तस्मिन्नेव दिवसे संस्कृताध्ययनसंस्थानस्य सहायकाध्यक्षस्य उपप्रा. श्रीगोविन्दकोइरालामहाभागस्य सभापतित्वेऽनुसन्धानगोष्ठ्याः कार्यक्रमः प्रारब्धस्ततः सहप्रा.डा. श्रीदेवराजपौडेलः कार्यपत्रवाचनमकरोत् । ततः कार्यपत्रसमीक्षकेण प्रा. श्रीविद्यानाथ-उपाध्यायेन कार्यपत्रस्य सर्वाङ्गव्यापिनी समीक्षा कृता ।

समीक्षानन्तरं प्रा. श्रीऋषिराम पोखरेलः, प्रा. (रा. प. द्वि. श्रे.) श्रीसिद्धिनाथगौतमः, उप प्रा. श्रीदिनेशराजपन्तः, सह प्रा. श्रीरामेश्वरशर्मा, उपप्रा. श्रीछविलालपोखरेलः, उप प्रा. श्रीपुष्करनाथपोखरेलः, उपप्रा. श्रीमाधवभट्टराई, उपप्रा. श्रीस्थानेश्वरगौतमः, उपप्रा. श्रीरामचन्द्रगौतमः, उप प्रा. श्रीटीकारामअधिकारी, सहायक, प्रा. श्रीरमेशचन्द्रअधिकारी, उप प्रा. श्रीलेखनाथ आचार्यः, उपप्रा. श्रीश्रीधरपन्तः, उपप्रा. श्रीसाम्बराजआचार्यः, उप प्रा. श्रीविष्णुप्रसादज्ञवाली, उपप्रा. श्रीगोविन्दचौधरी, उपप्रा. श्रीनीलमणिढुङ्गाना, उपप्रा. श्रीवेणीमाधवढकालः, प्रा. (रा. प. द्वि. श्रे.) श्रीशिवप्रसादसत्यालः, प्रा. श्रीहरिप्रसादआचार्यः सहप्रा. श्रीटीकाप्रसादवस्ती च कार्यपत्रस्य विभिन्नानंशान् लक्ष्यीकृत्य निजानि मन्तव्यानि प्राकाशयन् ।

ततः कार्यपत्रनिर्माणसमितेः सदस्य उपप्रा. डा. श्रीवीरदेवविष्टः समीक्षायाः प्रसङ्गे समागतानां टिप्पणीनां विषये कार्यपत्रनिर्माणसमितेश्चिन्तनं मन्तव्यञ्चोपस्थापयन् साध्वीः संमतीः कार्यपत्रे निश्चप्रचमेव स्वागतार्हा भविष्यन्तीत्युक्तवान् । कार्यपत्रसमितेरपरः सदस्यः सहप्रा. डा. श्रीदेवराजपौडेलश्च तत्र निजां सहमतिं प्रत्यपादयत् ।

गोष्ठ्या अन्तिमदिवसे संस्कृताध्ययनसंस्थानाध्यक्षस्य प्रा. श्रीतोयनाथपाण्डेयमहाभागस्य सभापतित्वे कार्यक्रम प्रारब्धयः । प्रारम्भे, उप प्रा. श्रीपुष्करनाथपोखरेलः सह प्रा. श्रीटीकाप्रसादवस्ती च संस्कृतसंरक्षणसम्वर्धनविधौ स्वीयं विचारं प्राकटयताम् ।

ततः 'संस्कृताध्ययनसंस्थानस्य कृते ग्राह्यमार्गः' इति नाम्ना सङ्घटितस्य समूहस्य संयोजक आ.प्रा. श्रीकेशवरामजोशी, अनुसन्धानस्य पौरस्त्यविधेः पाश्चात्त्यविधिना सह सम्बन्धः, इति नाम्ना सङ्घटितस्य समूहस्य संयोजक प्रा. श्रीहरिप्रसादआचार्यश्च स्वस्वसमूहगतं प्रतिवेदनमपठताम् । तदनन्तरं प्रा. श्रीविद्यानाथोपाध्यायः, उपप्रा. श्रीवेणीमाधवढकालः, सहप्रा. श्रीरामेश्वरशर्मा, उपप्रा. श्रीनारायण–

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिक्षाध्यक्षेण गोर्खालीमहाभागेन मण्डिते ।
सभाध्यक्षेण क्षे. शि. नि. देवराजेन नन्दिते ॥
पीठे पिण्डेश्वरे डीनस्तोयनाथमहोदयः ।
गोष्ठ्यारम्भे ददात्यत्र स्वीयं स्वागतभाषणम् ॥

शिक्षादिनसमारोहे शास्त्रज्ञानां शिरोमणिः ।
गङ्गाधरो वदन् भाति प्रमुखातिथिरूपतः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पौडेलः, उपप्रा. श्रीविष्णुप्रसादज्ञवाली, प्रा. श्रीहरिप्रसादआचार्यः, उपप्रा. श्रीपुष्करनाथःपोखरेलः, सहायक प्रा. श्रीरमेशचन्द्रअधिकारी, उपप्रा. श्रीमधुसूदन-रिसालः, उपप्रा. श्रीछविलालपोखरेलः, प्रा. श्रीऋषिरामपोखरेलः, उपप्रा. श्री अम्बीरपान्डे, उपप्रा. श्रीदत्तात्रेयदाहालश्च प्रतिवेदनसम्बन्धे निजानि समीक्षात्मकानि मन्तव्यानि प्रस्तुतवन्तः । तस्मिन्नवसरे पिण्डेश्वरविद्यापीठस्य छात्रप्रतिनिधिः श्रीजनार्दनवस्ती संस्कृतछात्राणां समसामयिकानि काठिन्यानि प्रत्यपादयत् ।

संस्कृताध्ययनसंस्थानस्यानुसन्धानसमितेः सदस्यसचिव उपप्रा. श्रीदिनेश-राजपन्तः संस्कृताध्ययनसंस्थानस्य वर्तमानामनुसन्धानसम्बन्धिनीं नीतिमागामि-वर्षेष्वनुसरणीयां नीतिश्च व्यज्ञापयत् । संस्कृताध्ययनसंस्थानेनाऽऽशुसम्पा-दनीयानामनुसन्धानसम्बद्धानां नैकविधकार्याणां विस्तृतरूपेण चर्चां कुर्वता पन्त-महोदयेन सेयमनुसन्धानसरणिः पूर्णरूपेण परिमार्जिता सती प्रस्तुता भविष्यतीति निजं मन्तव्यं प्रकाश्य गोष्ठ्याः साफल्यसम्पादने सहभागिभ्यः सहयोगिभ्यश्च साधुवादाः प्रदत्ताः ।

तस्मिन्नवसरे पिण्डेश्वरविद्यापीठप्रमुखः सहप्रा. श्रीपुरुषोत्तमभट्टराई, उपप्रा. श्रीछविलालपोखरेलः, नेपालराष्ट्रियाभिलेखालयस्य प्रमुखः श्रीवलरामदास–डंगोलः, प्रा. श्री हरिप्रसाद आचार्यः, जनताविद्यापीठप्रमुखः सहप्रा. श्रीरामेश्वरशर्मा च संस्कृतस्य संरक्षणसम्वर्द्धनपुरस्सरं समसामयिकत्वसम्पादन आधुनिकीकरणे च मूल्यवतो विचारानुपस्थाप्य गोष्ठ्याः साफल्यसम्पादने प्रमुखां भूमिकां निजां प्रदर्शितवन्तः ।

तदानीं सभापतिपदमलंकुर्वन् संस्कृताध्ययनसंस्थानाध्यक्षः प्रा. श्री तोयनाथ-पाण्डेयः संस्कृतक्षेत्रसम्बद्धानां नैकविधानां काठिन्यानां नानाविधानाञ्चावरोधानां निराकरणाय संस्कृतज्ञैर्विद्वद्भिः संस्कृतसमर्पितैर्भाव्यमिति संस्कृतज्ञानप्रेरयत् ।

संस्कृताध्ययनसंस्थानस्य सहायकाध्यक्षो वाल्मीकिविद्यापीठप्रमुखः सह–प्रा. श्री शिवहरिमरहट्टामहाभागः संस्कृतसम्बद्धान्नानाविधाननुसन्धेयान् विषयान् पुरस्कृत्य क्रमशः संस्कृताध्ययनसंस्थानान्तर्गतेषु विद्यापीठेषु सम्पन्नानामनुसन्धान-गोष्ठीनां सविवरणमुपलब्धिं प्रतिपादयन् तत्र सहभागिनः सर्वानेव जनान् विद्यापीठपरिवारतः साधुवादैरलङ्कृतानकारयत् ।

अघटितघटितं घटयति
सुघटितघटितानि दुर्घटीकुरुते ।
विधिरेव तानि घटयति
यानि पुमान् नैव चिन्तयति ।।

सुभाषितरत्नभाण्डागारम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृतपरिचर्चाकार्यक्रमः

अष्टत्रिंशदुत्तरद्विसहस्र (२०३८) तमस्य विक्रमाब्दस्य भाद्रमासस्य पञ्चविंशतितमे दिवसे राजधान्यां वाल्मीकिविद्यापीठे संस्कृतपरिचर्चाकार्यक्रमः सुसम्पन्नः ! यत्र विशिष्टैर्जनैर्मूर्धन्यैर्विद्वद्भी राजनीतिज्ञैर्महानुभावैः परिचर्चाक्रिमे संस्कृतस्य संस्कृतेश्च विषये निजानि मूल्यभाञ्जि मन्तव्यानि प्रदत्तानि ।

अस्य कार्यक्रमस्य सभापतिपदमलङ्कुर्वता सम्माननीयेन राजगुरुणा श्रीजुननाथपण्डितमहोदयेन प्रोक्तम्– संस्कृतमेव संस्कृतेर्मूलमस्ति स्रोतः। संस्कृतस्य शास्त्रीयं वैदुष्यं संरक्ष्य युगानुकूलतया तच्च सम्पादनीयं क्रियात्मकमपि संस्कृत समर्पितैर्विद्वद्भिः। अनेन संस्कृतेः शाश्वती धारा, आसूर्यचन्द्रं स्थास्यति।

तत्र प्रमुखातिथिपदमलङ्कुर्वता माननीयेन शिक्षासंस्कृतिमन्त्रिणा श्रीनारायणदत्तभट्टमहोदयेनोक्तम्–संस्कृतमस्ति भाषायाः साहित्यस्य च मूलं स्रोतः संस्कृतस्य संरक्षणपुरःसरं तद् युगानुकूलं गतिशीलञ्च सम्पाद्य जनमानसेऽस्य धारा गङ्गायाः पावनी धारेव प्रवाहनीया ।

तस्मिन्नवसरे माननीयेन निर्माणयातायातमन्त्रिणा श्रीकाशिनाथगौतममहोदयेनोक्तम्– संस्कृतशिक्षा भवेत् संस्कृतिशिक्षणमूला। अस्माकं राष्ट्रियसंस्कृतेः समुत्थानाय संस्कृतभाषायाः पुनरुत्थानं परमावश्यकं प्रतिभाति। नेपालशासनमस्यां दिशि गम्भीरतया पादचारं विधास्यतीत्याशासे ।

तदा माननीयेन श्रीश्रीभद्रशर्ममहोदयेनोक्तम्– पाश्चात्यशिक्षाया अन्धानुकरणेन राष्ट्रस्य सर्वेषु गतिविधिषु पश्चिमीकरणस्य प्रभावः परिलक्ष्यते। फलस्वरूपञ्च संस्कृतेर्मूलतत्त्वान्यङ्गीकर्तुमद्यानुभूयमाने आत्महीनतात्मलघुते परिहृत्यास्माभी राष्ट्रधर्मसंस्कृतिसंबद्धेषु पक्षेषु स्वाभिमानिभिर्भाव्यम् । अस्मिन् सन्दर्भे धर्मसंस्कृत्योराधारशिला संस्कृतभाषैव भवति परमा सहायिका ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृतपरिचर्चायां गायन् संस्कृतवैभवम् ।
नारायणाभिधो भट्टः शिक्षामन्त्री सुशोभते ॥

संस्कृतपरिचर्चायां निजभावं प्रकाशयन् ।
मञ्चे शिष्टैर्विशिष्टेऽसौ सिद्धिनाथः सुशोभते ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदानीं भूतपूर्वसंस्कृताध्ययनसंस्थानाध्यक्षेण प्रा. श्रीअम्बिकाप्रसाद-अधिकारिमहोदयेन नेपालस्य राष्ट्रियसंस्कृतेः सम्वर्धने संस्कृतस्य योगदानमिति विषये प्रवचनं कुर्वतोक्तम्- अस्माकं संस्कृतिः पुण्यश्लोकानां महापुरुषाणां पावनैराचरणैर्निर्मिता पुष्टा सम्पन्ना वर्तते। अस्मत्संस्कृतिराचारेण मर्यादयाऽनुशासनेन नियन्त्रिता, पवित्रैः सन्देशैर्विश्वमाङ्गल्यभावनाभिश्चानुप्राणिता दर्शनगभीरा च वर्तते। अस्यानुयायिनो जनान् यदीतरे धर्षयन्ति तदा राष्ट्रेण नैव मौनमाकलनीयम्। संस्कृतौ विलुप्तायां वयं विलुप्ता भविष्यामः। इयं संस्कृतिर्वर्तते राष्ट्रस्य स्पन्दनम्। अस्याः संरक्षणाय संस्कृतस्य संरक्षणं राजभिः प्रजाभिश्च सर्वतोभावेन कर्तव्यम्।

तस्मिन्नवसरे संस्कृताध्ययनसंस्थानाध्यक्षेण प्रा. श्रीतोयनाथपाण्डेयमहाभागेनोक्तम्– राष्ट्रियताया मर्मज्ञानाय धर्मसंस्कृत्योः परिज्ञानं भवत्यावश्यकम्। अस्मद्धर्मसंस्कृत्योः सत्यस्वरूपबोधाय केवलं संस्कृतवाङ्मयमेव भवति सहायकम्। अतः संस्कृतेः संरक्षणाय संस्कृतमत्यावश्यकमस्ति। वैदिकविधिना मूर्धाभिषिक्तैर्भूपतिभिः पालितस्यास्य राष्ट्रस्य राजसंस्थायाः संरक्षणायापि संस्कृतमनिवार्यमस्ति।

तदानीं विदुषा श्रीमता श्रीपूर्णप्रसादब्राह्मणमहोदयेनोक्तम्– राष्ट्रियजागरणे नेपालस्य, संस्कृतक्षेत्रेण कृतमस्त्यभूतपूर्वं योगदानम्। अस्योदाहरणतया विद्यते जयतु संस्कृतमित्यभियानम्। यद्यप्युक्ताभियानस्य पूर्णतया लक्ष्यप्राप्तिर्नैव जाता, तथापि तदभियानं राष्ट्रस्येतिहासे निजं किमपि वैशिष्ट्यं धत्ते। तदभियानानुकूलं संस्कृतस्य संस्कृतेश्च संवर्धनायास्माभिर्यतनीयम्।

तदा श्रीमत्या– अङ्गूरबाबाजोशीमहोदययोक्तम्– राष्ट्रस्य सांस्कृतिकगतिविधिसंवर्धनक्रमे नारीणां सहभागितासंवर्धनाय स्वस्थसन्तानोत्पत्तये च रामायणमहाभारतयोः शिक्षाप्रदानेन नारीजातेः संस्कारः परिष्करणीयः। इत्थमस्मत्संकृतिः सर्वजनहृदयगम्या चिरस्थायिनी च भविष्यति निश्चप्रचम्।

तस्मिन् प्रसङ्गे श्रीअच्युतराजरेग्मीमहोदयेनोक्तम्– अस्मत्सभ्यताया मूलं संस्कृतौ निहितमस्ति, संस्कृतिश्च संस्कृते वर्तते सन्निहिता, संस्कृतञ्च संस्कृतज्ञेषु जनेषु निहितं सन् नावीन्येन प्रस्तोतुमिच्छति निजं स्वरूपम्। अतः तत्तथा विधातुं संस्कृतज्ञैः संस्कृतानुरागिभिश्च प्रयासो विधेय इति।

तस्मिन्नवसरे सहप्रा. श्रीराधाकृष्णअधिकारिमहोदयेनोक्तम्– धर्मशास्त्रानुकूलेनाऽऽचरणेनैवास्माकं संस्कृतिर्भविष्यति चिरस्थायिनीति।

तदा स्वागतभाषणं कुर्वता तदानीन्तनेन सहायकसंस्थानाध्यक्षेण वाल्मीकि-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विद्यापीठप्रमुखेन प्रा. (रा.प.द्वि श्रे.) श्रीसिद्धिनाथगौतममहोदयेनोक्तम्-राजप्रशस्त्यां राष्ट्रियचिह्नेष्वलङ्कारपदकादिषु च संस्कृतस्यैव प्रभावः प्राप्यते। संस्कृतमेव नेपालजनजीवने चिन्तनमननादिषु प्रोतं सदनुप्राणितमिति संस्कृतेन शून्या वयं सारशून्या एव भवामः। अतः संस्कृतस्य सर्वात्मना विकासकरणमस्माकं परमं कर्तव्यमस्ति।

तदानीन्तनेन सहायकविद्यापीठप्रमुखेन उपप्रा. श्रीशिवहरिमरहट्टामहोदयेनोक्तम्– राष्ट्रनिर्मातुः श्री ५ पृथ्वीनारायणस्य सर्वजातीनां सर्ववर्णानाञ्च वाटिकायामस्यां मातृभूमौ पृथ्वीनारायणसंरक्षिताया लोकपावन्याः सनातनसंस्कृत्याः संरक्षणायास्मद्राजपरम्पराभिः प्रतिपालिता निगमागमगभीरा साहित्यसङ्गीतकलानिनादिनी मानवधर्मप्रतिपादिनी संस्कृतभाषा संरक्षणीया स्वात्मसमर्पणेनापि।

अस्मिन् कार्यक्रमे छात्रसंघप्रतिनिधिना श्रीपुरुषोत्तमदाहालेन छात्राणां संस्कृतसम्बद्धानि काठिन्यानि प्रतिपाद्य संस्कृतशिक्षायाः पठनपाठनप्रणाल्या युगानुकूलत्वसम्पादने स्वीयानि मन्तव्यानि दत्तानि।

विद्या नाम नरस्य कीर्तिरतुला भाग्याश्रये चाश्रयो
धेनुः कामदुघा रतिश्च विरहे नेत्रं तृतीयं च सा।
सत्कारायतनं कुलस्य महिमा रत्नैर्विना भूषणं
तस्मादन्यमुपेक्ष्य सर्वविषयं विद्याधिकारं कुरु॥

– सुभाषितरत्नभाण्डागारम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उपकुलपतिः सिंहः कर्मकाण्डप्रशिक्षणम् ।
उद्घाटयति सद्दीपप्रज्वालनपुरस्सरम् ॥

उद्घाटनसमारोहे कर्मकाण्डविधेः शुभे ।
उपकुलपतिः श्रीमान् रामचन्द्रबहादुरः ॥
शिक्षाध्यक्षरजिष्ट्रारहरिदेवाम्बिकायुतः ।
सभां विलोकयन् भव्यां विद्यापीठे विराजते ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कर्मकाण्डप्रशिक्षणकार्यक्रमस्य समुद्घाटनम्

ऊनचत्वारिंशदुत्तरद्विसहस्र (२०३९) तमस्य विक्रमसंवत्सरस्य मार्गशीर्षमासस्य त्रयोविंशतितमे दिवसे वाल्मीकिविद्यापीठे त्रि. वि. वि. अनुसन्धानमहाशाखायाः संस्कृताध्ययनसंस्थानान्तर्गतस्य वाल्मीकिविद्यापीठस्य च संयुक्तायोजनायां सञ्चालितस्य कर्मकाण्डपद्धतिप्रशिक्षणकार्यक्रमस्य त्रिभुवनविश्वविद्यालयस्योपकुलपतिना प्रा. श्रीरामचन्द्रबहादुरसिंहमहाभागेन विहितं समुद्घाटनम्। उक्तसमारोहे समुद्घाटनभाषणं कुर्वता श्रीसिंहमहोदयेन हिन्दूसभ्यतासंस्कृति-परम्पराणामाधारेणैवाद्य वयं हिन्दूरूपेण परिचिताः स्मः, अस्यैव हिन्दूत्वस्य संरक्षणार्थमयं कर्मकाण्डपद्धतिप्रशिक्षणकार्यक्रमः समागतो वर्तत इत्युदीरितम्। पुनः कर्मकाण्डप्रविधिविदां विदुषां ह्रासोन्मुख्याः संख्याया विषये चिन्तां प्रकटयता सिंहमहोदयेनोक्तम्— समस्तादर्शानां स्रोतसः संस्कृतस्य संरक्षणसंवर्धनादिकार्ये सत्येवास्मद्धर्मसंस्कृतिपरम्पराणां संरक्षणं भवितुमर्हति, अत एव तस्मिन् कर्मणि सर्वैरस्माभिर्बद्धपरिकरैर्भाव्यम्। ततः कर्मकाण्डप्रविधिविदां विदुषां प्रतिष्ठायाः सम्बन्धे स्वमन्तव्यं प्रकाशयता तेन सदाचारस्यैव प्रतिष्ठाया मूलहेतुत्वात् सदाचारेऽङ्गीकृते प्रतिष्ठा स्वतो लभ्यत इति तथ्यमुद्घाटितम्। संस्कृतविद्वद्भ्यः संस्कृतसंरक्षणाय मूल्यवता कार्यक्रमेण सहोपयुक्ते निर्देशने प्राप्ते सति संस्कृतसंरक्षणं गतिमद् भविष्यतीति प्रतिपादयतोपकुलपतिमहोदयेन संस्कृतस्य विकासाय संस्कृतविश्वविद्यालयस्यैवावश्यकतायामनुभूयमानायां तस्य व्यवस्था भवितुं शक्नोतीति विचारोऽपि प्रकटीकृतः।

श्री ५ महेन्द्रवृत्तिकोषसञ्चालनसमितेरध्यक्षः त्रि. वि. वि. शिक्षाध्यक्षो डा. श्रीचन्द्रप्रसादगोर्खालीमहाभागः श्री ५ महेन्द्रवृत्तिकोषस्य स्थापनाया उद्देश्यविषये तथ्यं प्रकाशयन् पाश्चात्त्यसभ्यतायाः कतिपयान् मूल्यवतो गुणान् गृहीत्वा निजधर्मसंस्कृत्योः संरक्षणमस्माकमस्ति परमं कर्तव्यमिति प्रावोचत्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रि. वि. वि. अनुसन्धानमहाशाखायाः प्रमुखः श्रीसन्तबहादुरगुरुङ्ग-महोदयो महेन्द्रवृत्तिकोषस्य योजनाया लक्ष्यं निर्दिशन् कर्मकाण्डपद्धतिप्रशिक्षण-कार्यक्रमः प्रतिदिनं क्षीयमाणायाः कर्मकाण्डपद्धतेः पुनरुत्थानकर्मणि सहयोगी भविष्यतीति प्रत्यपादयत् ।

उक्तसमारोहे प्रा. डा. श्रीहरिदेवमिश्रमहाभागः कर्मसिद्धान्तं विवेचयन्नेतादृगस्य कार्यक्रमस्य कार्यान्वयनेनास्माकं कर्मकाण्डसंबद्धाऽऽत्म-निर्भरता समुदेष्यतीति मन्तव्यं प्रकाशितवान् ।

उपप्रा. श्री बुद्धिसागरपराजुलीमहाभागः कर्मसिद्धान्तस्य व्याख्यानोपक्रमे मत्स्यावतारस्य भगवतो धार्मिकीं पृष्ठभूमिं प्रकाशयन् रक्षिते वेदे धर्मो भवति रक्षित इति मन्तव्यं प्रकटितवान् ।

उक्तकार्यक्रमस्य संयोजकः सहायकसंस्थानाध्यक्षो वाल्मीकिविद्यापीठप्रमुखः उपप्रा. श्रीशिवहरिमरहट्टामहाभागो हिन्दूराजदर्शनस्य शाश्वतमूल्यस्य शाश्वत्या मान्यतायाश्चेदानीन्तनीं विशृङ्खलनप्रक्रियां परिचाययन् तन्निराकरणायैतादृशस्य कार्यक्रमस्य व्यापकतायै राष्ट्रियप्रयासस्यावश्यकताविषये आग्रहं कुर्वन् स्वमतं प्रकटितवान् ।

उक्तकार्यक्रमस्य सभापती राजसभायाः सदस्यः संमाननीयः प्रा. श्री-अम्बिकाप्रसादअधिकारिमहाभागो धर्मसंस्कृत्योर्लोपे वयं लुप्ता भविष्याम इति श्री ५ महाराजाधिराजस्य महावाणीं परिचाययन् संस्कृते लुप्ते धर्मसंस्कृत्यो-र्लोपो भवितुं शक्नोतीति विचारं प्रकटितवान् ।

सभायाः प्रारम्भे कर्मकाण्डपद्धतिप्रशिक्षणकार्यक्रमस्य सहभागिनौ छात्रौ श्रीहीरानन्दतिमल्सिनाश्रीदिव्यचन्द्राचार्यौ वैदिकस्वस्तिवाचनमकुरुताम्। तस्मिन्नव-सरे त्रिभुवनविश्वविद्यालयस्योपकुलपतिशिक्षाध्यक्षाभ्यांच श्री ५ महाराजा-धिराजस्य श्री ५ महाराज्ञ्याश्च चित्रयोर्माल्यार्पणं व्यधायि ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उद्घाटनसमारोहे कर्मकाण्डविधेरिह ।
श्री-अम्बिकाप्रसादोऽसौ साभापत्येन राजते ।



विद्यापीठप्रधानाच्च रामचन्द्रबहादुरः ।
शृणोति पीठवृत्तं तत् कर्मकाण्डक्रमागतः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



कर्मकाण्डस्य पद्धत्याः प्रयोगविधिशिक्षणे ।
छात्राः सगुरवः सन्ति द्वितीयक्रम आगताः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महर्षिवाल्मीकेः प्रतिमाया अनावरणम्

२०४० तमस्य ज्येष्ठमासस्य ३१ तमस्य दिवसस्यापराह्णे सम्माननीयेन प्रधानमन्त्रिणा श्रीसूर्यबहादुरथापामहोदयेन वाल्मीकिविद्यापीठस्य द्वात्रिंशत्तमस्य वार्षिकोत्सवस्योपलक्ष्ये भृकुटिमण्डपस्थितस्य विद्यापीठस्य प्राङ्गणे स्थापितायाः संस्कृतभाषाया आदिकवे रामायणमहाकाव्यस्य रचयितुर्महर्षेर्वाल्मीकेः प्रतिमाया वैदिकध्वनिभिः सहानावरणं कृतम् । पर्वतस्य पृष्ठभूमौ श्वेतप्रस्तरशिल्पसंस्कृतायां तस्यां प्रतिमायां संस्कृतवाङ्मयमहत्त्वेन सह शाहवंशीयानां राज्ञां महत्त्वपूर्णान्यवदानानि चोट्टङ्कितानि सन्ति । तस्यां प्रतिमायामुट्टङ्कितानि पद्यानि प्राध्यापकेन खेमराजोपाध्यायेन निर्मितानि । ललितपुराभिजनेन कलाकारेण बुद्धरत्नशाक्येन निर्मिता सा प्रतिमा विगते २०३३ तमे विक्रमाब्दे विद्यापीठस्य प्राङ्गणे स्थापिता । परन्त्वनुकूलसमयाभावादनावरणकार्यक्रमोऽवशिष्ट एवाऽऽसीत् । अनावरणानन्तरं थापामहोदयेन प्रतिमायां पुष्पाञ्जलिः समर्पितः । ततस्तेन विद्यापीठभवनस्य पुस्तकालयस्य चान्तराले नवनिर्मितायां षट्कोणसमन्वितायां पुष्पवाटिकायां कर्पूरवृक्षस्य रोपणं व्यधायि । तत्र च शिक्षाराज्यमन्त्रिणा श्रीकेशरबहादुरविष्टेन, राजगुरुणा श्रीजुननाथपण्डितेन, उपकुलपतिना श्रीरामचन्द्रबहादुरसिंहेन, शिक्षाध्यक्षेण डा. श्रीचन्द्रप्रसादगोर्खालिना, अन्यैश्च धूपवृक्षाणां संपादितं रोपणकर्म ।

सम्माननीयेन प्रधानमन्त्रिणा श्रीसूर्यबहादुरथापामहोदयेन शान्ति बन्धुत्वञ्च प्रति नैपालकानां प्रगाढास्था दिव्यैर्महर्षिभिः प्रवाहितया शान्तिसुधयाऽभिषिक्तेन जनजीवनेन सुरक्षिता वर्तत इत्युदीरितम् । श्रीथापामहोदय एतत्तथ्यं वाल्मीकिविद्यापीठस्य द्वात्रिंशत्तमजन्मजयन्तीसमारोहस्योद्घाटनं कुर्वन् २०४०।२।३१ तमे दिनाङ्के प्रकाशितवान् । स अकथयत्—अस्माकं प्राचीना महर्षयो मुनयो राजा जनको जगज्जननी जानकी भगवान् बुद्धश्च ईदृशा राष्ट्रविभूतयो नेपालजन्मान

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इममादर्शं संस्थापयामासुः । तस्यैव परम्परयाऽस्माकं नैतिकमूल्यं प्रतीदृशी बलवत्यास्था सञ्जाता ।

अस्माकं समाजे मर्यादाशिष्टतासहिष्णुतासदृशानां मानवीयगुणानामुद्गम उक्तशाश्वतादर्शस्योपलक्षणमिति वदता तेनाऽऽधुनिके जनजीवनेऽप्युच्चादर्शस्याऽक्षुण्णतायै प्रयासो विधेय इति प्रतिपादितम् ।

सम्पूर्णानां भाषाणां विद्यते जननी संस्कृतभाषा । तस्याः साहित्यस्य विकासपुरस्सरमार्यसंस्कृतेर्विचारधारामग्रेसारयितुं सामान्यैर्जनैरकल्पितस्य चरितस्याऽऽदर्शस्य च परिकल्पनया महर्षिर्वाल्मीकिः सरलतया तादृशं चरितमुद्भाव्य विश्वसन्निधावनुपममादर्शं प्रस्तूय सर्वान् मानवानुच्चादर्शप्राप्तये प्रयत्नायोपदिदेश ।

थापामहोदयः पुनरकथयत्– महर्षेर्वाल्मीकेराश्रमो नारायणीनद्याः पुलिने भारतसीमासन्निधौ नेपाल एवाऽऽसीदिति पुरातात्त्विकानामितिहासविदाञ्च सम्मतिरस्ति । अस्माकं कृतेऽयमस्ति गौरवस्य विषयः । हिमवत्खण्डेऽथवोत्तराखण्डे विराजमानो नेपाल आर्यसंस्कृतेरनुयायिनां बहूनां मुनीनां तपःस्थलमासीदित्यत्र न कापि विप्रतिपत्तिः। कौशिकमुनेर्नाम्ना कोशी नेपालस्य पूर्वभागे प्रवहति । नेपालस्य पश्चिमभागे च भीरकोटे भृगु–ऋषेराश्रम आसीदित्यत्र बहूनां विश्वासो विद्यते ।

सांख्यदर्शनस्य प्रणेतुः कपिलमुनेर्लुम्बिन्यञ्चले महर्षेर्दुर्वाससो गण्डक्यञ्चले महर्षेर्याज्ञवल्क्यस्य जनकपुराञ्चल आश्रमा आसन्निति गवेषकाणां धारणां प्रतिपादयन् थापामहोदयोऽवोचत्–अनेनैव प्रकारेण नेपालस्य विभिन्नस्थलेषु बहुभिर्मुनिभिरध्ययनमननचिन्तनादीनि विधाय नेपालभूमिः पाविता । अत एव मुनीनां तपोभूमावस्मिन्नेपाले आर्यसंस्कृतेः परम्परां चिरस्थायिनीं विधाय वयं सनातनधर्मस्य विशुद्धं स्वरूपं धारयामः ।

नेपालस्य राष्ट्रभाषाया नेपाल्या अन्यासां भाषाणाञ्च मुख्यमाधारस्रोतः संस्कृतमस्तीत्यस्य विकासाभावे संस्कृतसम्बद्धानां भाषाणां विकासकर्मणि काठिन्यं भविष्यतीति नैव विस्मरणीयमस्माभिः ।

थापामहोदयः पुनः प्रावोचत्–महर्षिर्वाल्मीकिर्न केवलं हिन्दूजगतोऽपितु संसारस्य विभूतिरस्ति । स आर्यदर्शनानामुच्चतमं ज्ञानं भावनाञ्च प्रसिद्धे रामायणमहाकाव्ये सप्रभावं समाधुर्यञ्चाभिव्यनक्ति स्म । वेदान्तदर्शनस्य विविधैः पक्षैरलङ्कृतं रामायणमहाकाव्यं साहित्यिकदृशाऽप्येकोत्कृष्टा रचना विद्यते । अत एव विश्वस्य विशिष्टासु भाषासु रामायणस्यानुवादाः सञ्जाताः। भगवतो

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शुभ्रा शिल्पमयी भव्या वाल्मीकेरश्मनिर्मिता ।
विद्यापीठाङ्गणे भाति प्रतिमा पद्यसंस्तुता ॥
तदनावरणं कुर्वन् विद्यापीठमहोत्सवे ।
शिव-तोयान्वितो भाति प्र. मं. सूर्यबहादुरः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



अनावृत्य मुनेर्मूर्तिं विधाय तरुरोपणम् ।
विद्यापीठस्य वाल्मीकेर्नाम्ना ख्यातिमुपेयुषः ॥
वर्षोत्सवसमारोहे द्वात्रिंशत्तमसंख्यके ।
प्रकाशयति मन्तव्यं श्रीमान् सूर्यबहादुरः ॥



सूर्यबहादुरः सार्धं शिक्षासंस्कृतिमन्त्रिणा ।
मूर्त्यनावरणात् पूर्वं वाल्मीकेर्भाति प्राङ्गणे ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रामचन्द्रस्य पावनजीवनचरितसमलङ्कृतं रामायणमहाकाव्यं मानवसमाजस्य कृत उच्चतमादर्शरूपं सत्यं सञ्जातमस्तीति प्रतिपादयन् थापामहोदयः पुनरगादीत्- जनजीवने पितुर्मातुः पुत्रस्य पत्युः पत्न्या भ्रातुर्मित्रस्य सेवकस्य च कृते कीदृश आदर्श आवश्यकः, महति सङ्कटमये समये कथं व्यवहरणीयमिति रामायणमहाकाव्ये मर्मस्पृशा भाषया प्रतिपादितमस्ति ।

तस्मिन्नवसरेऽध्यक्षात्मकं भाषणं कुर्वता संम्माननीयेन राजगुरुणा श्रीजुननाथपण्डितमहोदयेनोक्तम्—प्राचीनकाले भारतचीनजापानदेशेभ्यो ज्ञानार्जनाय ज्ञान पिपासावन्तो नेपालं प्रापुः। तदानीं नेपालराष्ट्रे आध्यात्मिकतायाः साम्राज्य- मासीत्। सम्प्रति तादृशीमाध्यात्मिकतां साहित्यिकञ्च गौरवं विस्मृत्य वयं रसातलस्य मार्गमनुसराम इति दुःखस्य विषयः। भूयो राष्ट्रनायकेन श्री ५ वीरेन्द्रेणो- पस्थापितं शान्तिक्षेत्रस्य प्रस्तावं विवृण्वता तेनोक्तमयं शान्तिक्षेत्रस्य प्रस्ताव औपनिषत्सिद्धान्तानुकूलो वर्तते । तस्मिन्नवसरे संस्कृतस्य वर्तमानां स्थितिं विश्लेषयता राजगुरुणा प्रोक्तम्—संस्कृतसाहित्यदर्शनयोः प्रचारे यदि वयं शक्ता भवेमस्तदैव विलुप्तं गौरवं पुनः प्राप्नुयाम ।

तदानीं संस्कृतस्य प्रचाराय सर्वैर्देशवासिभिः प्रयत्नो विधेय इति कथयता संस्कृताध्ययनसंस्थानाध्यक्षेण प्रा. श्रीतोयनाथपाण्डेयमहाभागेन संस्कृतज्ञा एव संस्कृतस्य संरक्षणं कुर्वन्त्विति यो भावो जनमानसे वर्तते सोऽपसारणीय इति कथि- तम् । अध्यक्षपदे स्थित्वा शैक्षिककार्यस्य संवर्धनापेक्षया संस्कृतस्य कृते श्रद्धालुभिर्भूमिदातृभिर्दाङ्गजनपदे दत्तानां भूमीनां संरक्षणव्यवहारविषयेऽधिकस्य समयस्यापव्ययो भवतीति स्वकीयमनुभवं प्रकाशयता तेन तत्र स्थानीयप्रशासन- स्योपेक्षाभावः प्रकटीकृतः ।

तदैव संस्कृताध्ययनसंस्थानस्य सहायकाध्यक्षो वाल्मीकिविद्यापीठप्रमुखः सहप्रा श्रीशिवहरिमरहट्टामहाभागः स्वागतभाषणं कुर्वन् नवोत्तरद्विसहस्र (२००९) तमे विक्रमसंवत्सरे समुद्घाटितस्य राजकीयसंस्कृतमहाविद्यालयस्य त्रिशदुत्तर- द्विसहस्र (२०३०) तमे विक्रम- संवत्सरे महर्षेर्वाल्मीकेर्नाम्ना वाल्मीकिविद्यापीठ- मिति नामकरणं जातम्। वर्तमानकालपर्यन्तमुक्तविद्यापीठात् षट्चत्वारिंशदु रसप्तदश संख्यकपरिमिताः स्नातकाः समुत्तीर्णा इति बोधयन् वेधशालाया अभावेन ज्यौतिषविभागगतं काठिन्यं सङ्केतितवान् । पुना राजपुष्करिणीसंस्कृत- माध्यमिकविद्यालयस्य (रानीपोखरी-संस्कृतप्रधानपाठशाला) वाल्मीकिविद्या- पीठस्य च विभिन्नानि सञ्चालनसम्बन्धीनि काठिन्यान्यवर्णयत्। पुनस्तत्रभवान् ऊनविंशत्युत्तरद्विसहस्र (२०२९) तमविक्रमसंवत्सरादनन्तरमवरुद्धोऽयं वार्षि- कोत्सवकार्यक्रमोऽस्माद् वत्सरात् पुनः प्रारब्ध इत्यपि प्रत्यपादयत् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पण्डितराजसोमनाथसिग्द्यालशतवार्षिकसमारोहः

वाल्मीकिसंस्कृतमहाविद्यालयस्योपप्रधानाचार्यचरस्य प्रा. श्रीरामचन्द्रपौडेलमहाभागस्य साभापत्ये तदानीन्तनराजकीयसंस्कृतमहाविद्यालयस्य प्रथमप्रधानाचार्यस्य पण्डितराज श्रीसोमनाथसिग्द्यालमहोदयस्य जन्मशताब्दिसमारोहस्यायोजनाविषये विमर्शयितुं वाल्मीकिविद्यापीठस्याऽऽयोजनायां विद्यापीठस्यैव सभाकक्षे राजधानीस्थितानां विशिष्टानां मनीषिणामेका महदुद्देश्यानुप्राणिता सभा जाता ।

तस्यां सभायां संस्कृताध्यनसंस्थानस्य सहायकसंस्थानाध्यक्षः सह प्रा.श्रीशिवहरिमरहट्टामहोदयः शतवार्षिकसमारोहसमायोजनाया विषये स्वकीयं प्रस्तावमुपस्थापयन् प्रावोचत् – संस्कृतविदुषां शतवार्षिकसमारोहस्य सामूहिकरूपेणाऽऽयोजनायाः प्रसङ्गो नाद्यावधि प्रचलितो वर्तते । संप्रत्यस्मद्‌भाषासंस्कृतिधर्मविषयेष्वाक्रमणस्यापि क्रमः प्रारब्धो दृश्यते । अस्मत्सन्निधौ संस्कृतविश्वविद्यालयस्य स्थापनायाः प्रसङ्गोऽपि प्रचलन्नस्ति । नेपालस्य संस्कृतक्षेत्रस्य मूर्धन्यस्य ख्यातयशसो नेपालीभाषायाः साहित्यस्य व्याकरणस्य च प्रणेतुः कीर्तिकलेवरस्य महर्षिकल्पस्य राजकीयसंस्कृतमहाविद्यालयस्य प्रथमप्रधानाचार्यस्य पण्डितराजश्रीसोमनाथसिग्द्यालमहोदयस्य सांस्कृतिकं व्यक्तित्वमग्रतो निधाय सन्मार्गनिर्धारणस्य समयः समुपस्थितो वर्तते । सैषा वर्तते वर्तमाना परिस्थितिः। अत्र प्रातःस्मरणीयस्य स्मृतिप्रसङ्ग एव सेयं सभा समायोजिता वर्तते । यदि चेयं सभा पण्डितराजस्य शतवार्षिकसमारोहस्याऽऽयोजनां कर्तुमुचितमावश्यकञ्च विचारयति, तस्यां स्थितौ भवतु नाम निर्मिता कस्याऽपि विशिष्टस्य विदुषोऽध्यक्षतायां राष्ट्रिया समितिः । सा समितिः सोमनाथस्मृतिग्रन्थप्रकाशनस्य प्रतिमास्थापनादेश्च विषये यथा सक्रिया स्यात् तथा निर्णयः कर्तव्य इति मामकीनो विचारः।

तदा प्रा. श्रीचूडानाथभट्टरायो निजमन्तव्यमित्थं प्रत्यपादयत्– प्रशंसनीयमस्तीदं कार्यं राष्ट्रव्यापिरूपेण समितिं निर्माय शतवार्षिकसमारोहः समायोजनीयः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विद्वद्गोष्ठ्यां गुरोः पत्न्याम्बूडानाथेन सज्जनैः ।
भूषितायां करोत्यत्र शिवः स्वागतभाषणम् ॥

सोमनाथप्रयुक्तायां विद्वद्गोष्ठ्यां बुधान्वितः ।
भूपालमानसिंहोऽसौ वर्तते प्रमुखोऽतिथिः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रा. श्रीअम्बिकाप्रसादअधिकारिमहोदयः स्वविचारमनया रीत्या प्रकटितवान्–समायोजनीया राष्ट्रिया समितिरेतत्सन्दर्भे, समय एवेदृशस्य महनीयस्य कर्मणः संस्मरणं संस्मारणञ्च शुभावहो विषयः ।

तदानीं श्रीपूर्णप्रसादब्राह्मणः प्रावोचत्–सोमनाथस्य गुरोर्व्यक्तित्वमासीदनुपमम् । गुरुवरो वैदुष्येण कवित्वेन च समलङ्कृतो महापुरुष आसीत् । तादृशस्य पुरुषस्य शतवार्षिकसमारोहस्याऽऽयोजना देशव्यापिरूपेण संघटितया समित्या कर्तव्या । समितेः साभापत्ये कस्याऽपि विशिष्टस्य विदुषो नियुक्तिर्विधेया ।

श्रीराजेश्वरदेवकोटा श्रीश्रीभद्रशर्मा च संस्कृतक्षेत्रस्य विशिष्टो विद्वानपि गुरुः सोमनाथो नेपालीसाहित्यस्य संवर्धने महद् योगदानं कृतवान्, तस्य संस्मरणसम्बन्धे महति कार्यक्रमे समायोजिते आवयोरपि सहयोगो भविष्यतीत्युक्तवन्तौ ।

तस्यामेव सभायां वदता श्रीकमलराजरेग्मीमहाभागेनोक्तम्–राणाकाले संस्कृतविद्यायाः केन्द्रभूताया रानीपोखरीपाठशालायाः प्रधानाध्यापकस्य गुरोः सोमनाथस्य विभिन्नक्षेत्रेऽवदानं नतिरोहितं विदुषाम् । गुरुणा राजगुरुश्रीहेमराजशर्माऽपि भृशमुपकृतः । राजनीतिक्षेत्रेऽपि छात्रमाध्यमेन गुरोर्योगदानं ज्ञातमस्ति । सहायकसंस्थानाध्यक्षेण श्रीशिवहरिमरहट्टामहोदयेन प्रस्तावितेऽस्मिन् कर्मण्यहमपि सहयोगी भविष्यामि ।

तदा श्रीअच्युतराजरेग्मी अकथयत्- गुरोः सोमनाथस्य प्रभावं नाहं नेपाल एव सीमितं दिदृक्षे, अतोऽस्या आयोजनायाः प्रचारो भवतु संसारव्यापी। इदानीं समितिः स्यान्निर्मिता प्रतिवर्षञ्च भवेत् समायोजितो जन्मजयन्तीसमारोहः ।

प्रा. श्रीवासुदेवत्रिपाठी निजमन्तव्यं प्राकाशयदित्थम्– शतवार्षिक्या जयन्त्याः समायोजनविषये सर्वेभ्यः सभासद्भ्यः सकारात्मकस्य मन्तव्यस्य प्राप्त्या संप्रति कार्यक्रमनिर्धारणविषयो विचारणीयः । शतवर्षारम्भसमयापेक्षया शततमे वर्षे व्यतीते सति कस्यापि जन्मनः शतवार्षिकसमारोहः शोभनो भवेत्। राष्ट्रव्यापितया समित्याः संघटना च संप्रति कर्तव्या ।

तस्मिन्नवसरे श्रीनित्यराजपाण्डे चक्रपाणिचालिसेलेखनाथपौड्यालयोः शतवार्षिकसमारोहे समायोजिते गुरोः सोमनाथस्याऽपि शतवार्षिकसमारोहः समायोजनीय इति मदीये मानसेऽपि विचारोऽऽङ्कुरित आसीत्, श्रीसोमनाथस्य शतवार्षिकसमारोहं समायोजयितुं राष्ट्रव्यापिरूपेण संघटनीया समितिरिति मन्तव्यं प्राकाशयत् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदा प्रा. श्रीशिवगोपालरिसालः शतवार्षिकसमारोहसमित्यां वाराणसेया विद्वांसोऽपि समावेश्याः, मूलसमित्या सहोपसमितीनामपि व्यवस्था विधेया, अस्मिन् कार्यक्रमे बहूनां जनानां समावेशेन सह महानर्थराशिः सङ्कलनीयः, संस्कृते नेपाल्यामाङ्गलभाषायां हिन्दीभाषायाञ्च सोमनाथगुरोः परिचयं प्रकाश्य राजदूतावासानां माध्यमेन विदेशेष्वपि प्रचारो विधेय इति प्रावोचत् ।

तदनन्तरं सा सभा तत्सम्वन्धे विशेषतो निम्नाङ्कितान् निर्णयान् कृतवती–

(१) आयोजकसमितिरेका राष्ट्रव्यापिनी संघटनीया । अस्यां सभायामुपस्थिताः सभासद आयोजकसमितौ सदस्या भवन्ति । आयोजकसमितेः सदस्यसंख्या त्वेकोत्तरैकशतसंख्यातोऽन्यूना भवितुमर्हति ।

(२) आयोजकसमितेरन्तर्गततयैका सप्तविंशतिसंख्यात्मिका कार्यसमितिर्निर्मेया । तत्र च श्रीचूडानाथभट्टराय– श्रीअम्बिकाप्रसादअधिकारी– श्रीतोयनाथपाण्डेय– श्रीपूर्णप्रसादब्राह्मण– श्रीशिवहरिमरहट्टामहाभागाः क्रमशः सभापत्युपसभापतिसदस्यसचिवपदभाजः स्युः । एका परामर्शपरिषच्च संघटनीया ।

तदानीं वाल्मीकिविद्यापीठस्य सहायकपीठप्रमुखः उपप्रा. श्रीनीलमणिढुङ्गानामहोदयः समुपस्थितेभ्यः सभासद्भ्यो धन्यवादान् समुपाहरत् ।

सभापतेरासनमलङ्कुर्वाणः श्रीरामचन्द्रपौडेलमहाभागो गुरूणां संस्मरणक्रमे समायोजितायां सभायां समुपस्थातुं लब्धावसरतया महान्तं प्रमोदमनुभवन् धन्यवादज्ञापनपुरस्सरं सभां व्यसर्जयत् ।

स्नेहं दयाञ्च सौख्यञ्च यदि वा जानकीमपि ।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा ॥

– भगवान् श्रीराम

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिक्षादिनसमारोहे साभापत्येन शोभितः ।
कल्पनोद्भासिते मञ्चे विद्यानाथो विराजते ॥

सत्कवेः सोमनाथस्य शतवर्षोत्सवे शुभे।
विद्वद्गोष्ठ्यां विराजन्ते बुधाश्छात्राश्च दर्शकाः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिक्षादिवससमारोहः (२०४०)

चत्वारिंशदुत्तरद्विसहस्र (२०४०) तमस्य विक्रमाब्दस्य फाल्गुनमासस्य द्वादशतमे दिवसे वाल्मीकिविद्यापीठे वयोवृद्धस्य ज्ञानवृद्धस्य च उपप्रा. श्रीलोकनाथढकालमहोदयस्य सभापतित्वे शिक्षादिवससमारोहः सुसम्पन्नः ।

तत्र सभापतिपदमलङ्कुर्वता उपप्रा. श्रीलोकनाथढकालमहाभागेन संस्कृतस्य गौरवमयीं परम्परां संस्मारयता वर्तमानस्याध्ययनाध्यापनगतस्य शैथिल्यस्य निराकरणाय सर्वे संस्कृतज्ञा विद्वांसः छात्राश्च प्रेरिताः ।

तदा प्रा. श्रीविद्यानाथउपाध्यायमहोदयेन समसामयिकसमाजानुकूलं संस्कृतमेव भवति चिरस्थायि, समाजसंमानितञ्चेति प्रतिपादयतोक्तं–ईदृशा भवेयुरस्माकं पाठ्यविषयाः, यथा समाजः स्वतस्तत् प्राप्तुं भवेत् प्रयत्नशीलः । भाररूपेण संस्कृतमधीयानैः छात्रैः वहुसौविध्यं लब्ध्वाऽपि संस्कृतस्य संवर्धने संरक्षणे च न किमपि कर्तुं पार्यते । संस्कृतरक्षणमिदानीं प्रमुखकर्तव्यम् । किन्तु नेयं परिपाटी वर्तमाना समर्थाऽत्र गतिशीलतां समुत्पादयितुमिति ।

उपप्रा. श्रीदिनेशराजपन्तमहोदयेनोक्तम्– अस्माभिरधुना संस्कृतस्य महत्त्वविषये आध्यात्मिकदृष्टयैव विचारः क्रियते । परं तद्विचारानुसारमस्माकं जीवनपद्धतिरस्ति नवेति विषये वर्तते सन्देह एव। संस्कृतस्य वैज्ञानिकविषयाणामध्यापनेऽपि प्रयासो विधेयः । अस्माकं देशे संप्रति पाश्चात्यवास्तुविद्या प्रचलति, परं तदपेक्षया पौरस्त्यवास्तुविद्या परमशोभनास्तीति प्रमाणितो विषयोऽस्माभिः समाजसमक्षे प्रमाणयितव्यः। मानविक्याद्यध्ययनसंस्थानेष्वितिहासविषयस्य सत्यप्यध्यापने तत्रत्याः छात्रा आधिकारिकं ज्ञानं संस्कृतज्ञानाभावान्न प्राप्नुवन्ति । अस्मिन् विषयेऽपि संस्कृतज्ञैरेव प्रयत्नो विधेयः ।

तदा उपप्रा. श्रीअम्बीरपाण्डेयमहोदयेनोक्तम् – संस्कृतं नामाऽस्माकं संस्कारोऽस्ति । संस्कृते व्यावहारिकज्ञानस्य कृते पाठ्यक्रमेष्वधिकाधिकरूपेणा-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धुनिकविषयाणां समावेशः कर्तव्यः । संस्कृतछात्रैः कुण्ठां हीनभावनां लघुताभासञ्च विहाय संस्कृतस्य सेवा विधेया, राष्ट्रं संस्कृतज्ञानं पुरा संमानयति स्म, भविष्ये सम्मानयिष्यति, वर्तमाने च सम्मानयति । अत्रोदाहरणं दातुं शक्यते, केवलं तैः संस्कृतसमर्पितैर्भाव्यम् ।

तस्मिन्नवसरे धन्यवादज्ञापनं कुर्वता सहायकविद्यापीठप्रमुखेन उपप्रा. श्रीनीलमणिडुङ्गानामहोदयेनोक्तं यत् सर्वैरेव स्वकर्तव्यपालनं नैतिकतापूर्वकं कर्तव्यम्, तदैव शिक्षादिवसस्योद्देश्यं सफलं भविष्यति ।

यद्यपि बहु नाधीषे तथाऽपि पठ पुत्र व्याकरणम् ।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत् ॥

— सुभाषितरत्नभाण्डागारम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



जूननाथोवुधश्रेष्ठो ज्येष्ठो राजगुरुस्तथा,
चन्द्रप्रसादगोर्खाली, तोयनाथादयोवुधाः ।
विद्यापीठस्य वाल्मीकेस्त्रयस्त्रिंशत्तमेशुभे,
वर्षोत्सवसमारोहे महीयन्ते मुदान्विताः ॥

वुधानामनुरागिणां छात्राणाश्चात्रसंस्थितिः
स्मारयति त्रयस्त्रिंशत्तमं वर्षोत्सवं शुभम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वाल्मीकिविद्यापीठस्य त्रयस्त्रिंशत्तमो वार्षिकोत्सवः

संस्कृताध्ययनसंस्थानान्तर्गतस्य काष्ठमण्डपस्थि तस्य वाल्मीकिविद्यापीठस्य त्रयस्त्रिंशत्तमो वार्षिकोत्सवसमारोह एकचत्वारिंशदुत्तरद्विसहस्र (२०४१) तमस्य विक्रमाब्दस्य ज्येष्ठमासस्यैकत्रिंशत्तमे दिवसे सुसम्पन्नः ।

अस्मिन्नवसरे प्रमुखातिथेरासनमलङ्कुर्वता सम्माननीयेन राजगुरुणा श्रीजुननाथपण्डितमहाभागेन संप्रति विश्वस्य राष्ट्रेषु केचन युद्धाय तत्पराः सन्ति, केचिच्च विपत्तिग्रस्ताः, परं शान्तिक्षेत्रेऽस्मिन् नेपाले शान्तिपूर्णस्य वातावरणस्य स्थितिरस्ति हर्षस्य विषय इति प्रतिपादयता शान्तिः विकासश्चेति तत्त्वद्वयमस्ति राष्ट्रस्याऽऽकाङ्क्षायाश्चरमो विषय इति ज्ञापितम् । रणमुक्तेश्वरे लघुविद्यालयरूपेण समङ्कुरितो विद्यालयोऽयं विश्वविद्यालयरूपे विकसितुमारब्ध इत्युल्लेखयताऽऽगामिनि निर्मीयमाणे विश्वविद्यालये भौतिकस्याऽऽध्यात्मिकस्य च विकासस्य रूपरेखा निर्मेयेति मन्तव्यञ्च राजगुरुमहोदयेन प्रतिपादितम् । संस्कृतमधीत्य गभीरस्य वैदुष्यस्य समर्जनं "संस्कृतं संस्कृतये" अस्तीति सिद्धान्तप्रतिपादनमित्युदीरयता तेन वैदिकधर्मस्य संरक्षणे शाहवंश्यानां भूपतीनां योगदानानां चर्चा विहिता ।

अस्मिन्नवसरे राजगुरुमहोदयेनानुसन्धानमहाशाखायाः सहयोगेन विगतवर्षे सञ्चालितस्य कर्मकाण्डपद्धतिप्रशिक्षणकार्यक्रमस्य प्रशिक्षार्थिभ्यः प्रमाणपत्राणि प्रदत्तानि ।

सभापतेरासनमलङ्कुर्वता त्रिभुवनविश्वविद्यालयस्य शिक्षाध्यक्षेण डा. श्रीचन्द्रप्रसादगोर्खालीमहोदयेनोक्तम्— संस्कृतस्य विद्वांसो विद्यार्थिनश्चाध्ययनाध्यापनमाध्यमेन संस्कृतस्य संरक्षणे संवर्धने च विशेषतया योगदानं कर्तुमर्हन्ति । अद्य संस्कृतविद्यापीठस्य विकाससम्बन्धे यावत्यः कट्व्यो मधुराश्च

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चर्चाः सञ्जाताः, ता भविष्यस्य कृते फलदायिन्यो भवितुमर्हन्तीति विश्वासं प्रकटयता तेन संस्कृतविश्वविद्यालयस्य नवनिर्माणस्यास्मिन् प्रसङ्गे संस्कृतस्य विकासाय दीर्घकालव्यापिन्या योजनायाः सञ्चालनं प्रतिभात्यावश्यकमित्युदीरितम् । त्रिभुवनविश्वविद्यालयान्तर्गतस्यास्य विद्यापीठस्य सद्यः स्थापयिष्यमाणस्य संस्कृतविश्वविद्यालयस्य च सहयोगाय त्रिभुवनविश्वविद्यालयः पूर्ववदेव सन्नद्धो भविष्यति सद्व्यवहारपुरःसरमिति गोर्खालीमहाभागेन प्रतिपादितम् ।

संस्कृताध्ययसंस्थानाध्यक्षेण प्राः श्रीतोयनाथपाण्डेयमहाभागेन संस्कृतस्य विकासाय संस्कृतज्ञैरेव सन्नद्धैर्भाव्यमित्यभिव्यक्तिपुरःसरं समाजस्य राष्ट्रस्य च कृते कस्मिंश्चिदवदाने दत्तेऽस्माकं प्रतिष्ठा स्वतो भविष्यति संवर्धितेति विश्वासः प्रकटितः । संस्कृतस्य शास्त्रि–आचार्यसदृशानामुपाधीनामपेक्षया बी. ए. एम. ए. सदृशानामुपाधीनां प्राप्तये वर्धमानयाऽऽकाङ्क्षया संस्कृतं न्यक्कृतमित्याभासो भवतीति प्रतिपादयता पाण्डेयमहोदयेन न केवलमस्माकं राष्ट्रमपितु समस्तमेव जगत् संस्कृतस्य विकासं दिदृक्षुरस्ति, परं वयमेव संस्कृतक्षेत्रमवलम्बमानाः संस्कृतादात्मानं मोचयितुमिच्छामः, अस्यां स्थितौ कथं भवेत् संस्कृतस्य विकास इति चिन्तनीयो विषय इति समुदीरितम् ।

सहायकसंस्थानाध्यक्षेण वाल्मीकिविद्यापीठप्रमुखेन सहप्रा. श्रीशिवहरिमरहट्टामहोदयेन यावत् कालपर्यन्तं राष्ट्रियाया आवश्यकताया दृष्ट्या संस्कृतमध्ययनीयविषयतया न स्थाप्यते, तावत् कालपर्यन्तमस्य विकासस्य गतिर्भवत्यवरुद्धेति प्रतिपादयताऽस्माकं समक्षे कथं भवेत् प्राच्यं पाण्डित्यं संरक्षितम् ? विद्यापीठस्योत्पादनानि गुणस्तरसमन्वितानि विधाय तेषाञ्च परिचालनं कथं भवेदिति नैकविधाः काठिन्यानुप्राणिताः प्रश्ना ज्वलन्तरूपेण समुपस्थिताः सन्तीति प्रतिपादितम् । कर्मकाण्डविधेः संस्कृतस्य च संवर्धनाय सक्षमस्य विश्वविद्यालयस्याऽऽवश्यकताया विषये निजमाग्रहं प्रदर्शयता तेन निकटभविष्ये विद्यापीठे वेधशालाया निर्माणेन ज्यौतिषस्य प्रयोगात्मकमध्ययनं सञ्चालितं भविष्यतीति सूचना च प्रदत्ता।

प्रा. श्रीचूडानाथभट्टरायमहोदयेन संस्कृतछात्रेषु संस्कृतसाधनाया ह्रासः सप्रमाणं प्रदर्शयता विदुषां संमानेन सह तेभ्यो दीर्घकालपर्यन्तं सेवाया अवसरो देय इति निजा भावना प्रदर्शिता । संस्कृतप्रशिक्षकाणां संस्कृतसंरक्षणसम्वर्धनक्रमे सांप्रतिकीं साधनाया न्यूनतां संस्मारयता तेन संस्कृतमधीत्यापि सांप्रतं कीर्तिमाकलयितुं शक्यत इति विश्वासस्याऽभावेनैवेदानीं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राष्ट्रस्यैव परं ज्योति र्गुणगौरवविश्रुतः ।
विद्यापीठस्य वाल्मीकेश्छात्त्रावासः सुशोभते ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृताध्ययनाध्यापनक्षेत्रे गतिरवरुद्धेति प्रतिपादितम् ।

वाल्मीकिविद्यापीठस्य सहायकप्रमुखेन उपप्रा. श्रीनीलमणिढुङ्गानामहोदयेन विद्यापीठस्य प्रशासनेन विहितानां समेषां शैक्षिकभौतिकादिकार्याणां गतिविधिरुपस्थापितः ।

छात्रसंघस्य प्रतिनिधिना श्रीनवराजकट्टेलेन शिक्षणसंस्थानानां महत्त्वपूर्णाङ्गतया वर्तमानानां छात्राणां सयस्याविषये चर्चा कृता ।

कर्मकाण्डप्रशिक्षार्थिप्रतिनिधिः श्रीहीरानन्दतिमल्सिना कर्मकाण्डप्रशिक्षणकार्यक्रमाद् भृशमहं लाभान्वितो जात इति विषयं प्रतिपादितवान् ।

समारोहस्यारम्भे राष्ट्रियाभिलेखालयस्य पण्डितः श्रीघनश्यामशर्मा विद्यापीठछात्रः श्रीहीरानन्दतिमल्सिना च वैदिकमङ्गलाचरणमकुरुताम् ।

कार्यक्रमस्याऽऽरम्भे संमाननीयो राजगुरुः श्रीजुननाथमहाभागः, शिक्षाध्यक्षो डा. श्रीचन्द्रप्रसादगोखलीमहाभागः, संस्थानाध्यक्षः प्रा. श्रीतोयनाथपाण्डेयमहाभागः, उपप्रा. श्रीलोकनाथढकालमहाभागश्च विद्यापीठस्योद्याने वृक्षारोपणं कृतवन्तः ।

सत्यानुसारिणी लक्ष्मीः कीर्तिस्तत्त्वानुसारिणी ।
अभ्याससारिणी विद्या बुद्धिः कर्मानुसारिणी ॥

— सुभाषितरत्नभाण्डागारम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृतछात्राणां काश्चन विशेषताः

(उपलब्धिमूलकमेकं मूल्याङ्कनम्)

—वेणीमाधवढकालः

नेपाले प्रचलितस्य संस्कृतस्य पाठ्यक्रममङ्गीकृत्याऽऽधुनिकैराङ्ग्लभाषादिविषयैः सह संस्कृतमधीयानानां सर्वात्मना संस्कृतवाङ्मये समर्पितानामेव छात्राणां ज्ञानकोषेऽनुभूयमानानां सम्भावितानां च वैशिष्ट्यानां सामान्या रूपरेखा प्रस्तूयते सम्प्रति ।

१. सर्वाधिकसमृद्धे वाङ्मयद्वये युगपत्प्रवेशः—

इतराध्ययनसंस्थानौपम्येनाऽऽधुनिकान् विषयान् मूलरूपेण संस्कृतस्य कमपि विषयं पठतां संस्कृतच्छात्राणां विश्वस्मिन् सर्वाधिकरूपेण स्फीतस्य समृद्धस्य चाङ्ग्लवाङ्मयस्य सर्वात्मना सम्पूर्णस्य ज्ञानगभीरस्य च संस्कृतवाङ्मयस्याध्ययने युगपदवसरोपलब्ध्या त एव समृद्धयोरुभयोर्विश्ववाङ्मययोरन्तस्तलं स्पृशन्तीति किमपि वैशिष्ट्यमेतत् ।

२. प्राच्यस्य नेपालस्येतिहासस्य यथार्थज्ञानम्—

प्राच्यस्य नेपालस्यैतिह्यतथ्यस्य विश्लेषणविधौ सन्ति ज्ञानसहायानि- अभिलेखा मुद्रा राजाज्ञापत्राणि सन्धिपत्राणि वंशविवरणानि काव्यनाटकादीनि । तेषां संस्कृतमयत्वात् संस्कृतस्य छात्रा एव तद्गतमैतिहासिकं तथ्यं विश्लेषयितुं भवन्ति समर्था नेतरे । ते तु परैः कृतस्यानुवादस्याप्यनुवादमेव कुर्वन्त इतिहासविषयमेव परिहासविषयं विधातुं शक्नुवन्ति । अतः संस्कृतच्छात्रा सन्त्यस्मिन् सम्बन्धे भाग्यशालिनः ।

३. आयुर्विज्ञानज्ञानम्—

हिन्दूनामायुर्विज्ञानं वर्तते केवलं संस्कृतवाङ्मयनिबद्धम् । तदायुर्विज्ञानं विज्ञाय प्रयोगदिशि नावीन्येन प्रस्तूय च राष्ट्रमेव समुपकर्तुं प्रभवः संस्कृतपटवश्छात्रा एव केवलम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

४. ज्योतिर्विज्ञानज्ञानम्–

पूर्वं प्राप्तप्रतिष्ठस्य संस्कृतवाङ्मयलोचनस्य ज्योतिर्विज्ञानस्य समालोचनात्मकतया संहितावद्धं विकीर्णञ्च विषयवस्तु समधीत्य मनीषिजननिर्दिष्टदिशा भूगोलखगोलादीनां तत्त्वाववोधे ग्रहनियन्त्रितमानवनियतेः सञ्चालनप्रक्रियायाश्च परिशीलने समर्था भवन्ति संस्कृतवाङ्मयसमर्पिता छात्रा एव ।

५. तन्त्रतत्त्वाववोधः–

पूर्वोक्तसरण्या युगबोधेन सह संस्कृतमधीयानाश्छात्रा एव तन्त्रतारतम्यं स्वायत्तीकर्तुं शक्नुवन्ति । नैकविधास्तन्त्रा नेपाले परम्परागतरूपेण सन्ति प्रचलन्तस्तेषां तन्निर्दिष्टपद्धत्याः साधनापुरःसरमधीतिं विधायैहिकचामत्कारिकलाभदिशि पारलौकिकपरमार्थप्राप्तिपथे च स्वं समाजं राष्ट्रञ्च कृतार्थयितुं कृतिनः संस्कृतछात्रा एव समर्थाः। तन्त्राणां संस्कृतमयत्वाद् गूढार्थग्रन्थिनियन्त्रितत्वाच्च नेतरेषां तत्र प्रवेशो भवति सरलः सहजश्च ।

६. प्राच्यदर्शनदर्शनम्–

महनीयाचरणानां पूर्वजानां मनीषिणां साधनाशुभ्रेण चिन्तनेन परां काष्ठामुपेतानां प्राच्यदर्शनानां विश्ववन्दितं वैभवं मौलिकतया ज्ञातुं प्रभवन्ति केवलं संस्कृतछात्राः। पाश्चात्त्यदर्शनपरिज्ञानेन सार्धं सेश्वरदर्शनानां निरीश्वरदर्शनानाञ्च विकासक्रमः क्रमान्वयः प्रतिपाद्यवस्तुनः पराकाष्ठा च भवन्ति संस्कृतछात्रज्ञानविषया मूल्यप्राप्तिपुरःसरम् । दर्शनानां संस्कृतवाङ्मयनिबद्धत्वाद् गूढार्थगभीरत्वादाधिकारिकगुरोरधिकारिणा छात्रेण गृह्यमाणे सत्येव सार्थकत्वाच्चेतराध्ययनसंस्थानेषु दर्शनविषयमधीयानैरपि छात्रैः पौरस्त्यदर्शनानामध्ययनक्रमेऽनुवादग्रन्थानामावश्यकांशग्रहणेन क्रियते सन्तोषः । सेयमस्ति विवशता तेषाम् ।

७. यन्त्रयानविज्ञानादीनां पौरस्त्यानां परिज्ञानम्–

यन्त्रयानविज्ञानपशुविज्ञानजीवविज्ञानभूगर्भविज्ञानादीनां पौरस्त्यशास्त्रेषु विकीर्णतया ग्रन्थरूपेण च सलक्षणं सोदाहरणञ्च निर्दिष्टानामनुसन्धानपुरःसरं परिज्ञानाय प्रयासविधौ संस्कृतच्छात्रा एव सफला भवन्ति तन्मर्मज्ञानपुरःसरम् । इम एव साहाय्ये साधने चोपलब्धेऽनुसन्धानकेन्द्राणां सत्यां व्यवस्थायां पौरस्त्यविज्ञानस्य काममपि चमत्कृतिं शक्नुवन्ति समुत्पादयितुम् ।

८. पौरस्त्यवास्तुकलास्थापत्यकलादीनां परिज्ञानम्–

सम्प्रति विशेषज्ञैः परीक्षणेन विदितमहत्त्वाया वास्तुकलायाः संस्कृतग्रन्थ-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सूत्रितायाः स्थापत्यकलायाश्च संरक्षणसंवर्धनविधौ संस्कृतछात्रा एव भवन्ति वास्तविका अधिकारिणः ।

९. हिन्दूसंस्कृतेर्मर्मस्पृशां विशेषतानां ज्ञानम्–

हिन्दूसंस्कृतेर्मूलमस्ति स्रोतः संस्कृतम् । हिन्दूसंस्कृतिं परिज्ञातुं भवति साधकं संस्कृतमेव । षोडशसंस्काराणामवतारवादस्य पुनर्जन्मसिद्धान्तस्य परलोकवादस्य स्वर्गनरकादिपुण्यपापपरिणामस्य पञ्चानामृणानामासंवत्सरं विधीयमानानां पर्वणां समये समये समायोज्यमानानामुत्सवानां नित्यानां नैमित्तिकानां काम्यानां कर्मणां पशुपक्षिपाषाणप्रतिमासरित्सागरतीर्थादिषु देवदृष्ट्या विधीयमानायाः समाराधनायाश्च मौलिकं मर्म स्पृशन्ति केवलं संस्कृतच्छात्राः ।

१०. साहित्यसङ्गीतकलासौन्दर्यानुभूतिः–

गुणालङ्काररीतिरसध्वनिभिः समलङ्कृतस्यार्थप्रकृतिसन्धिवृत्तिविभूतिभूषितस्य सुखान्तवादानुप्राणितस्य निजपरम्परागतस्वस्थपूर्वाधारसंघटितस्य संस्कृतसाहित्यस्य, षड्जमध्यमधैवतपञ्चमादिस्वरसङ्घातसंवलितस्य सुखदुःखमोहात्मकमानवजीवनमर्मप्रकाशकस्य पौरस्त्यसङ्गीतशास्त्रस्य बहुमूल्यमानवजीवनसाफल्यसम्पादनसहयोगिनीनां चतुःषष्टिकलानाञ्च विस्तृतं रहस्यं निहितमस्ति केवलं संस्कृतवाचि । अतः संस्कृतसमर्पिता छात्रा एव साहित्यसङ्गीतकलानां सौन्दर्यमनुभवन्ति परमार्थैकलक्ष्यम् ।

११. नेपालीभाषायाः संरचनात्मकस्वरूपविश्लेषणपाटवम् –

नेपालीभाषाया यादृशी संरचना, यश्च तस्याः स्वरूपस्य विकासक्रमः, ये च तत्रत्याः शब्दाः, या च तदीया व्याकरणपरिपाटी, यच्च तदीयं साहित्यसौन्दर्यं तत्सर्वमेवाऽऽधारितं वर्तते संस्कृते । नेपालीभाषाया मौलिकमर्मसमालोचनविधौ भाषाविज्ञानदृष्ट्या विश्लेषणक्रमे चाधीतसंस्कृतव्याकरणछात्रा एव समर्था नेतरे तेषां संस्कृतव्याकरणज्ञानराहित्यात् ।

१२. पौरस्त्यमानवशास्त्रमधिकृत्य समाजसंघटनाया विश्लेषणे सामर्थ्यम् –

पौरस्त्यैः समाजशास्त्रिभिर्निर्मितानां ग्रन्थानां सम्यगध्ययनेन मानवसमाजस्य संरचनाया विषये पारस्परिकसम्बन्धसम्बद्धे विषये सृष्टिक्रमज्ञाने राज्यव्यवस्थाया उत्पत्तिविषये समाजसंधारकतत्त्वग्रामविषये च पौरस्त्यानां समाजशास्त्रिणां सिद्धान्तान् ज्ञातुं प्रभवन्ति संस्कृतछात्राः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

१३. प्राचीनहस्तलिखितग्रन्थानां सारसंग्रहः–

पुस्तकालयेषु सङ्ग्रहालयेषु यत्र तत्र च वर्तमानानां प्राचीनहस्तलिखितग्रन्थानामध्ययनेन सार्वकालिकं मूल्यमादाय भाषायाः साहित्यस्य समाजस्य च बौद्धिकचमत्कारसंवर्धनं कर्तुं भवन्ति सफलाः संस्कृतछात्रा नेतरे तेषां ग्रन्थानां संस्कृतमयत्वात् ।

१४. राजतन्त्रस्य विकासप्रभावयोः परिज्ञानम् –

जगत्यां राजतन्त्रस्याविर्भावस्य क्रमं कारणञ्च संस्कृतवाङ्मयाधारेण विज्ञाय राजतन्त्रस्य महत्त्वाधाने भवन्ति सफलाः संस्कृतछात्राः । यतो हि संस्कृतवाङ्मये राजपरम्पराया विषये या महत्ता प्रदर्शिताऽस्ति, यश्च प्रभावो राज्ञां प्रतिपादितस्तदन्यत्र दुलर्भम् ।

१५. हिन्दूजीवनपद्धत्यामाचारपक्षस्य भूमिकायाः परिज्ञानम्–

हिन्दूसंस्कृतिर्हिन्दूदर्शनं हिन्दूसमाजशास्त्राणि हिन्दूपासनापद्धतिश्च, एतत्सर्वमेव सदाचारस्याऽऽधारशिलायां स्वं स्वरूपं संस्थापयति । सदाचारं विनाऽध्ययनेन न फलावाप्तिरिति हिन्दूनां परम्परागता परिपाटी। सदाचारिभिर्जनैराचारमूलया मेधया प्रतिभया च निर्मिता विद्यतेऽभेद्या हिन्दूसंस्कृतिभित्तिः। अतस्तस्या आचारपक्षस्य परिज्ञानेन तत्पालनपुरःसरमधीताया विद्यायाः सुस्वादु फलमास्वादयन्ति केवलमाचारवन्तः संस्कृतछात्राः । अधीतपिम निगमागममर्म कदाचारेण भवति विनष्टम् । सर्प एव पश्यति सार्पं चरणम्। आचारवन्त एव जानन्त्याचारस्य वैशिष्टयम् । तद्वैशिष्ट्यञ्च स्वैरं सिद्धान्तमेव पठतामन्येषामाचारपक्षस्य प्रयोगशून्यानां मानसपटले न कदापि भवति चमत्कृतम् ।

१६. व्यक्तित्वनिर्माणस्य पूर्वाधाराणां परिज्ञानम्–

मानवैर्गुणैरेव भवति मानवो मानवः । मानवस्य व्यक्तित्वं तद्गतैर्गुणैः सातिशयं प्रयुक्तैर्भवति निर्मितम् । दयादाक्षिण्यादीनां गुणानां यमनियमादीनाञ्च तत्त्वानां व्यक्तित्वनिर्माणस्य पूर्वाधारतामुपेतानां प्रयोगप्रोज्ज्वलं ज्ञानं मनसिकृत्य जनो निजं व्यक्तित्वं निर्मातुं प्रभवति । "मानवो मानवायते रामवदाचरणात्, मानवो दानवायते रावणवदाचरणात्" इति ज्ञानं विभिन्नैः प्रयोगैर्विभिन्नैरुदाहरणैश्च संस्कृतवाङ्मयं सततमुपदिशति । परिणामे कर्मानुसारं सौगत्यदौर्गत्ययोः सङ्केतेन संस्कृत- वाङ्मयं संस्कृतछात्रान् सततं नितरामुपकरोति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

१७. अनुसन्धानप्रवृत्तेर्विकासः—

संस्कृतस्नातकः शास्त्राध्ययनजन्यया विशदया बुद्धया भौतिकेनानुसन्धानेन सह तत्किमपि सामान्येनाज्ञातमीश्वरतत्त्वमात्मतत्त्वं पुरुषतत्त्वं प्रकृतितत्त्वं ब्रह्मतत्त्वं वा ज्ञातुमग्रेसरो भवति तर्कमाध्यमेन योगमाध्यमेन ज्ञानमाध्यमेन तन्त्रमाध्यमेन च । इत्थं विशालब्रह्माण्डसंचालकं विश्वनियन्त्रकं जगत्सर्जकं किमपि तत्त्वं परिज्ञातुं स्वाभीष्टं माध्यममङ्गीकृत्य संस्कृतज्ञः छात्रो निजमात्मानं शक्नोति विस्तारयितुं सर्वत्रैव विलक्षणस्य कस्यापि तत्त्वस्य स्पन्दनमनुभूय स सम्पादयति स्वात्मानं सत्त्वगुणभास्वरम् ।

१८. सर्वन्तन्त्रस्वातन्त्र्यम्—

पदवाक्यप्रमाणमर्मज्ञानाय पूर्वजैर्मनीषिभिराविष्कृतां नव्यन्यायशास्त्रीयां कामपि विलक्षणां शैलीमनुसृत्याधीतसंस्कृतवाङ्मयो जनः प्रायः संस्कृतस्य सर्वासु विधासु विश्लेषणविधावधर्षणीयं व्यक्तित्वं प्रदर्शयति । सर्वासु विद्यास्वप्रतिहतगतिरयं भवति कश्चित् सर्वतन्त्रस्वतन्त्रो विपश्चित् । अन्यभाषासु, अन्यविषयेषु च समर्पिता जना भवन्ति तद्विषयविशेषज्ञाः परं "सा विद्या या विमुक्तये" इति सिद्धान्तमनुसृत्य समर्पितजीवनाः संस्कृतसमर्चका भवितुमर्हन्ति विद्वांसः ।

इत्थमत्र प्रदर्शिताः काश्चन विशेषताः संस्कृतसमर्पितानाम् । सम्प्रति सर्वैरेव संस्कृतछात्रैः केवलं संस्कृतसमर्पितैर्भाव्यं विहाय कुण्ठां हीनभावनाञ्च । संस्कृतविदुषां पुरासीत् सम्मानो भविष्ये भविष्यति वर्तमाने च विद्यते गतिशीलानां समर्पितानाञ्च । ये वृत्त्यादिसौविध्यमुपभुञ्जाना अपि संस्कृतछात्राः संस्कृतमुपेक्षयन्ते, ते भवन्ति संस्कृतशिक्षणप्रक्रियायाः सांप्रतिके शैथिल्यविधावन्यतमं कारणम् । इतरैस्तु संस्कृतसमर्पितैश्छात्रैः प्राप्तुं शक्यते प्रतिष्ठेति विधेयः पूर्णो विश्वासः । यतो हि संस्कृतक्षेत्रे सन्त्यनेकानि कार्याणि साम्प्रतमपि केनाप्यनुद्घाटितानि । यदि छात्राः भवन्त्यनुसन्धानपराः तेषां स्वागताय सम्मानप्रतिष्ठाकीर्तयः सन्ति प्रतीक्षमाणाः ।

+

गुणानामज्ञाता प्रचुरधनदाताऽपि न मुदे,
मुदे विद्याज्ञाता भवति मितदाताऽपि गुणिनाम् ।
दृशौ ग्राम्या दत्ते न च सुमनसो मोदयति सा,
दृशः प्रान्तं दत्त्वा वशयति नितान्तं पुरवधूः ॥

—सुभाषितरत्नभाण्डागारम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नारायणहिटीपाठशालासंबद्धमप्रकाशितं पत्रम्
(वि. सं. १९२७)

परराष्ट्रमन्त्रालयस्यैकविंशति (२१) संख्यकपोटलिकाया द्वात्रिंशदुत्तर-द्विशत- (२३२) पत्रसंख्यासमन्वितमुपप्राध्यापकेन श्रीदिनेशराजपन्तमहाभागेनानुसन्धायात्र प्रकाशनाय प्रदत्तमैतिहासिपत्रमिदं संस्कृत-संवद्धमहत्त्वपूर्ण-विषयाधायकत्वाद् यथोपलब्धं तथा प्रकाश्यते । (सं. मं.)

१. श्री
२. सं १९२७ साल पौषशुदि १५ रोजतकको हाजीर
३. नारायणहीटि पाठशालामा रह्याका जम्मा जवान् ६१
४. गुरुहरु जमा जवान् ४
५. लोकनाथ पंडीत् १ गीरीधर पंडीत १ नरनाथ पंडीत् १ धर्मनीधी पंडीत् १
६. विद्यार्थि ज्मा जवान् ५७
७. सिद्धान्तकौमदी पढन्या ३
८. मध्यकौमुदी तद्धितदेषि प्रारंभ गरी सकी सीद्धांतकौमदी हलसंधी पुऱ्याउन्या वीद्या—
९. चक्रकेसरी अर्ज्याल् १
१०. माघ प्रथम सर्ग सकी सिद्धांतकौमुदी हलन्त पुंल्लिग पुऱ्याउन्या हरीनाथ भडारी १
११. माघ प्रथम सर्ग सकी सिद्धांतकौमदी हलन्त पुंल्लिग पुऱ्याउन्या हरिदत्त ऐ १
१२. मध्यकौमुदी पढन्या ३५
१३. सावीकका ३१
१४. मध्यकौमुदी तीगंतदेषी प्रारंभ गरी कृदंत उरागदी (उणादि) संम पुर्‍याउन्या नत्रा वीज्ञा—

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

१५. नकेसरी अर्ज्याल्				१
१६. मध्यकौमुदी सुवंत प्रारंभ गरी तीगंत सीद्ध धातु पुन्याउन्या जवान्				१०
१७. गौरीकांत रीमाल	१	लीलानाथ लामीछाने		१
१८. तुलसीराम सापकोटा	१	लीलानाथ सुवेडी		१
१९. पद्मनीधी अर्ज्याल्	१	केवलकृष्ण ऐ		१
२०. कुलदीप अधीकारी	१	वीष्णुप्रसाद षनाल्		१
२१. साधुराम देउकोटा	१	हीरंडयगर्भ न्यौपान्या		१
२२. मध्यकौमुदी राम सब्ददेषी तीगंत जुहोत्यादीसंम पुन्याउने तर्कनीधी अचार्ज				१
२३. ऐ तीगंतदेषी प्रारंभ गरी अव्ययीभाव समाससंम पुन्याउने जीवनाथ भट्टराई				१
२४. ऐ तीगंतदेषी प्रारंभ गरी तत्पुरुष समास समाप्ती गर्न्या				२
२५. तीर्थराज ढकाल्	१	दामोदर नेपाल्		१
२६. अमरकोस पढी मध्यकौमुदी अचसंदी प्रारंभ गर्न्या जवान्				१४
२७. येकरुद्र भट्टराई	१	कवीदत्त ढकाल्		१
२८. कालीदत्त ऐ	१	जग्यनाथ सीगत्याल्		१
२९. पोतनाथ अर्ज्याल्	१	वोजनाथ पंडीत्		१
३०. पद्मगर्भ अचार्ज	१	इन्द्रप्रसाद ढुंग्याल्		१
३१. रामप्रसाद न्यौपान्या	१	यज्ञनीधी भट्टराई		१
३२. स्यामलाल वैरागी	१	नरकांत अधीकारी		१
३३. मीननाथ भट्टराई	१	यागदत्त अर्ज्याल्		१
३४. गीरीराज भट्टराई	१			
३५. मध्यकौमुदी तीगंत प्रारंभ गरी समाप्त गर्न्या चन्दकांत पाध्या				१
३६. नवा				४
३७. तेजनीधी ढकाल्	१	षडानन्द ढकाल्		१
३८. वीष्णुप्रसाद अचार्ज	१	कालीप्रसाद नेपाल्		१
३९. अमरकोस पढी मध्यकौमुदी अचसंधी प्रारंभ गर्न्या जवान्				४
४०. अमरकोस पढने				१५
४१. साबिकका जवान्				१३
४२. वनौसधीवर्ग पुन्याउन्या				४
४३, रेवतीरमण वैरागी	१	नोमनाथ प्याकुन्याल्		१
४४. वीष्णुदास ऐ	१	योगदत्त अर्ज्याल्		१
४५. तृतीयकांड नानार्थवर्ग पुन्याउन्या उपेन्द्र भट्टराई				१

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

४६.	तृतीयकांड प्रारंभ गर्न्या श्रीकृष्णदास वैरागी	१
४७.	प्रारंभदेषी ब्रह्मवर्ग पुऱ्याउन्या लोकनाथ अधिकारी	१
४८.	ऐंदेषी मनुष्यवर्ग पुऱ्याउन्या सीलसर्म ऐ	१
४९.	ऐंदेषी कालवर्गसंम पुऱ्याउन्या पद्मकांत अर्ज्याल्	१
५०.	ऐंदेषी दुतीयकांड वनौसधीगर्व (वर्ग) पुऱ्याउन्या	२
५१.	चुडामणी अचार्ज १ मुसु अचार्ज	१
५२.	प्रारंभदेषी तृतीयकांड अनेकार्थसंम पुऱ्याउन्या पुरुषोत्तम देउकोटा	१
५३.	ऐंदेषी दुतीयकांड प्रारंभ गर्न्या गोपाल वैरागी	१
५४.	नआ दुतीयकांड ब्रह्मवर्गसंम पुऱ्याउन्या गौरीप्रसाद नेपाल्	१
५५.	नआ प्रथमकांड प्रारंभ गर्न्या हेमनाथ पाध्या	१
५६.	अष्टाध्याई प्रारंभदेषी द्वितीयाध्याय पुऱ्याउने छवीदत्त रीमाल्	१
५७.	भागवत् दसमस्कंध प्रारंभ गरी समाप्ती गर्न्या यादवेन्द्रदास् वैरागी	१
५८.	रुद्री प्रारंभ गर्न्या मीननाथ पनेरू	१
५९.	कुमार प्रारंभ गर्न्या रामनारायण पाध्या	१

—o—

हेयं हर्म्यमिदं निकुञ्जभवनं श्रेयं प्रदेयं धनम् ।
पेयं तीर्थपयो हरेर्भगवतो गेयं पदाम्भोरुहम् ।।
नेयं जन्म चिराय दर्भशयने धर्मे निधेयं मनः
स्थेयं तत्र सितासितस्य सविधे ध्येयं पुराणं महः।।

—सुभाषितरत्नभाण्डागारम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राजकीयोच्चशिक्षाऽऽयोगस्य (शाही उच्च शिक्षा आयोग) प्रतिवेदनस्य कश्चिदंशः

वर्तमानत्रिभुवनविश्वविद्यालयस्य यथोचितेन सुधारेण सह संस्कृतोच्चशिक्षायाः कृतेऽपरस्य विश्वविद्यालयस्य स्थापना भविष्यति । राष्ट्रियनीतेरनुकूलतया पूर्वप्रस्तावितस्य राष्ट्रियनिकायस्य नीतिगतमार्गदर्शने स्वशासितसंस्थात्वेन द्वयोर्विश्वविद्यालययोः सञ्चालनं भविष्यति ।

त्रिभुवनविश्वविद्यालयान्तर्गतस्य संस्कृताध्ययनसंस्थानस्यान्तर्गतानि विद्यापीठानि तेषां चलाचलसंपदः शिक्षकाः कर्मचारिणश्च प्रस्तावितस्य संस्कृत–विश्वविद्यालयस्यान्तर्गता भविष्यन्ति । अस्य स्थापनायै राष्ट्रियस्तरे आरम्भिककार्यसमितेर्भविष्यति संघटना । सा कार्यसमितिरेव त्रिभुवनविश्वविद्यालयस्य प्रस्तावितामान्तरिकीं रूपरेखां हृदि निधाय संस्कृतविश्वविद्यालयस्य रूपरेखां निर्धारयिष्यति । संस्कृतविश्वविद्यालयस्य सञ्चालनस्य कृते आवश्यकं वित्तीयं भारं नेपालशासनमेव वक्ष्यति ।

राजकीयसंरक्षणे पृथग्रूपेण संस्कृतविश्वविद्यालयस्य स्थापना विधेया ।

(२०४० वैक्रमाब्दे प्रकाशितस्य राजकीयोच्चशिक्षायोगस्य प्रतिवेदनस्य ३९६–९७, ३४५ पृष्ठेभ्यः समुद्धृत्यानूदितम्),

हितं मनोहारि च दुर्लभं वचः ।

–सुभाषितरत्नभाण्डागारम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वार्ता

उपर्युक्तप्रतिवेदनानुसारं शासनेन संस्कृतविश्वविद्यालयस्य स्थापनार्थं शैक्षिकमार्थिकं प्राशासनिकञ्च संघटनात्मकं स्वरूपं निर्धारयितुं सम्माननीयस्य राजगुरोः संयोजकत्वे एका प्रारम्भिककार्यसमितिः संघटिता वर्तते । यस्यां निम्नलिखिता महानुभावाः सदस्याः सन्ति–

१.	सम्माननीयो राजगुरुः	श्रीजुननाथपण्डितः	संयोजकः
२.	प्राध्यापकः	श्रीतोयनाथपाण्डेयः	सदस्य-सचिवः
३.	प्राध्यापकः	डा. श्रीहरिदेव मिश्रः	सदस्यः
४.	प्राध्यापकः	श्रीखेमराज उपाध्यायः	सदस्यः
५.	प्राध्यापकः	श्रीविद्यानाथ उपाध्यायः	सदस्यः
६.	सहप्राध्यापकः	श्रीसरस्वतीप्रसादघिमिरे	सदस्यः
७.	सहप्राध्यापकः	श्रीशिवराजआचार्यः	सदस्यः

□

श्रुतिर्विभिन्नाः स्मृतयश्चभिन्नाः
नैको मुनिर्यस्य वचोऽप्रमाणम् ।
धर्मस्य तत्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः ॥

–सुभाषितरत्नभाण्डागारम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृतसुधारपरामर्शदात्री समितिः

संस्कृताध्ययनाध्यापनगतं मान्द्यमनुभूय संस्कृताध्ययनसंस्थानस्य विद्या-परिषदा तन्मान्द्यकारणपरिज्ञानपुरःसरं परामर्शात्मकप्रतिवेदनप्रदानायाष्टत्रिंश-दुत्तरद्विसहस्र (२०३८) तमस्य विक्रमाब्दस्य भाद्रमासस्य पञ्चमे दिवसे एका संस्कृतसुधारपरामर्शदात्री समितिः संघटिता। तत्र निम्नाङ्किताः सदस्या आसन्–

१.	प्राध्यापकः श्रीचूडानाथभट्टरायः	संयोजकः
२.	सहप्राध्यापकः श्रीविद्यानाथ उपाध्यायः	सदस्य–सचिवः
३.	प्राध्यापकः श्रीशिवगोपालरिसालः	सदस्यः
४.	प्राध्यापकः (रा.प.द्वि.श्रे) श्रीश्रीकृष्ण आचार्यः	सदस्यः
५.	उपप्राध्यापकः श्रीविदुरपौडेलः	सदस्यः

सा च समिती राष्ट्रव्यापितया संस्कृतभाषाया क्षीयमाणानाञ्च संस्कृत-संपदां कारणानि समनुसन्धाय वर्तमानसमये संस्कृतसंरक्षणसंवर्द्धनयोः कृते परा-मर्शात्मकं प्रतिवेदनं प्रस्तुतवती। तस्याः समिते कार्यक्रमानुसारं राष्ट्रस्य विभिन्नेषु भागेषु संस्कृताध्ययनाध्यापनसंपत्स्रोतसां च तथ्यान्वेषणाय यातानां महानुभावानां नामानि सन्ति निम्नाङ्कितानि –

१. प्राध्यापकः श्रीशिवगोपालरिसालः
२. उपप्राध्यापकः श्रीमाधवभट्टराई
३. उपप्राध्यापकः श्रीविदुरप्रसादपौडेलः
४. सहायकप्राध्यापकः श्रीमाधवराजगौतमः

जननी जन्मभूमिश्च जान्ह्वी च जनार्दनः।
जनकः पञ्चमश्चैव जकाराः पञ्च दुर्लभाः॥

–सुभाषितरत्नभाण्डागारम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृताध्ययनसंस्थानस्य विद्यापरिषदः सदस्यानां नामावली

अध्यक्षः	संस्थानाध्यक्षः प्राध्यापकः श्रीतोयनाथपाण्डेयः
सदस्यः	वाल्मीकिविद्यापीठस्य सहायकसंस्थानाध्यक्षः सहप्राध्यापकः श्रीशिवहरिमरहट्टा
सदस्यः	जनताविद्यापीठस्य प्रमुखः सहप्राध्यापकः श्रीरामेश्वरशर्मा
सदस्यः	याज्ञवल्क्यलक्ष्मीनारायणविद्यापीठस्य प्रमुखः प्राध्यापकः (रा. प. तृ. श्रे.) श्रीबालकृष्णउपाध्यायः
सदस्यः	पिण्डेश्वरविद्यापीठस्य प्रमुखः सहप्राध्यापकः श्रीपुरुषोतमभट्टराई
सदस्यः	केन्द्रीयविद्यापीठस्य संयोजकः प्राध्यापकः श्रीगङ्गाधरपराजुली
सदस्यः	प्राध्यापकः श्री अम्बिकाप्रसादअधिकारी
सदस्यः	प्राध्यापकः श्रीचूडानाथभट्टरायः.
सदस्यः	प्राध्यापको डा. श्रीहरिदेवमिश्र :
सदस्यः	प्राध्यापकः श्रीखेमराजउपाध्यायः
सदस्यः	प्राध्यापकः श्रीविद्यानाथपाध्यायः
सदस्यः	प्राध्यापको डा. श्रीवल्लभमणिदाहालः
सदस्यः	आमन्त्रितप्राध्यापको डा. केशवरामजोशी
सदस्यः	प्राध्यापको डा. श्रीसाम्वभक्तपन्तः
सदस्यः	उपप्राध्यापकः श्रीलोकनाथढकालः
सदस्यः	उपप्राध्यापकः श्रीगोपालनिधितिवारी
सदस्यः	उपप्राध्यापको डा. श्रीवीरदेवविष्टः
सदस्यः	उपसचिवो राष्ट्रियशिक्षासमितेः श्रीभोलाप्रसादलोहनी
सदस्यः	नेपालराष्ट्रियाभिलेखालयस्य प्रमुखः श्रीबलरामडंगोलः
सदस्यः	शिक्षातथासंस्कृतिमन्त्रालयस्य; उपसचिवः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृताध्ययनसंस्थानस्याऽनुसन्धानसमितेः सदस्यानां नामानि

अध्यक्षः संस्थानाध्यक्षः	प्राध्यापकः श्रीतोयनाथपाण्डेयः
सदस्यः सहायकसंस्थानाध्यक्षः	सहप्राध्यापकः श्रीशिवहरिमरहट्टा
सदस्यः	प्राध्यापकः श्रीअम्बिकाप्रसादअधिकारी
सदस्यः	प्राध्यापको डा. श्रीहरिदेवमिश्रः
सदस्यः	प्राध्यापकः श्रीविद्यानाथउपाध्यायः
सदस्यः	सहप्राध्यापको डा. श्रीदेवराजपौडेलः
सदस्यः	उपप्राध्यापकः श्रीगोपालनिधितिवारी
सदस्यः	उपप्राध्यापकः श्रीलोकनाथढकालः
सदस्यः	उपप्राध्यापकः श्रीबुद्धिसागरपराजुली
सदस्यः	उपप्राध्यापको डा. श्रीवीरदेवविष्टः
सदस्य—सचिवः	उपप्राध्यापकः श्रीदिनेशराजपन्तः

अत्र संस्थानाध्यक्षस्यानुपस्थितौ वाल्मीकिविद्यापीठस्य सहायकसंस्थानाध्यक्षोऽध्यक्षतां करोति ।

□

याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा

—मेघदूतम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृताध्ययनसंस्थानस्य विषयसमितेः सदस्यानां नामानि

१.	सहायकसंस्थानाध्यक्षः सहप्राध्यापकः श्रीशिवहरिमरहट्टा	अध्यक्षः
२.	प्राध्यापकः श्रीअम्बिकाप्रसादअधिकारी	सदस्यः
३.	प्राध्यापकः श्रीचूडानाथभट्टरायः	सदस्यः
४.	प्राध्यापकः श्रीखेमराजउपाध्यायः	सदस्यः
५.	प्राध्यापकः श्रीशिवगोपालरिसालः	सदस्यः
६.	प्राध्यापकः श्रीऋषिरामपोखरेलः	सदस्यः
७.	प्राध्यापकः श्रीविद्यानाथउपाध्यायः	सदस्यः
८.	सहप्राध्यापकः श्रीसरस्वतीप्रसादघिमिरे	सदस्यः
९.	सहप्राध्यापकः श्रीदुर्गाप्रसाददवाडी	सदस्यः
१०.	सहप्राध्यापकः श्रीराधाकृष्णअधिकारी	सदस्यः
११.	सहप्राध्यापकः श्रीसुरेन्द्रझा	सदस्यः
१२.	प्राध्यापकः (रा.प.द्वि.श्रे.) श्रीश्रीकृष्णआचार्यः	सदस्यः
१३.	उपप्राध्यापकः श्रीगोपालनिधितिवारी	सदस्यः
१४.	उपप्राध्यापकः श्रीलोकनाथढकालः	सदस्यः
१५.	उपप्राध्यापकः श्रीबुद्धिसागरपराजुली	सदस्यः
१६.	उपप्राध्यापकः श्रीविष्णुप्रसादज्ञवाली	सदस्यः
१७.	उपप्राध्यापकः श्रीपुष्करनाथपोखरेलः	सदस्यः
१८.	उपप्राध्यापकः श्रीस्थानेश्वरगौतमः	सदस्यः
१९.	उपप्राध्यापकः श्रीलोकमणिदेवकोटा	सदस्यः
२०.	उपप्राध्यापकः श्रीरघुनाथप्रसादवर्मा	सदस्यः

कर्तव्यमत्र कर्तव्यं प्राणैः कण्ठगतैरपि ।
अकर्तव्यं न कर्तव्यं प्राणैः कण्ठगतैरपि ॥

—सुभाषितरत्नभाण्डागारम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वाल्मीकिविद्यापीठस्य शिक्षणसमितीनां नामानि सदस्याश्च

१. वेदशिक्षणसमितिः–

अध्यक्षः– प्राध्यापकः (रा. प. द्वि. श्रे.) श्रीदामोदरकोइराला

सदस्याः–

१. प्राध्यापकः श्रीऋषिरामपोख्रेलः
२. प्राध्यापकः (रा. प. द्वि. श्रे.) श्रीवाल्मीकिपौडेलः
३. उपप्राध्यापकः श्रीहरिप्रसादगौतमः

२. व्याकरणशिक्षणसमितिः–

अध्यक्षः– उपप्राध्यापकः श्रीपुष्करनाथशर्मपोख्रेलः

सदस्याः–

१. सहप्राध्यापकः श्रीविष्णुराजआत्रेयः (काशीहिन्दूविश्वविद्यालये कार्यातमकरूपेण पाठनाय गतः)
२. उपप्राध्यापकः श्रीविदुरपौडेलः
३. उपप्राध्यापकः श्रीमाधवराजगौतमः
४. सहायकप्राध्यापकः श्रीलीलानाथपौडेलः

३. ज्यौतिषशिक्षणसमितिः–

अध्यक्षः– प्राध्यापकः (रा. प. द्वि. श्रे.) श्रीश्रीकृष्णआचार्यः

सदस्याः–

१. प्राध्यापकः श्रीतोयनाथपाण्डेयः (अधुना संस्थानाध्यक्षपदमधिष्ठितः)
२. आमन्त्रितप्राध्यापको डा. श्रीकेशवरामजोशी
३. उपप्राध्यापकः श्रीसाम्बराजआचार्यः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

४. उपप्राध्यापकः श्रीशम्भुप्रसादढकालः
५. उपप्राध्यापकः श्रीमङ्गलदासप्रधानाङ्गः (आंशिकः)
६. सहायकप्राध्यापकः श्रीवासुदेवआचार्यः (अस्थायी)

४. प्राचीनन्यायशिक्षणसमितिः–

अध्यक्षः– उपप्राध्यापकः श्रीलोकनाथढकालः (अनुबन्धसेवा)

सदस्यौ–

१. सहप्राध्यापकः श्रीशिवहरिमरहट्टा
२. सहायकप्राध्यापकः श्रीसीतारामढकालः

५. नव्यन्यायशिक्षणसमितिः–

